त्ययग्रह इति कल्पनेनादोषात् किञ्चतन्मतेपीत्संज्ञकत्वरूपानुबन्धत्वस्यैव पक्षतावच्छेदकत्वेन हल्प्रत्याहारसिद्धेः प्राक् तद्यकारे तस्याप्यभावेन न तदव्यापकत्वं हेतोः पुनः पुनरकारोच्चारणेनोच्चारणार्थवर्णरहितहलां वर्णसमाम्नायस्थानामग्रहणं प्रत्याहारेणेति कल्पनया यल्झल्प्रत्याहारे यकारग्रहणाभावोप्युपपन्नः, नचादिरन्त्येनेत्येतदीयोद्देश्यतावच्छेदकाक्रान्तत्वेन ग्रहणं दुर्वारमेवेति वाच्यम् तादृशोच्चारणेन तादृशहलामग्रहणार्थत्वं बोध्यते अन्त्येनेतासहित आदिर्मध्यगानामादिसाहचर्य्यात् ग्रहणार्थानां संज्ञेत्यर्थेनादोषात् न चोक्तमनुमानं न युक्तं णकाराद्यनुबन्धानां हल्प्रत्याहारजन्यबोधविषयत्वस्यैव सत्वेन बाधादिति वाच्यम्, अनुबन्धानां स्वघटितसमुदायोपलक्षितशक्तिमत्प्रत्याहारजन्यबोधविषयत्वाभावस्यैव साध्यत्वेनाइउण्घटकणकारघटितसमुदायोपलक्षितशक्तिमत्त्वस्य हल्पदेऽसत्वेन तत्पदबोध्यत्वसत्वेऽपि बाधाभावादच्पदस्यैव तादृशशक्तिमत्त्वेन तत्पदबोध्यत्वा भावस्यैव साध्यत्वात् न च तथा साध्यशरीरेऽपि हल्पदबोध्ये, लण्घटकणकारे बाधोदुरुद्धर एवमइउण्घटकणकारेऽपि अल् अश् अम्पदबोध्ये तण्णकारघटितसमुदायोपलक्षितशक्तिमदलादिपदबोध्यत्वाभावसाधनेऽपि बाध एवेति वाच्यम्, अनुबन्धाः स्वविशिष्टवर्णाघटितसमुदायोपलक्षितशक्तिमत्प्रत्याहारबोध्यत्वाभाववन्तः लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वादित्येवानुमितेराकारः, वैशिष्ट्यञ्च स्वभिन्नत्व स्ववृत्तिवर्णत्वव्याप्यजातिमत्वोभयसम्बन्धेन अल्अश् अम् हल्वल्रल्प्रत्याहारबोध्यत्वेऽप्यइउण् लण् णकारयोर्नैवाधस्तेषुपदेषु तादृशणकारविशिष्टाननुबन्धणकारघटितसमुदायोपलक्षितशक्तिमत्त्वेन तेषां पदानामबोध्यत्वस्यासाधनादित्यदोषात् यादृशसमुदाये अनुबन्धसजातीयोद्वितीयोवर्णोनास्ति तादृश समुदायबोधकप्रत्याहाराबोध्यत्वमेवानुबन्धे साध्यत इति निष्कर्षः, गुरुचरणास्तु सर्वेषां प्रत्याहाराणामाद्यन्ताक्षिप्तसमुदायघटकवर्ण-

वृत्तिजात्यवच्छिन्नबोधकत्वमेव प्रत्याहारजन्यबोधीयघटकत्वावच्छिन्न-विषयत्वस्यैवाभावः साध्यते ततश्चानुबन्धानां तादृशसमुदायघटक-त्वेनाग्रहणेऽपि तादृशसमुदायघटकीयोऽनुबन्धेतरोऽनुबन्धसदृशस्तद्-वृत्तिधर्म्माणत्वादिस्तेनरूपेणानुबन्धानां ग्रहणेऽपि न बाधशङ्केत्याहुः । ननु प्रत्याहारेष्वनुबन्धानां कथमग्रहणेषु ग्रहणञ्चेति यन्ये अच्-प्रत्याहारस्यैवोल्लेखेन भाष्येऽप्यज्बोधकस्याइउणित्यादि सूत्रचतुष्टय-स्योपादानेनैवैतद्ग्रन्थस्य प्रवर्त्तनेन अइउणित्यादिसूत्रचतुष्टयघट-कानुबन्धानेव पक्षीकृत्याच्प्रत्याहारजन्यबोधविषयत्वाभावः साध्यत इत्येव प्रतीयत इति लण् घटकाकारेऽनुबन्धत्वेऽपि नाव्यापकत्वशङ्का तदकारस्योच्चारणार्थत्वाभावेन हकाराकारादिवैलक्षण्येन हल्प्रत्या-हारे ग्रहणापत्तिरपि न वाच्या अउभूलोर्ट्टैराश्येन वर्णसमाम्नाये पाठेन तुल्यजातीयाँस्तुल्यजातीयेषूपदिशत्यचोऽनुहलोहल्ष्विति भाष्येण च हकाराद्यकारवदइउणितिणकारादिवच्च तस्याकारस्याप्यग्रहणार्थत्व-रूपाप्राधान्यादादिरन्त्येनेत्यस्य ग्रहणार्थत्वरूपप्राधान्येनादिसदृशम-ध्यगवर्णनिरूपितशक्तिमत्त्वबोधकत्वात् न कोऽपि दोषः प्राचामिति चेन्न हलादि प्रत्याहारेऽपि सूत्रान्तरस्यानुबन्धेऽपि दोषसद्भावे प्रत्याहार विशेष सूत्रविशेषोपादानपरवार्त्तिकभाष्यसूचितस्यान्यप्रत्याहारेऽन्यसू-त्रस्यानुबन्धस्य ग्रहणाग्रहणयोर्विशेषाभावस्यासङ्गत्यापत्तेः नच नागे-शमतेऽपि हश्प्रत्याहारे हयवरट्सूत्रस्यानुबन्धग्रहणे दोषसद्भावेन प्रत्याहारादिविशेषोपादानासङ्गतिरेवेति वाच्यम्, हकारादिषु पुनः पुनरकारोच्चारणेनोच्चारणार्थवर्णरहितहलामग्रहणबोधनेनादोषात् हश्प्रत्याहारे टग्रहणे तद्विषयप्रयोगाणामुक्तभाष्यादनभिधानकल्प-नाच्च ननु कोयष्टिकष्टीकत इति प्रयोगस्य सुप्रसिद्धत्वेन कथमनभि-धानमिति चेन्न टकारसन्निहितस्यानिकेन हश्निमित्तककार्य्येण घटि-तस्यलक्ष्यस्योक्तभाष्यादनभिधानं कल्प्यत इत्यदोषात् इत्यञ्च लण्-

सूत्रस्याकारस्योच्चारणार्थत्वमेव नत्वनुनासिकत्वेन प्रत्याहारार्थत्वम् उरण्रपर इत्यत्र लपरश्चेति वक्तव्यमेवेति नागेशानुयायिनः ॥

(तुल्यास्यप्रयत्नं सवर्णम्)

तुल्यावास्य प्रयत्नौ यस्येत्यर्थः जनकत्वं षष्ठ्यर्थ इत्युक्तं शेखरे तत्र तुल्यावित्यनुपपन्नम् । एकशेषस्योपपत्त्यभावात् आस्यविशेषणं तुल्यं प्रयत्नविशेषणं तुल्यः अनयोर्नपुंसकपुल्लिङ्गयोर्नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामित्यनेन नपुंसकस्यैवैकशेषात्तुल्ये इत्यस्यैवापत्तेः शास्त्रान्तरस्य चैकशेषविधायकस्य प्रवृत्त्यभावाच्च अद्वन्द्वतत्पुरुषविशेषणानामिति निषेधान्नपुंसकमनपुंसकेनेत्यस्य न प्रवृत्तिरिति तु न वाच्यम्, त्यदादितः शेषे पुन्नपुंसकतोलिङ्गत्यस्यैव तेन निषेधात् विनिगमकाभावेनैतस्यापि तेन निषेधाङ्गीकारेऽप्येकशेषानुपपत्तेस्तादवस्थ्यात् अविशेषेण पुमाँस्त्रियेत्यस्यापि निषेधापत्त्या भगवतीभवानीविश्वनाथयोरित्याद्यनुपपत्तेश्च । अत्रोच्यते प्रवृत्तिनिमित्तनिष्ठनानाप्रकारतानिरूपितव्यक्तिनिष्ठनानाविशेष्यताकशाब्दबोधेच्छायामेव नानाशब्दोच्चारणप्रसङ्गः प्रत्यर्थं शब्दाभिनिवेश इति भाष्यात् प्रतिप्रकारतमिति हि प्रत्यर्थमित्यस्यार्थस्तत्रैवैकशेषस्योपयोगः, यत्र च प्रवृत्तिनिमित्तनिष्ठैकप्रकारतानिरूपितव्यक्तिनिष्ठैकविशेष्यताकबोधनेच्छा तत्रैकस्यैव शब्दस्योच्चारणमिति नैकशेषस्योपयोग इति प्रकृते एकशेषाभावेनैव तुल्यत्वनिष्ठैकप्रकारताकव्यक्तिद्वयबोधजनकैकतुल्यशब्दस्य द्विवचनान्तस्य प्रयोग इत्यदोष इति । जनकत्वस्य षष्ठ्यर्थत्वेन यद्वर्णजनकावास्य प्रयत्नौ तुल्यावित्यर्थलाभादाभ्यन्तरप्रयत्नस्य लाभस्तस्यैव वर्णोत्पत्त्यव्यवहित प्रागभावित्वेन वर्णं प्रति जनकत्वात् बाह्यप्रयत्नस्य च वर्णोत्पत्त्युत्तरभावित्वेन तदजनकत्वाच्च । ननु तुल्यास्यप्रयत्नत्वमिकारैकारयोरपि सत्त्वेन सावर्ण्यापत्तिः, यावत्स्थानसाम्यस्य विवक्षणान्नदोषोऽत एव यजुष्येकेषामिति निर्द्देशसङ्गतिरिति तु न वाच्यम् ।

यावन्ति स्थानानि तैस्साम्यस्य केनापि वर्णेन कस्यापि वर्णस्याभावेन सूत्रार्थस्यैवाप्रसिद्ध्यापत्तेः ननु यद्वर्णजनकानि स्थानानि यावन्ति तावत्स्थानजन्यो यो वर्णस्तयोस्सावर्ण्यमित्यर्थेन एकारस्यजनके कण्ठतालुनी तदुभयजन्यत्वस्य तालुस्थानमात्रजन्य इकारेऽभावेन नैकारेकारयोस्सावर्ण्यापत्तिः अकाराकारादीनाञ्च तत्सत्त्वाच्चार्थाप्रसिद्धिश्चेति चेन्न । यत्तच्छब्दार्थयोरननुगतत्वेनैकेन सूत्रेण सकललक्ष्याणामव्यापनाच्छास्त्रस्य यत्किञ्चिद्वर्णविषयकत्वापत्तेः किञ्च तुल्यास्यप्रयत्नो वर्णस्सवर्ण इत्यर्थे अन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्णःस्यात्ततश्चोपेन्द्र इत्यादावपि दीर्घापत्तिः न च तर्हि सवर्णसंज्ञावचनस्य तत्रतत्र सवर्णपदस्यचाव्यावर्त्तकत्वेन वैयर्थ्यात्तस्य तुल्यास्यप्रयत्नस्तस्यसवर्ण इत्यर्थेनादोष इति वाच्यम्, तथासत्यननुगमापत्त्या सकललक्ष्याणामसंग्रहापत्तेः संज्ञाविधायके सवर्णपदस्य सवर्णशब्दपरत्वेन शब्दस्य च घटादिवत्सनिरूपकत्वाभावेन तस्य सवर्णो नान्यस्येति वक्तुमशक्यत्वाच्च नहि घटो देवदत्तं प्रत्येव घटो न यज्ञदत्तं प्रतीति केनाप्युच्यते किञ्च मिथः सवर्णमित्यप्ययुक्तमेव सवर्णपदस्य शब्दपरत्वेन तत्र मिथः पदार्थस्यान्वयायोग्यत्वादिति चेन्नैवम् । वर्णविशिष्टो वर्णः सवर्ण इति सामान्यतोऽर्थः सवर्ण इत्यन्वर्थसंज्ञया सदृशत्वसमानाधिकरणसवर्णपदवानित्यर्थकः पश्चात् कस्य सदृश इति जिज्ञासायां सम्बन्धिशब्दमहिम्ना यद्वर्णविशिष्टस्तत्सदृश इत्यननुगता एवार्थाः, स्थानिवदादेश इत्यादौ यथा प्रथमतःआदेशः स्थानिवद्भवतीति सामान्यतोऽवगतौ किं कस्य स्थानिनस्सदृश इति जिज्ञासायां योयस्य स्थानी स तस्य सदृशइति विशिष्यैवार्थः प्रतीयते इति नान्यस्य तुल्यास्यप्रयत्नो ऽन्यस्य सवर्णो नवा मिथः पदार्थस्याननन्वयः सादृश्यस्य परस्परसम्बन्धित्वात् । वैशिष्ट्य एवमिथः पदार्थस्यान्तर्भूतत्वान्न पृथक् तस्य प्रवेशः वैशिष्ट्यदानेनैवाद्यदोषस्यापि परिहारः तथाहि स्वविशिष्टो वर्णः स्वसवर्ण इति फलितं, वैशिष्ट्यञ्च स्वजनकस्थानज-

न्यत्व, स्वाजनकस्थानाजन्यत्व, स्वजनकस्थाननिष्ठजनकत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभावाप्रतियोगित्व, स्वजनकप्रयत्नजन्यत्व, स्वाजनकप्रयत्नाजन्यत्वैतत्पञ्चभिस्सम्बन्धैः, आद्यसम्बन्धनिवेशात् कचयोर्न-सावर्ण्यम्, द्वितीयसम्बन्धनिवेशादेकार ऐकारस्य न सवर्णः, तृतीयसम्बन्धनिवेशादेकारस्यैकारो न सवर्ण एकारजनके कण्ठस्थाने जनकत्व सम्बन्धेनैकारोनेत्याकारकाभावप्रतियोगित्वस्यैवैकारे सत्त्वात्, चतुर्थसम्बन्धनिवेशाच्चकारयकारयोर्न सावर्ण्यम्, पञ्चमसम्बन्धनिवेशादेकारैकारयोर्न सावर्ण्यम्, विवृतावेङौ ताभ्यामैचौ तथैव चेति शिक्षावचनेनैकारस्य विवृततरत्वस्य विवृतं स्वराणामिति वचनेन विवृतत्वस्य च सत्वात्, जनकत्वसम्बन्धस्य वृत्त्यनियामकत्वेनाभावप्रतियोगितानवच्छेदकत्वे तु स्वजनकस्थाननिष्ठस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगिजनकतानिरूपितजन्यत्वाभाववत्त्वस्यैव पञ्चमसम्बन्धस्थानेनिवेश इति सर्वमुपपन्नम्, वृत्त्यनुसारेण तु तुल्यस्थानप्रयत्नौ वर्णौ परस्परं सवर्णसंज्ञावित्यर्थस्तत्र मिथःपदार्थस्तु परस्परत्तत्वञ्च सम्बन्धविशिष्टसम्बन्धवत्वं, वैशिष्ट्यञ्च, स्वभिन्नत्व, स्वनिष्ठसम्बन्धतावच्छेदकधर्मावच्छिन्नसम्बन्धतावत्व, स्वप्रतियोग्यनुयोगिकत्व, स्वानुयोगिप्रतियोगिकत्वैतच्चतुष्टयसम्बन्धेन, सम्बन्धवत्ता च प्रतियोग्यनुयोगिकत्वैतदन्यतरसम्बन्धेन, यथा देवदत्तयज्ञदत्तौ परस्परं नमत इत्यादौ देवदत्तस्य यज्ञदत्ते स्वकर्तृकनमस्कारकर्म्मत्वं सम्बन्धः देवदत्ते यज्ञदत्तस्यापि स्वकर्तृकनमस्कारकर्म्मत्वं सम्बन्धस्तत्रान्तिमसम्बन्धे पूर्वसम्बन्धस्य वैशिष्ट्यमस्ति यतः स्वं पूर्वसम्बन्धस्तद्भिन्नत्वमस्ति स्वनिष्ठंयत्सम्बन्धतावच्छेदकं कर्तृतानिरूपकनमस्कारकर्म्मत्वत्वन्तदवच्छिन्नसंसर्गतावत्त्वमप्यस्ति स्वप्रतियोगिदेवदत्तानुयोगिकत्वमप्यस्ति स्वानुयोगियज्ञदत्तप्रतियोगिकत्वञ्चास्तीति भवति परस्परपदप्रयोगः देवदत्तो यज्ञदत्तं नमस्करोति स च तं स्तौति तत्र न भवति पर-

स्परपदप्रयोगस्तत्र देवदत्तस्य यज्ञदत्ते स्वकर्तृकनमस्कारकर्म्मत्वं सम्बन्धो यज्ञदत्तस्य च देवदत्ते स्वकर्तृकस्तुतिकर्म्मत्वं सम्बन्धस्तत्र स्वकर्तृकनमस्कारकर्म्मत्वत्व स्वकर्तृकस्तुतिकर्म्मत्वत्वयोः संसर्गतावच्छेदकयोर्भेदेन द्वितीयसम्बन्धस्याभावात् देवदत्तः परस्परं नमतीति यज्ञदत्तः परस्परं स्तौतीति वा न प्रयोगः देवदत्तः स्वं नमति यत्र तत्र स्वकर्तृकनमस्कारकर्म्मत्वं सम्बन्धो देवदत्तस्य स्वस्मिन्नेव तत्रैकप्रतियोग्यनुयोगिकत्वेन स्वकर्तृकनमस्कारकर्म्मत्वत्वरूपैकधर्म्मावच्छिन्नसंसर्गतायाश्च सत्वेन सम्बन्धत्रयस्य सत्वेऽपि प्रथमसम्बन्धाभावान्न तत्र परस्परं नमतीति प्रयोगः, यत्र देवदत्तः यज्ञदत्तं नमति यज्ञदत्तो विष्णुमित्रं नमति देवदत्तस्य यज्ञदत्ते स्वकर्तृकनमस्कारकर्म्मत्वं सम्बन्धः यज्ञदत्तस्य च विष्णुमित्रे तादृशसम्बन्धस्तत्र प्रथमसम्बन्धस्य द्वितीयसम्बन्धे वैशिष्ट्यवारणाय तृतीयस्सम्बन्धः, प्रथमे द्वितीयसम्बन्धस्य वैशिष्ट्यवारणाय चतुर्थस्सम्बन्ध इति न तत्र परस्परपदप्रयोगः, कालिकादिसम्बन्धेन तत्सम्बन्धवत्वमादायातिप्रसङ्गवारणायानुयोगित्वप्रतियोगित्वान्यतरसम्बन्धेन तत्सम्बन्धवत्त्वं विवक्षितम्, प्रकृते च स्वजनकस्थानप्रयत्नजन्यत्वसम्बन्धमादायसमन्वयः एवं तत्र तत्र सम्बन्धऊह्यः ननु कस्मिँश्चिल्लक्ष्ये चरितार्थस्य शास्त्रस्य कस्मिँश्चिल्लक्ष्ये प्रवृत्त्यभावायोद्देश्यतावच्छेदकव्यापकत्वं विधेये अवश्यमेव शास्त्रतात्पर्य्यविषयीभूतमिति वक्तव्यं तच्च न सम्भवति, निषेधविषये उद्देश्यतावच्छेदकस्य सत्वेऽपि विधेयाभावादतो निषेधशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्नातिरिक्तत्वेन विधिशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने संकोचं कृत्वा संकुचितोद्देश्यतावच्छेदकव्यापकत्वञ्च विधेये इति न निषेधविषयमादाय व्याप्तिभंग इति स्थितौ नाज्झलाविति निषेधशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्नातिरिक्तत्वेन तुल्यास्यप्रयत्नंसवर्णमिति शास्त्रीयोद्देश्यतावच्छेदकावच्छिन्नेऽपि संकोच आवश्यकः स च न

आऽझल्त्वावच्छिन्नातिरिक्तत्वेन तथा च आऽझल्भिन्नस्तुल्यास्यप्रयत्नो वर्णः सवर्ण इत्यर्थे सूत्रार्थाप्रसिद्धिः सर्वस्य वर्णस्याऽझल्रूपत्वात् नच आकाराजन्यतरभिन्नेन तुल्यास्यप्रयत्नमाकाराजभिन्नं सवर्णं हल्भिन्नेन तुल्यास्यप्रयत्नं हल्भिन्नं सवर्णमित्येव निषेधविधिभ्यां मिलित्वा बोध्यत इति वाच्यम्, एकवाक्यताकरणेच्छया वाक्यद्वयसम्पादनस्यास्वारसिकत्वात्, अत्रोच्यते स्वविशिष्टो वर्णः स्व सवर्ण इति पर्य्यवसितार्थे स्ववृत्तिद्वित्ववत्त्ववत्त्वमप्येकं सम्बन्धं दत्वा तत्र द्वित्वे सम्बन्धघटके आकाराजन्यतरहल्वर्णोभयवृत्तिद्वित्वभिन्नत्वं निवेश्यते ततश्चाकाराजन्यतरहल्वर्णोभयवृत्तिद्वित्वभिन्नं यत् स्ववृत्तिद्वित्वं तद्वत्त्वं षष्ठसम्बन्धः फलित इति नाऽझलोः सावर्ण्यप्रसंगः नच द्वित्ववत्त्वसम्बन्धप्रवेशे स्वस्य स्वेन सावर्ण्यानापत्तिरितिवाच्यम्, इष्टापत्तेस्तत्र सावर्ण्यस्य फलाभावात् ॥

(अणुदित्सवर्णस्यचाप्रत्ययः)

दीक्षितमते अण्सवर्णान् गृह्णातीत्यर्थः वर्णसमाम्नाये एव सूत्रं प्रवर्त्तते इगादिपदानाञ्च स्ववाच्यवाच्ये लक्षणा, अस्यच्वावित्यादौ च स्वसदृशवाच्ये लक्षणा, नवीनमते च जातिपक्ष एवास्ति अण्ग्रहणञ्च प्रत्याख्यातमेव परन्तु पाणिनिना कोऽर्थोऽस्य स्वीकृतः स वक्तव्यः, नचाण्सवर्णान्गृह्णातीत्यर्थोऽस्यच्वावित्यत्रत्यस्याकारस्य व्यक्तिपक्षेऽण्त्वाभावेन सवर्णग्राहकत्वानुपपत्तेरिगादिपदेनदीर्घग्रहणानापत्तेश्च नचाण्बोधकं पदं सवर्णान्गृह्णातीत्यर्थः, अस्यच्वावित्यादावस्येगादिपदस्य चाण्बोधकत्वेनादोषादितिवाच्यम्, अन्यसवर्णग्राहकत्ववारणाय स्वसवर्णान्गृह्णातीत्यर्थस्यावश्यकत्वेनेगादिपदसवर्णाप्रसिद्ध्या तस्यग्राहकत्वानुपपत्तेः, अण्बोधकं पदं स्वबोध्यसवर्णेत्याद्यर्थेतु अशादिप्रत्याहारपदस्य स्वबोध्यजकारसवर्णचकारस्यापि ग्रहणापत्तेः, स्वबोध्याण्सवर्णानित्याद्यर्थे तु तद्दोषवारणेऽपि ह्रस्वपदस्य दीर्घबोधक-

त्वापत्तिस्तस्याप्यण्बोधकत्वात्, अण्मात्रबोधकं पदमित्यर्थेन ह्रस्वपदे न दोषस्तस्य वर्णसमाम्नायस्याण्बोधकत्वेऽपि तत्पदस्यानण्बोधकत्वस्यापि सत्वेनातथात्वादित्यप्ययुक्तमेव, अशादिप्रत्याहारस्याप्यग्राहकत्वापत्तिस्तस्याप्यण्मात्रबोधकत्वाभावात्, अत्रोच्यते अण्वृत्तिवर्णत्वविशिष्टधर्म्मवद्वर्णविशिष्टं यत्पदं तत्स्वबोध्याण्सवर्णग्राहकम्, आद्यवैशिष्ट्यम् स्वभिन्नत्व, स्वव्याप्यत्वोभयसंबन्धेन, द्वितीयवैशिष्ट्यं स्वाद्यवयवकत्व, स्वाघटितवर्णद्वयारब्धसमुदायाघटितत्वोभयसंबन्धेनाण्वृत्तिवर्णत्वविशिष्टो धर्म्मोऽत्वादिस्तदाश्रयाद्यवयवकत्वं तद्भिन्नवर्णद्वयारब्धसमुदायाघटितत्वञ्चाशादिप्रत्याहारे व्यपदेशिवद्भावेनाकारादौ च वर्त्तते ह्रस्वघिपदादौ च न वर्त्तत इति नाव्याप्त्यतिव्याप्ती ॥

(स्थानिवदादेशोऽनल्विधौ)

स्थानपदार्थः अवच्छेदकतानिरूपितावच्छेदकतानिरूपितोच्चारणत्वावच्छिन्ना या साधुत्वप्रकारकभ्रमात्मकज्ञानीयविशेष्यतात्वावच्छिन्नप्रकारतानिरूपिता विशेष्यता तदवच्छेदकधर्म्मावच्छिन्ना या साधुत्वप्रकारकप्रमात्मकज्ञानीयविशेष्यतात्वावच्छिन्नप्रकारतानिरूपिता विशेष्यता तदवच्छेदकतावच्छेदकता रूपः प्रथमावच्छेदकताश्रयः स्थानी चरमावच्छेदकताश्रय आदेशः, इकोयणचीत्यादिना हि अजव्यवहितपूर्वत्वविशिष्टेक्कर्मकोच्चारणं साधु इदं ज्ञानं भ्रमः, अर्थात् साधुत्वप्रकारकभ्रमात्मकज्ञानीयविशेष्यतावत् अजव्यवहितपूर्वत्वविशिष्टयण्कर्मकोच्चारणं साधु इदं ज्ञानं प्रमा अर्थात् साधुत्वप्रकारकप्रमात्मकज्ञानीयविशेष्यतावदिति बोध्यते तथा च भ्रमात्मकज्ञानीयविशेष्यतात्वावच्छिन्नप्रकारतानिरूपितोच्चारणत्वावच्छिन्नविशेष्यतावच्छेदकता कर्मत्वनिष्ठा तदवच्छेदकता इक्निष्ठा तदाश्रय इक् स्थानी साधुत्वप्रकारकप्रमात्मकज्ञानीयविशेष्यतात्वावच्छिन्नप्रकारतानिरूपितोच्चारणत्वावच्छिन्नविशेष्यतानिरूपितावच्छेदकता कर्म्म-

त्वनिष्ठा तन्निरूपितावच्छेदकता यण्निष्ठा तदाश्रयो यण् आदेशः इकः स्थाने यण् स्यादित्यत्र स्थानपदार्थैकदेशावच्छेदकतायां षष्ठ्यर्थवृत्तित्वसम्बन्धेनेक्पदार्थस्यान्वयः, स्थानपदार्थचरमावच्छेदकतायाश्च स्वनिष्ठवृत्तित्वसम्बन्धावच्छिन्नाधारतानिरूपिताधेयतासम्बन्धेन यण् पदार्थेऽन्वयः। नन्वेवमिक्निष्ठस्थानितानिरूपितादेशतावान् गुण इति व्यवहारापत्तिः, गुणकर्मकमुच्चारणं साधुत्वप्रकारकप्रमात्मकज्ञानीयविशेष्यतावदित्यर्थस्याद्गुण इत्यनेन बोधितत्वात् यणि च तादृशव्यवहारप्रयोजकयावत् पदार्थस्य गुणेऽपि सत्त्वादिति चेन्न उच्चारणत्वावच्छिन्नविशेष्यताया अयिमोच्चारणत्वावच्छिन्नविशेष्यतायां स्वावच्छेदकोच्चारणत्वावच्छिन्नत्व स्वप्रयोजकशास्त्रप्रयोज्यत्वोभयसम्बन्धेनान्वयः, गुणकर्मकोच्चारणत्वावच्छिन्नविशेष्यतायाश्च इक्कर्मकोच्चारणत्वावच्छिन्नविशेष्यताया द्वितीयसम्बन्धाभावात् ननु विकल्पस्थले जरायाजरसन्यतरस्यामित्यादौ जराकर्मकोच्चारणेऽपि साधुत्वप्रकारकप्रमात्मकज्ञानीयविशेष्यताया एव सत्त्वेन जराशब्दस्य स्थानित्वानापत्तिरिति चेन्न अवच्छेदकतानिरूपितावच्छेदकतानिरूपकविशेष्यताविशिष्टविशेष्यतावच्छेदकतावच्छेदकताया एव स्थानपदार्थत्वेनादोषात्, वैशिष्ट्यञ्च स्वावच्छेदकोच्चारणत्वावच्छिन्नत्व स्वप्रयोजकशास्त्रप्रयोज्यत्व स्वनिरूपितप्रकारताविशिष्टप्रकारतानिरूपितत्व सम्बन्धैः, प्रकारतावैशिष्ट्यञ्च, प्रकारतायां स्वावच्छेदकं यत् साधुत्वप्रकारकप्रमात्मकज्ञानीयविशेष्यतात्वं तद्घटकं यत् साधुत्वं तत्प्रकारकप्रमात्मकज्ञानीयविशेष्यतात्वावच्छिन्नत्व, स्वावच्छेदकं यत्साधुत्वप्रकारकप्रमात्मकज्ञानीयविशेष्यतात्वं तदवच्छिन्नत्वैतदन्यतरसम्बन्धेन इकोयणचीत्यादौ इक्कर्मकोच्चारणं साधुत्वप्रकारकप्रमात्मकज्ञानीयविशेष्यतावत् यण् कर्मकोच्चारणं प्रमात्मकज्ञानीयविशेष्यतावदित्याद्येव शब्दनित्यतापक्षे बोध्यते, तथाच प्रथमज्ञानीयोच्चारणत्वावच्छिन्ना

विशेष्यता इण्निष्ठावच्छेदकतानिरूपितकर्म्मत्वनिष्ठावच्छेदकतानिरूपिका, तद्वैशिष्ट्यं यथा कर्मकोच्चारणं साधुत्वप्रकारकप्रमात्मकज्ञानीयविशेष्यतावदित्याकारकद्वितीयज्ञानीयोच्चारणत्वावच्छिन्नविशेष्यतायां यतो द्वयोरुच्चारणत्वावच्छिन्नत्वमस्ति एकशास्त्रप्रयोज्यत्वमप्यस्ति पूर्वविशेष्यतानिरूपितप्रकारतायाः स्वावच्छेदकं यत् साधुत्वप्रकारकप्रमात्मकज्ञानीयविशेष्यतात्वं तद्घटकं साधुत्वं तत्प्रकारकप्रमात्मकज्ञानीयविशेष्यतात्वावच्छिन्नत्वरूपान्यतरसम्बन्धेन विशिष्टा प्रकारता तन्निरूपितत्वञ्चास्तीति, जराया जरसन्यतरस्यामित्यनेन च जराकर्म्मकोच्चारणं साधुत्वप्रकारकप्रमात्मकज्ञानीयविशेष्यतावत् जरस्कर्मकोच्चारणं साधुत्वप्रकारकप्रमात्मकज्ञानीयविशेष्यतावदित्येव बोध्यते, जराजरसित्युभयोस्साधुत्वात्, तत्र प्रकारताया द्वितीयसम्बन्धरूपान्यतरसम्बन्धमादाय विशिष्टा प्रकारतेति लक्षणसमन्वयः, नच जरानिष्ठस्थानितानिरूपितादेशतावान् जरसिति व्यवहारवत् जरोनिष्ठस्थानितानिरूपितादेशतावान् जराशब्द इति व्यवहारापत्तिस्तादृशव्यवहारप्रयोजकस्योभयत्र समत्वादिति वाच्यम्, तद्विशिष्टत्वं तदादेशत्वमिति स्वीकारात्, वैशिष्ट्यञ्च स्वनिष्ठावच्छेदकतानिरूपितकर्मत्वनिष्ठावच्छेदकतानिरूपकविशेष्यताविशिष्टविशेष्यतावच्छेदकतावच्छेदकताश्रयत्व स्वनिष्ठविषयताप्रयोजकषष्ठ्यन्तपदघटितशास्त्रघटकप्रथमान्तपदप्रयोज्यविषयताश्रयत्वैतदुभयसम्बन्धेन विशेष्यतावैशिष्ट्यं विशेष्यतायां पूर्वोक्तसम्बन्धत्रयेणेतिदिक्, आगमस्थले च नागमिनोऽसाधुत्वं नवा आगममात्रस्य साधुत्वं बोध्यतेऽनागमकानां सागमका आदेशा इति भाष्यात्, तयोश्च तत्त्वमिष्यत एवेति विभावनीयम्, ननु आदेशः स्थानिवदिति सूत्रयितुमुचितं यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणमित्यभियुक्तोक्त्या उद्देश्यार्थस्य प्रथमं बुध्यारोहेणोद्देश्यवाचकपदस्यैव प्राथम्यलाभादितिचेत्सत्यम्, आचार्य्येण नियमेन तथाप्रयोगे

पश्चादुपात्तस्य तस्यासाधुत्वमेव प्रतीयेदिति शंकया वैपरीत्येन प्रयोग-
करणम्, उद्देश्यस्य पश्चात्प्रयोगेऽपि साधुत्वमस्त्येव केवलं किंचिद्वि-
लम्बेन तत्त्वप्रतीत्याऽनुचितत्वमात्रमितिभावः, ननु सुपद्देत्यादौ पदा-
देशोजरारूपस्थानिवत्स्यात् ततश्च जरसापत्तिरिति चेन्न सम्बन्धि-
शब्दत्वात्तदादेशस्तत्स्थानिवदित्यर्थलाभेनादोषात् अनल्विधावित्य-
स्यालोविधिरल्विधिर्न्नाल्विधिरनल्विधिरिति विग्रहेणाल्सम्बन्धिवि-
धिभिन्नेविधावित्यर्थः, अल्च स्थान्यवयव एव गृह्यते, सम्बन्धश्च
स्ववृत्तिधर्मावच्छिन्नोद्देश्यताकत्वरूपस्तथाचादेशः स्वस्थानिवृत्तिधर्म-
वान् भवति स्वस्थान्यवयवाल्वृत्तिधर्म्मावच्छिन्नोद्देश्यताकविधिभिन्न-
विधावित्यर्थः, अलः स्थान्यवयवत्वेन विशेषणात् सुपिचेत्यस्य यञत्वा-
वच्छिन्नोद्देश्यताकविधित्वेऽपि तस्मिन् कर्त्तव्ये रामायेत्यादौ स्थानि-
वत्वसिद्धिः यञ आदेशावयवत्वेन स्थान्यवयवत्वाभावात्, नचादेशो
य इति तत्स्थान्यवयवोऽलेकारस्तद्वृत्तिर्धर्म्मः सुप्त्वं तद्धर्मावच्छिन्नोद्देश्य-
ताकत्वेन न सुपिचेति कर्त्तव्ये स्थानिवद्भावप्रसक्तिरिति वाच्यम्
अल्त्वव्याप्यत्वेन धर्मस्य विशेषणात् सुप्त्वस्य चाल्त्वव्याप्यत्वाभावात्
अत एवाग्रहीदित्यादौ स्थानिसम्बन्ध्यलिकारस्तद्वृत्तीट्त्वावच्छिन्नोद्दे-
श्यताक इट ईटीति कर्त्तव्येऽपि दीर्घस्य स्थानिवत्त्वेनेट्त्वमिट्त्वस्या-
ल्त्वव्याप्यत्वाभावात् व्याप्यत्वनिवेशादेवौङःश्यांप्रतिषेधोवक्तव्य इति
वार्त्तिकं सङ्गच्छते ऽन्यथा ज्ञान इत्यादौ श्यादेशे स्थान्यलौकारवृत्ति-
स्त्वादित्वावच्छिन्नोद्देश्यताके यचिभमिति कर्त्तव्ये स्थानिवत्त्वानापत्त्या
भत्वाभावेन यस्येतिलोपाप्राप्त्या वार्त्तिकस्य वैयर्थ्यापत्तिस्सिद्धान्ते
स्त्वादित्वस्याल्त्वव्याप्यत्वाभावेन न दोषः नच बभूविवेत्यादौ वादे-
शस्य स्थान्यवयववकारवृत्त्यल्त्वव्याप्यवल्त्वधर्मावच्छिन्नोद्देश्यताका-
र्धधातुकस्येड्वलादेरिति कर्त्तव्ये स्थानिवत्त्वाप्रवृत्तेरार्धधातुकत्वाभा-
वेनेटोऽभावापत्तिरिति वाच्यम्, स्वस्थान्यल्वृत्तिरल्त्वव्याप्यो यो धर्म-

स्तद्घटितो यः स्वावृत्तिर्धर्मस्तदवच्छिन्नोद्देश्यताकेत्यस्य विवक्षणात् प्रकृते तादृशं वलादित्वं न स्वावृत्तिरार्धधातुकत्वञ्च नतादृशमित्यदोषात्, स्वमादेशः घटितत्वमनतिदिष्टं ग्राह्यमितितादृशवल्त्वमादायन दोषः निरुक्तधर्म्मश्चैकपदप्रतिपाद्य एवगृह्यत इति तादृशवलाद्यार्द्धधातुकत्वमादायापि नदोष इत्यूहनीयम् यत्तु स्वावृत्तित्वमनिवेश्यालत्वव्याप्यधर्म एव स्वावयवावृत्तित्वं निवेशितं, वल्त्वञ्च स्वावयववृत्त्येवेति नदोषः नच बभूवतुरित्यादौ वलादित्वातिदेशापत्तिर्वल्त्वस्य स्थान्यवयवाल्वृत्तित्वाल्त्वव्याप्यत्वयोस्सत्वेऽप्यादेशावयवतकारवृत्तित्वेन तद्धर्मावच्छिन्नोद्देश्यताकत्वेप्यार्धधातुकस्येड्वलादेरित्यस्य निषेधाप्रवृत्तेः नच स्वाद्यवयवालवृत्तित्वनिवेशेन बभूवतुरित्यादौ स्वमतुस्तदाद्यवयवोऽलकारस्तदवृत्तित्वस्य वल्त्वे सत्वेन निषेधप्रवृत्त्या बभूविवेत्यादौ स्वं वादेशस्तदाद्यवयवोऽल् वकारस्तद्वृत्तित्वस्यैव वल्त्वे सत्वेन निषेधाप्रवृत्त्या नातिव्याप्त्यव्याप्ती इति वाच्यम्, अस्तेः क्विपि अस्तेर्भूरित्यनेन भ्वादेशे भूरित्यादौ हल्त्वस्यादेशाद्यवयवाल्भकारस्तद्वृत्तित्वेन निषेधाप्रवृत्त्या स्थानिवत्त्वेन हलन्तत्वात्सुलोपापत्तेः, ममतु स्वस्थान्यवयवाल्वृत्त्यल्त्वव्याप्यो धर्मो हल्त्वं तद्घटितं हलन्तत्वं तच्च स्वमादेशो भूरिति तदवृत्तिरपीति निषेधप्रवृत्त्या दोषाभावः वस्तुतः स्वस्थान्यवयवाल्वृत्तित्वानिवेशस्य न फलमादेशावृत्तित्वस्याल्त्वव्याप्यधर्मघटितधर्मे निवेशेनैव सर्वानिष्टपरिहारादितिप्राचीनमतविचारः ॥ नवीनास्तु आदेशः स्वस्थानिवत् स्वविशिष्टविधौ न वैशिष्ट्यञ्च स्वावृत्तियोऽल्त्वव्याप्यधर्मघटितैकपदप्रतिपाद्यो धर्मस्तद्धर्मावच्छिन्नोद्देश्यताकत्व, स्वनिरूपिताऽल्त्वव्याप्यधर्म्मावच्छिन्नस्थानितासमानाधिकरणधर्म्मावच्छिन्नोद्देश्यताकत्वेत दन्यतरसम्बन्धेनेति वदन्ति प्रथमसम्बन्धस्य फलन्तु पूर्वोक्तमेव द्वितीयस्य फलं धिन्वन्तीति धिवेर्भिप्रत्यये नुमि भकारस्यान्तादेशेमध्ये धिन्विकृण्वोरच्चेत्युप्रत्यये वकारस्याकारा-

देशे तस्य लोपे उकारस्य यणि धिन्वन्तीतिरूपम्, तत्रोपत्ययगतमार्ध-
धातुकत्वं स्थानिवद्भावेन वकारादेशे आदाय प्राप्त इडागमो न तस्य
स्थानिभूतोऽल् उकारस्तद्वृत्त्यार्धधातुकत्वावच्छिन्नोद्देश्यताकत्वेनानल्-
विधाविति निषेधात् पूर्वसम्बन्धेन तु न सिद्धिरार्धधातुकत्वस्यालत्व-
व्याप्यधर्मघटितत्वाभावात् नचापरनिमित्तकत्वेनान्तरङ्ग इटि परनि-
मित्तकस्य यणोऽसिद्धत्वान्नेडागम इति वाच्यम्, अपूर्वनिमित्तकत्वे
सत्यपरनिमित्तकत्वमन्तरङ्गत्वमितिस्वीकारेणेडागमस्य धातोः परस्य
वलादेरार्धधातुकस्येडित्यर्थकेनार्धधातुकस्येड्वलादेरित्यनेन विहितस्य
पूर्वनिमित्तकत्वेनान्तरङ्गत्वाभावात् धातोः परस्येत्यर्थाभावेतु प्रत्यय-
ग्रहणेचापञ्चम्या इत्यस्याप्राप्त्याऽऽर्धधातुकपदस्य प्रत्ययबोधकत्वेन
तदादितदन्तोपस्थितौ भवितेत्यादौ धातोः पूर्वमिडापत्तेः, अपरनि-
मित्तकत्वमात्रन्तु न तथा नामीतिसूत्रे आमीति न्यासे रामाणामि-
त्यादौ नित्यत्वान्नुटः पूर्वं दीर्घे नुटोऽप्राप्त्या ह्रस्वग्रहणवैयर्थ्योपपादन
परभाष्यासङ्गत्यापत्ते रपरनिमित्तकत्वेन नुटोऽन्तरङ्गत्वात् नित्यापेक्षया-
ऽन्तरङ्गस्य बलवत्त्वेन नुट एव पूर्वं प्रवृत्तेः अपूर्वनिमित्तकत्वेसतीत्यु-
क्तौतु न दोषः, उक्तभाष्यादपरनिमित्तकादेशत्वमन्तरङ्गत्वमितिस्वीका-
राच्च नात्रेटोऽन्तरङ्गत्वम्, भविष्यतीत्यादौ परनिमित्तकस्य स्यादेरसि-
द्धत्वेनेटोऽप्राप्त्या भविष्यतिगम्यादय इत्यादिनिर्द्देशासङ्गत्यापत्त्येडा-
गमेऽन्तरङ्गपरिभाषाया अप्रवृत्तिकल्पनाच्च नच नात्रेटः प्रवृत्तिः
पञ्चमीसमासेनाचः परस्मिन्नित्यनेन स्थानिभूतोऽजुकारस्ततः पूर्वान-
कारस्ततः परस्येडागमे कर्त्तव्ये परनिमित्तकस्य यणादेशस्य स्थानिवद्भा-
वेन वलादित्वाभावादिति न फलमेतदिति वाच्यम् । पञ्चमीसमा-
स्यानित्यत्वात् नचानित्यस्यापीष्टस्थले प्रवृत्तिरेवाभ्युपगमोऽन्यथा तस्य
वैयर्थ्यापत्तेरिति वाच्यम्, पञ्चमीसमासेऽपि स्वविधावप्रवृत्तेरवश्याभ्युप-
गमादन्यथा भवतीत्यादावपि गुणस्य स्थानिवद्भावापत्त्याऽवादेशानापत्तेः,

भवतेर इत्यादिनिर्द्देशासङ्गत्यापत्तेश्च । नचानित्यत्वाद्भवतीत्यादावप्रवृत्तिस्तस्या एवेष्टत्वात् धिन्वन्तीत्यादौ च प्रवृत्तिरेव तयैवेष्टसिद्धेरिति वाच्यम् । भवतीत्यत्र न लवनमित्यत्र न भवनमित्यत्र न स्तवनमित्यत्रेत्याद्यनन्तवचनकल्पनरूपाननुगतानित्यत्वकल्पनापेक्षया लाघवात्, स्वविधौ न स्थानिवदित्यनुगतानित्यत्वकल्पनाया एव न्याय्यतया धिन्वन्तीत्यत्र स्थानिवत्वाप्राप्तेः भाष्योक्तेनाचः परस्मिन्पूर्वविधाविति न्यासेनात्र स्थानिवद्भावः स्यादित्यपि न न्यायम् आसचित्यस्यासिद्धवदत्राभादिति सूत्रसिद्धस्योदाहरणस्य दानेन भवतीत्यादिलक्ष्यानुरोधेन च तन्न्यासस्यैकदेश्युक्तत्वेन सिद्धान्तिभाष्यासम्मतत्वात्, यत्तु भवतीति द्वितीयार्थस्य फलं तत्रहि लट्प्रत्ययगतमार्धधातुकत्वं स्थानिवद्भावेनादायप्राप्तस्येटः प्रकारान्तरेण वारणासम्भवः, स्वीकृते तु द्वितीयार्थे ऽलत्वव्याप्यलत्वन्तद्धर्म्मावच्छिन्नस्थानितासमानाधिकरणमार्धधातुकत्वन्तद्धर्मावच्छिन्नोद्देश्यतावत्त्वेनानल्विधाविति निषेधान्नेट्, आद्यार्थे तु न निषेधप्रवृत्तिरार्धधातुकत्वस्यालत्वव्याप्यत्वाभावादिति तन्न लिट्चेत्यनेन लिडादेशस्यार्धधातुकसंज्ञाविधानसामर्थ्याल्लकारगतार्धधातुकत्वातिदेशो नेत्यर्थकल्पनयापि दोषाभावात्, धातोरित्यस्य सम्बन्धाद्धातोः परत्वाभावाच्च न दोष इति तु न युक्तम् । यदादौ श्पोर्लुकि दोषसम्भवात् द्वितीयार्थे प्रमाणन्तु भोभगोअघोरिति सूत्रस्थं भाष्यम्, तत्र हि अशग्रहणस्य फलं छन्दस्सु पयस्सु इति सप्तमीबहुवचने दत्वोक्तम् किमिति प्रथमैकवचने दोषो नोक्तः वृक्षस्तत्र प्लक्षस्तत्र इत्यादावित्याशङ्क्यानल्विधाविति निषेधस्तत्र भविष्यतीति समाहितम् । अयं भावः वृक्षस्तत्रेत्यत्र सत्वस्यासिद्धत्वाद्रेफस्य विसर्गस्य स्थानिवद्भावेनैव रुत्वमानेयं तच्च न सम्भवति, रुत्वस्य विसर्गावालत्वव्याप्यत्वावच्छिन्नस्थानितासामानाधिकरण्यात्तद्धर्म्मावच्छिन्नोद्देश्यताकत्वाद्रुत्वस्येत्यनल्विधाविति निषेधासम्भवात्, सप्तमी

बहुवचने तु रोः सुपीति शास्त्रीयविसर्गस्थानिता रुत्वावच्छिन्ना रुत्वञ्च, नाल्त्वव्याप्यमिति निषेधाभावात्, स्थानिवत्त्वाद्रुत्वं स्यादिति विशेष इति, प्राचीनमते तु न निषेधप्राप्तिस्तत्रापि अतिदेष्टव्यस्य रुत्वस्याल्त्वव्याप्यधर्मघटितत्वाभावात्, नच रोः सुपीत्यस्य नियमार्थतया खरवसानयोरित्यनेनैव, तत्रापि विसर्गेण साम्यमेवेति न विशेषोपपादनं युक्तं तन्मतेऽपीति वाच्यम्, नागेशमते नियमशास्त्राणां विधिमुखेनैव प्रवृत्तेः रोस्सुपीत्यनेनैव तत्र विसर्गस्य सत्त्वात्, रोःसुपीत्यत्रापि रेफमनुवर्त्त्य रोरेफस्य विसर्ग इत्यर्थेनात्राप्यनल्विधावित्यस्य प्रवृत्त्या साम्यमेवेति चेत्तर्हुत्तरार्थमेवाशुग्रहणमित्यन्यदेतत् नच स्वृ धातोर्द्वित्वे स्वृस्वृ इतिस्थिते अभ्यासस्योरदत्वे रपरत्वे च स्वर् स्वृ इति दशायाम् उरित्यस्याभ्यासत्वाभावाद्धलादिः शेषो न स्यात्, नच स्थानिवद्भावेनाभ्यासत्वं, प्राचीनमते निषेधाप्रवृत्तावपि नवीनमते ऋत्वस्याल्त्वव्याप्यत्वात्तद्धर्मावच्छिन्नस्थानितासामानाधिकरण्यादभ्यासत्वस्यानल्विधाविति निषेधात्, नच पुनरभ्याससंज्ञेति शेखरोक्तं युक्तं स्वीयविधेयताश्रयावधिकपूर्वत्व स्वीयोद्देश्यताश्रयत्वोभयसंबन्धेन द्वित्वशास्त्रविशिष्टस्याभ्याससंज्ञेत्यर्थकपूर्वोऽभ्यास इत्यस्याप्रवृत्तेः, उरित्यस्योद्देश्यत्वाभावात्, नचैकदेशविकृतन्यायेनाभ्यासत्वमर्धाधिकविकारस्य सत्वेन न्यायस्य प्रवृत्त्यभावादत एव न तन्न्यायेनोद्देश्यतामादाय पुनरभ्याससंज्ञा, नच द्वित्वशास्त्रविशिष्टविशिष्टस्याभ्याससंज्ञेत्यर्थः, वैशिष्ट्यञ्च स्वीयोद्देश्यताश्रयघटितत्व स्वीयविधेयताश्रयघटितत्व स्वविशिष्टाघटितत्वैतत्त्रितयसंबन्धेन तत्र वैशिष्ट्यं स्वीयोद्देश्यताश्रयेतरत्व स्वीयविधेयताश्रयेतरत्वोभयसंबन्धेन अग्रिमवैशिष्ट्यं स्वारम्भकत्व स्वारम्भकपूर्वत्वोभयसंबन्धेन स्वृस्वृ इति समुदायः द्वित्वशास्त्रविशिष्टस्तत्र हि स्वं द्वित्वशास्त्रं तदीयोद्देश्यताश्रयविधेयताश्रयौ पूर्वोत्तरभागौ ताभ्यांघटितत्वमस्ति ताभ्यामितर उदासीनस्तदघटितत्वमप्यस्ति

तद्विशिष्टश्च पूर्वोभागस्तस्य हि तत्समुदायारम्भकत्वं तत्समुदायारम्भकोत्तरभागपूर्वत्वञ्चास्ति तस्याभ्याससंज्ञा अर ऋ इति समुदायेच ऋ ऋ समुदायगतं द्वित्वशास्त्रविशिष्टत्वमेकदेशविकृतन्यायेनानीयते तद्वैशिष्ट्यं च स्वत एवास्तीति जायत एवारित्यस्याभ्याससंज्ञा ऋऋ समुदायैकदेशात्भागस्याकाररूपविकारसत्वेनार्धान्यूनस्यैव विकृतत्वेन न्यायप्रवृत्तेरविवादादिति वाच्यम्, उद्देश्यताश्रयस्यैव ऋ इत्यस्य विकृतत्वेनोद्देश्यताश्रयरूपविकृतावयवनिबन्धनस्य द्वित्वशास्त्रवैशिष्ट्यस्य छिन्नपुच्छे शुनि पुच्छवत्त्वस्येवातिदेष्टुमशक्यत्वात्, अत्रोच्यते द्वित्वशास्त्रविशिष्टस्याभ्याससंज्ञेत्यर्थो वैशिष्ट्यं च स्वीयविधेयताश्रयावधिकपूर्वत्व, स्वीयोद्देश्यताश्रयसमभिव्याहृतवर्णाघटितत्वोभयसंबन्धेन अरित्यत्र प्रथमसंबन्धसत्वस्त्येव द्वितीयोऽप्यस्ति यत उद्देश्यताश्रय ऋ इति तत्समभिव्याहृतत्वं तदुत्तरभागतस्याकारस्य रेफस्य वा नास्त्यपित्वन्यस्यैव तदघटितत्वमरित्यस्येति न्यायसूत्राभ्यां विनैवाभ्यास संज्ञोपपत्तिः, नचोरदत्वोत्तरमुपसर्ग सम्बन्धेऽकारादेरिवोपसर्गस्याप्युद्देश्यताश्रयसमभिव्याहृतत्वाभावात्तद्घटितस्याप्यभ्याससंज्ञापत्तिरितिवाच्यम्, उद्देश्यताश्रयसमभिव्याहृतत्वयोग्याघटितत्वनिवेशेनादोषात्, उपसर्गस्यतद्योग्यतासत्वात् स्वीयोद्देश्यताविशिष्टसमभिव्याहृतवर्णाघटितत्वसंबन्धनिवेशेनादोषाद्वा तत्र वैशिष्ट्यं स्वाश्रयत्व स्वाश्रयस्थानिकत्वैतदन्यतर संबन्धेनारित्यत्र द्वितीयसंबन्धसत्वेनादोषात्, वस्तुतस्तु अत्त्वव्याप्यधर्मावच्छिन्नस्थानितासमानाधिकरणधर्मेण साक्षादवच्छिन्नोद्देश्यताककार्य एव निषेधस्वीकारेण हलादिःशेष एतदीयोद्देश्यताया अभ्यासत्वेन साक्षादवच्छिन्नत्वाभावेन स्थानिवद्भावप्रवृत्तेरव्याहतैवेति दिक्, साक्षान्निवेशादेव कुम्भकारेभ्य इत्यत्र सन्निपातपरिभाषयाऽभ्यसंज्ञाऽभावोपपादनपरभाष्यासङ्गतिरपि न अन्ययैत्वीया याऽत्वरूपात्त्वव्याप्यधर्मावच्छिन्ना स्थानिता तत्समानाधिकरणं ऋत्वन्तद्धर्मावच्छि-

न्नोद्देश्यताकत्वेन कृन्मेजन्त इति कर्त्तव्ये स्थानिवत्त्वाप्रवृत्तेरेकारे क्त्वा-
भावेन संज्ञाया अप्राप्त्या सन्निपातपरिभाषया तद्वारणपरभाष्यासङ्गति-
स्स्यात्, तन्निवेशे तु अव्ययसंज्ञीयोद्देश्यतायाः क्त्वत्वेनसाक्षादवच्छिन्नत्वा-
भावेनादोषः, उद्देश्यतायाः षष्ठ्यन्तपदप्रयोज्याया एव ग्रहणेनादोषाच्च,
अव्ययसंज्ञीयोद्देश्यतायास्तथात्वाभावात्, अतएव लोम्नो इम इत्यादाव-
दोषोऽन्यथा स्थानिवद्भावेन स्वादित्ववच्चस्यादल्त्वव्याप्यमौङ्त्वन्तद्धर्म्मा-
वच्छिन्नस्थानिता नपुंसकाच्चेति शास्त्रीया तत्समानाधिकरणो धर्म्मः
स्वादित्वन्तदवच्छिन्नोद्देश्यताके भत्वे कर्त्तव्येऽनल्विधाविति निषेधा-
पत्तेस्ततश्च भत्वाभावेऽल्लोपो न स्यात् साक्षान्निवेशे तु भसंज्ञीयोद्देश्य-
तायाः स्वादित्वेन साक्षादवच्छिन्नत्वाभावादनल्विधाविति निषेधा-
प्रवृत्तिरुद्देश्यतायाः षष्ठ्यन्तपदप्रयोज्यत्वाभावाच्च तत्रैव स्थानिवत्त्वेन
द्विवचनत्वमादाय प्रगृह्यत्वात् प्रकृतिवद्भावः प्रगृह्यसंज्ञीयोद्देश्यताया
द्विवचनत्वेन साक्षादवच्छिन्नत्वेऽपि षष्ठ्यन्तपदप्रयोज्यत्वाभावादन-
ल्विधाविति निषेधो न नचाग्रहीदित्यादौ दीर्घं विधावचश्चेत्यस्योप-
स्थित्या दीर्घीयस्थानिताऽल्त्वव्याप्यमच्त्वन्तदवच्छिन्ना तत्समानाधि-
करणमिट्त्वन्तदवच्छिन्नोद्देश्यताक इट ईटीति दीर्घे कर्त्तव्ये स्थानि-
वद्भावेन दीर्घादेशे इट्त्वाभावात्सलोपो न स्यादिति वाच्यम्, अचो-
ञ्णितीत्यत्रेक्परिभाषोपस्थिताविक्रूपस्यैवाचोवृद्धावज्ग्रहणवैयर्थ्येन
निर्द्दिष्टस्थानिके पदोपस्थापकपरिभाषाया अप्रवृत्तिकल्पनेनादोषात्,
इट ईटीति सलोपीयोद्देश्यताया इट्त्वेन साक्षादवच्छिन्नत्वाभावाच्च
एतेनेक् परिभाषाऽत्र न प्रवर्त्तत इति विशेषज्ञापनेऽपि न दोषः ।
नन्वतिखट्व इत्यादौ स्थानिवद्भावेनाप्त्वमादाय प्राप्तसुलोपवार-
णाय सूत्रकृतोदीर्घग्रहणं ङ्याप्ग्रहणेऽदीर्घ इति वार्त्तिकं ङ्याबु-
द्देश्यककार्ये कर्त्तव्ये दीर्घभिन्न आदेशो न स्थानिवदित्यर्थकं तत्प्रत्या-
ख्यानायऽऽकारप्रश्लेषपरभाष्यं चासङ्गतं ह्रस्वविधाववश्चेत्यस्योपस्थि-

त्या हल्ङ्यादीयस्थानिताऽल्त्वव्याप्याप्त्वावच्छिन्ना तत्समानाधिकरणाप्त्वावच्छिन्नोद्देश्यताके हल्ङ्याबिति सुलोपे स्थानिवद्भावाप्रवृत्तेरितिचेन्न आप्त्वेन साक्षादवच्छिन्नत्वस्य सुलोपीयोद्देश्यताया अभावेन निषेधाप्रवृत्तेः अथ अततक्षदित्यत्र तक्षेर्ण्यन्ताल्लुङि चङि इयङ्णिलोपयोः प्राप्तौ परत्वादियङि ततो णिलोपेनान्त्यलोपः प्रसज्जेदतः पूर्वविप्रतिषेधेन णिलोप इति भाष्यसङ्गतिरियङः स्थानिवत्त्वेन णित्वासिद्धेरनल्विधावितिनिषेधात् इयङीयस्थानितेत्वावच्छिन्ना तत्समानाधिकरणं णित्वन्तेन साक्षादवच्छिन्नत्वाण्णिलोपीयोद्देश्यतायाः नच तक्षीत्यस्य स्थाने तक्षिय् इत्यादेश इत्यानुमानिकस्यान्यादेशभावकल्पनात् स्थानिवद्भावेन तक्षिगतं ण्यन्तत्वं तक्षिय इत्यत्रानीय ण्यन्ताङ्गस्य लोप इत्यर्थकणेरनिटीति सूत्रेणालोऽन्त्यपरिभाषया यलोपः प्राप्त इतिवाच्यम्, निर्द्दिश्यमानपरिभाषया ण्यन्ताङ्गावयवस्य णिपदीयनिर्द्दिश्यमानस्य लोप इत्यर्थेनेय् इत्यत्र णित्वमन्तरा णिपदीयनिर्द्दिश्यमानत्वाभावेन लोपाप्राप्तेः षष्ठीप्रकृतिजन्यप्राथमिकोपस्थितीयविषयताश्रयत्वं हि निर्द्दिश्यमानत्वम्, तच्च णित्वमन्तरा न सम्भवति तच्च इय् शब्दे स्थानिवद्भावं विना न सम्भवतीति चेन्न स्वजन्योपस्थितीयविषयताश्रयत्व स्वजन्योपस्थितीयविषयताश्रयस्थानिकत्वैतदन्यतरसम्बन्धेन षष्ठीप्रकृतिविशिष्टत्वं निर्द्दिश्यमानत्वमिति स्थानिवद्भावं विनैव द्वितीयसम्बन्धसद्भावेनादोषादित्यलम् ॥

(अचः परस्मिन् पूर्वविधौ)

पूर्वसूत्रादादेशपदानुवृत्तिरादेशत्वञ्च विधेयताविशेषाश्रयत्वम्, तद्विधेयतया आकाङ्क्षितं स्थानित्वमच्पदोत्तरषष्ठ्या अर्थः, स्वसमभिव्याहृतपदार्थो यदर्थे साकाङ्क्षस्तद्वाचकत्वं षष्ठ्या इति नियमात्, एतेन गुणानाञ्चपरार्थत्वादसम्बन्धस्समत्वात्स्यादिति न्यायात् षष्ठीस्थान इत्यस्याप्रवृत्तेः स्थानार्थकत्वं षष्ठ्या अनुपपन्नमित्यपास्तम्,

परिभाषांविनैवस्थानार्थकत्वलाभात्, स्थानित्वे च वृत्तित्वसम्बन्धेनाच्पदार्थस्यान्वयस्तस्मिन्नेवस्थानित्वेऽच्त्वस्य धर्म्मिपारतन्त्र्येण स्वप्रतियोगिकपर्य्याप्त्यनुयोगितावच्छेदकीभूतधर्म्मावच्छिन्नानुयोगितानिरूपकपर्य्याप्तिप्रतियोगित्वसम्बन्धेनान्वयः, स्थानितायाश्च निरूपकत्वसम्बन्धेनादेशपदार्थेऽन्वयः, परस्मिन्निति यस्यचभावेनेति सत्सप्तमी तस्या ज्ञाप्यत्वमर्थस्तत्त्वञ्च ज्ञानजन्यज्ञानविषयत्वं, तस्य च स्वरूपसम्बन्धेनादेशपदार्थेऽन्वयस्तावतैव परनिमित्तकत्वमादेशे लब्धम्, स्थानिवदित्यस्य च स्थानिप्रतियोगिकसादृश्यवानित्यर्थः, सचाभेदेनादेशपदार्थान्वयी तथाच अच्निष्ठायाऽच्त्वप्रतियोगिकपर्य्याप्त्यनुयोगितावच्छेदकीभूतधर्म्मावच्छिन्नानुयोगिताकपर्य्याप्तिप्रतियोगिभूता स्थानिता तन्निरूपकोयः परसत्ताविषयकज्ञानजन्यज्ञानविषय आदेशस्स स्वस्थानिसदृशो भवतीत्यर्थः, सादृश्यञ्च कार्य्यवत्त्वतदभावान्यतररूपेण बोध्यम्, अच्त्वस्यान्वयबलादेवाचएवादेशोऽजादेश इति शेखरे उक्तम्, मरुतमाचष्टेमारयतीत्यादौ हि णिज्निमित्तको यष्टिलोपस्तदीयस्थानिताप्रतियोगिकपर्य्याप्त्यनुयोगितावच्छेदकमुक्तञ्चगतं द्वित्वमच्त्वप्रतियोगिकपर्य्याप्त्यनुयोगितावच्छेदकमकारनिष्ठमेकत्वमतो न तत्स्थानितामादाय स्थानिवद्भावप्रवृत्त्या वृद्ध्यभावप्रसंगोऽन्यथा मातृपितृजातस्य मातृजातत्वादिवदज्झलादेशस्याप्यस्याजादेशत्वात्स्थानिवद्भावापत्तिः, यत्तु अच्त्वस्य निरुक्तसम्बन्धेनान्वये प्लायते प्लायसावित्यादौ दीर्घवृद्धिरूपैकादेशयोस्स्थानिवद्भावेनाद्धे उपसर्गस्यायतिपरत्वेनोपसर्गस्यायताविति लत्वमन्त्य सान्तस्योगिदन्तस्याण्सम्बन्ध्यकारेण व्यवधानात्, सर्वनामस्थानपरत्वाभावेन नुमोऽभावश्च भवति तत्रैकादेशस्थानितायाः अज्द्वयपर्य्याप्तत्वेन तत्राच्त्वस्य निरुक्तसम्बन्धाभावात्, स्थानिवद्भावःप्रसक्तिरच्त्वस्य प्रत्येकपर्य्याप्तत्वादिति तच सजातीयानेकवर्णघटितसमुदाये वर्णत्वस्याप्यधर्म्मपर्य्याप्तिरारो-

प्यत इत्यर्थकेन वर्णग्रहणे जातिग्रहणमित्यनेन अच इति समुदाये अचो इति समुदायेच स्थानिभूते अच्त्वपर्य्याप्तेरारोपेण स्थानितायामच्त्वस्य निरुक्तसम्बन्धोपपत्त्या दोषाभावात्, अव्भक्षन्यायेनाप्यच एवादेश इत्यर्थलाभः, अतोलोप इति सूत्रे अय् पय् धातोः क्विपि यलोपे ह्रस्वस्येति तुकि, अतपदित्यादौ तुकं बाधित्वाऽतोलोपवारणाय भाष्यकृत्कृतस्योपदेशग्रहणानुवर्त्तनस्य वैयर्थ्यं, यदि हलादेशोऽपि स्थानिवत्स्यात्तदाऽतपदित्यादौ यलोपस्य स्थानिवद्भावेनैव लोपवारणसम्भवादिति तदेवहलादेशो न स्थानिवदित्यर्थज्ञापकं स्यादित्यागत्येत्यादौ। दोषाभावेनाज्ग्रहणमज्मात्रस्थानिकादेशलाभार्थमितिकेचित्तन्न शोधातोः क्तप्रत्यये आत्वे शातस्योक्तवद्देन समासे शातोत् तमाचष्टे णिचि लुङि टिलोपचङ्द्वित्वेषु णौचङीति ह्रस्वे ऽशीशतदिति भवति तत्र ह्रस्वनिष्पन्नाकारस्य क्तप्रत्यये लोपवारणायोपदेशग्रहणस्य चारितार्थ्यात्, नच बहिरङ्गत्वेनासिद्धत्वं नाजानन्तर्य्य इति निषेधात् यदि च गोऽभवदित्यादावोदिति प्रगृह्यत्ववारणायोदित्यत्र प्रतिपदोक्तपरिभाषाश्रयणपरभाष्यप्रामाण्याद्गुणग्रहणेऽपि प्रतिपदोक्तपरिभाषा प्रवर्त्तत इत्युच्यते तदा तयैवात्रापि लोपवारणसम्भवेनोपदेशग्रहणस्य वैयर्थ्येनाप्युक्तार्थलाभः। हन् धातोः क्विबन्ताद्भ्रामि हभ्यामित्यादावनैमित्तिक नलोपे क्विप्निमित्तकाल्लोपवारणायोपदेशग्रहणस्य चारितार्थ्यं, न लोपः सुप्विति सूत्रे कृतितुग्ग्रहणवैयर्थ्यापत्त्याऽलोपाभावस्तु न युक्तः, जुन् धातोः क्विपि जुभ्यामित्यादौ तुगभावाय चारितार्थ्यसम्भवात् नोपदेशग्रहणं ज्ञापकमिति केचित्तन्न, परनिमित्त इत्यस्य परस्मिन् सत्ये व य आदेश इत्यर्थस्यैव सिद्धान्तितत्वेन हभ्यामित्यत्रापि नलोपस्य परनिमित्तकत्वात् स्थानिवत्त्वेनैव लोपवारणे सम्भवात् जुन् धातोः कस्यचित्सम्मतत्वेऽपि सर्वसम्मतत्वाभावेन कृतितुग्ग्रहणसामर्थ्यं नापि लोपवारणसम्भवेनो-

पदेशग्रहणस्योक्तार्थज्ञापकत्वसम्भवात्, भवितेत्यादावासोलोपादेरपिस्थानिवद्भावेनेटोगुणाप्राप्त्या दीधीवेवीटामितिसूत्रस्येड्ग्रहणसामर्थ्याद्वलादेशो न स्थानिवद्दिति ज्ञाप्यत इति तु न युक्तम्, आतिषमित्यादाविटोगुणाभावाय चारितार्थ्यसम्भवेन ज्ञापकत्वासम्भवात्, न च यातेर्यङन्ताद्वुरचि अतोलोपे यलोपे यायावर इत्यत्र स्थानिवद्भावेनाकारमादायातोलोप इटिचेत्यनेनातोलोपे कर्त्तव्ये वरेलोपेनस्थानिवद्दित्यर्थेन नपदान्तसूत्रेण निषेधादातोलोपो न भवति, वलादेशस्यापि स्थानिवद्भावे यलोपस्यापि स्थानिवद्भावेन तेन व्यवधानादातोलोपाभावे सिद्धे वरेग्रहणं व्यर्थं सद्वलादेशो न स्थानिवद्दित्यर्थज्ञापकं स्यादिति वाच्यम्, पिस् धातोरिगुपधलक्षणे के तदन्तादाचारक्विबन्तात्कर्त्तरि क्विपि अतोलोपे आचारक्विबन्तात् स्थेशभासेतिसूत्रेण वरचि लघूपधगुणप्रतिबन्धार्थं प्राप्तस्याल्लोपस्यानिवद्भावस्यनिषेधाय वरच्निमित्तक विधौ लोपो नस्थानिवद्दित्यर्थं बोधयतो वरेग्रहणस्यचारितार्थ्यसम्भवात्, यदि च हलन्तेभ्य आचारक्विपोऽनभिधानं ह्रस्वनद्याप इतिसूत्रभाष्यान्मन्यते तदोक्तप्रयोगासम्भवादचरितार्थं सज्ज्ञापकमेवेति चेदत्रोच्यते यातेर्य्यङन्ताद्वुचि अलोपयलोपयोर्यङवयवातोलोपस्य स्थानिवद्भावेप्यातोलोपइटि चेत्यस्येदानीं यलोपस्यापिस्थानिवद्भावेनाप्रवृत्तौ नपुंसकह्रस्वत्वे याय शब्दादाचारक्विबन्ताद्यश्च यङ् इति वरचि तन्निमित्तकाल्लोपे कर्त्तव्ये यङवयवाकारलोपस्यानिवद्भावप्रतिषेधार्थमेव वरे ग्रहणमस्तु, न च तत्र ह्रस्वनिष्पन्नाकारस्य स्थानिभूतादचः पूर्वत्वेन दृष्टत्वाभावादेव स्थानिवद्भावाप्राप्तौ न तदर्थं वरे ग्रहणमिति वाच्यम्, तादृश यायशब्दस्य य शब्देनसमासे यायय शब्दादाचारक्विबन्तात् कर्त्तरिक्विप्यल्लोपयलोपयोराचारक्विबन्ताद्वुरचि तन्निमित्तकाल्लोपे कर्त्तव्ये यशब्दावयवाकारलोपस्यानिवद्भावप्रतिषेधाय चारितार्थ्यात्, किञ्च

इत्यत्र सतुक्कस्थानिकशादेशस्य स्थानिवद्भावेन लघूपधत्वाभावेन गुणाप्राप्तेर्वहोङित्वं व्यर्थं सद्धलादेशेनस्थानिवदित्यत्र ज्ञापकमिति तु न वाच्यम्, विश्नशब्दादाचारक्विबन्तात्लट आत्मने पदार्थं ङित्वस्यावश्यकत्वात्, नच केदाराद्यञित्यतो यञोऽनुवृत्त्यैव सिद्धे ब्राह्मणमाणववाडवेति सूत्रस्ययत्ग्रहणमन्यतोऽपि विधानार्थं तेन पृष्ठादुपसंख्यानमिति लब्धमिति भाष्य उक्तन्तदसंगतं स्याद्यचन्तब्राह्मण्यशब्दादाचारक्विबन्ताल्लटः परस्मैपदं यञन्तात्त्वतस्मात् स्वरितञित इत्यात्मनेपदमिति फलभेदादतः प्रातिपदिकगतेत्पदघटितधर्म्मनिमित्तककार्य्यं तत्प्रकृतिकाचारक्विबन्तप्रकृतिकलटोनभवतीति ज्ञापनात् नात्मनेपदार्थं ङित्वमिति वाच्यम् । यञन्तादाचारक्विपोऽभावकल्पनेनापि फलभेदवारणसम्भवात्, तादृशञित्वप्रयुक्तात्मनेपदस्यैवाभावकल्पनाच्च यजतेः क्विपि सम्प्रसारणे आचारक्विबन्तात्वङिगुणाभावाय तस्य चारितार्थ्याच्च युष्माकमित्यादावन्त्यलोपपक्षे भाविसुटोनिवृत्तये कृतस्य साम आकमित्यत्र ससुट्कनिर्द्देशस्य पञ्चमीसमासमाश्रित्य वलोपस्य स्थानिवद्भावेन सुटोवारणसम्भवाद्धलादेशास्थानिवत्त्वज्ञापकत्वमित्यप्ययुक्तम्, अवश्याश्रयणीयपञ्चमीसमासानित्यत्वज्ञापनेनापि तस्य सार्थक्यसम्भवात्, धिनोतीत्यत्र प्रक्रियालाघवार्थं वस्य लोपविधानेनापि वलोपस्य स्थानिवद्भावेन गुणाभावोपपत्त्या धिन्विकृण्व्योरिति सूत्रेणाकारविधानं हलादेशास्थानिवत्त्वज्ञापकम्, नच धिनोति पचेति सततं यत्राभिधीयते साधिनोतिपचा तत्सम्बोधने धिनोतिपचे इत्यत्र वलोपस्य स्थानिवद्भावेन नकारवकारात्मक संयोगे परे गुरुसंज्ञायां धीकारस्य गुरोरिति प्लुतस्याद्वलोपे तु नेति फलभेद इति वाच्यम्, संयोगसंज्ञायाः पूर्वपरोभयसम्बन्धित्वेन पूर्वमात्रोद्देश्यकविधित्वाभावेन स्थानिवत्त्वाप्राप्तेः नच वलोपो न परनिमित्त इति स्थानिवत्त्वाप्रवृत्तिरिति वाच्यम्, परस्मिन्नस्त्येव य आदेश इत्यर्थेन वश्चेत्यत्रेवात्रापि प्रवृत्तेरित्यपि न

युक्तम्, उप्रत्ययसन्नियोगशिष्टत्वेनोप्रत्ययाभावे वलोपाभावस्तत्सत्त्वे वलोपसत्त्वमित्यन्वयव्यतिरेकयोर्लाभेन वलोपस्योप्रत्ययनिमित्तकत्वेन हलादेशो न स्थानिवदिति ज्ञापितेऽपि वलोपे न धातुलोप इति गुणनिषेधेनाकारविधानस्य चारितार्थ्याभावेन ज्ञापकत्वासम्भवात्, तस्य प्रत्याख्यानमिति चेदस्तु तर्हि ज्ञापकत्वमेवेति बोध्यम्, यून इत्यादौ पर यणः पूर्वं सम्प्रसारणेऽपि तस्य स्थानिवद्भावेन सम्प्रसारणपरत्वाभावेन न सम्प्रसारणइत्यस्याप्रवृत्त्या वैयर्थ्येन तदपि हलादेशो न स्थानिवदित्यत्र ज्ञापकन्द्रष्टव्यम् । किञ्च भवितेत्यादौ टिलोपस्याऽझलादेशत्वेऽप्यजादेशत्वेन स्थानिवत्त्वादिटो गुणाभावोपपत्तौ दीर्घो वेवीटामित्यत्रत्येड्ग्रहणेनाझलादेशो न स्थानिवदिति ज्ञाप्यते तत्फलितमेवाच एवादेशोऽजादेश इति यद्दिवातिषमित्यादाविटो गुणनिषेधार्थमिड्ग्रहणंप्रत्याख्यातञ्च न ज्ञापकमित्युच्यते तर्हि लोलुवः पोपुव इत्यादावच्प्रत्ययनिमित्तको यङ्लुक् स्थानिवत्स्यादिति गुणाप्राप्त्या व्यर्थं नधात्विति सूत्रं ज्ञापकमुक्तार्थेऽवगन्तव्यम् । नच तत्सूत्रस्य प्रत्याख्यानाच्च ज्ञापकत्वसम्भव इति वाच्यम्, यस्य हल इत्यत्र योगविभागाश्रयणेनाकारलोपं सम्भाव्य तस्य स्थानिवद्भावेन गुणवारणप्रयासस्य सूत्रप्रत्याख्यानाय भाष्यकृत्कृतस्यैवोक्तार्थज्ञापकत्वादन्यथाऽझलादेशस्यापि स्थानिवद्भावेन प्रत्याख्यानसम्भवादुक्तप्रयासवैयर्थ्यादेवं नाग्लोपीति सूत्रेऽग्लोपिग्रहणमप्युक्तार्थे ज्ञापकन्तद्धि अग्मात्रलोपे स्थानिवद्भावेनैव ह्रस्ववारणसम्भवात्, राजानमाख्यदराराजदित्यत्र णिन्निमित्तकान्लोपस्याज्मात्रस्थानिकादेशत्वाभावेन स्थानिवद्भावाप्रवृत्तौ प्राप्तस्योपधाह्रस्वस्य प्रतिषेधार्थम्, अझलादेशस्यापि स्थानिवत्त्वे तु तद्वैयर्थ्यं स्पष्टमेव नच चङ्परनिर्ह्रासेति ह्रस्वप्रतिबन्धकस्थानिवत्त्वनिषेधान्नैतज्ज्ञापकमिति वाच्यम् । अवीवददित्यादौ ण्यन्ताण्णिचि नाग्लोपीति निषेधप्रतिप्रसवाय णिचि णेर्लोपे ह्रस्व इत्येतदर्थकेन णौ णिच्युपसंख्यानमिति वार्त्ति-

केनैव ह्रस्वसिद्धौ वङ्परनिर्ह्रास इत्यस्यानावश्यकत्वात्, नच इट्धातोः क्विपि इट् तस्मात् शब्देन समास इटन् तेन मनश्शब्दस्य समासे मनइटन् ततश्चाचारणिजन्तात्लुङि टिलोपे ह्रस्वस्य द्वित्वापेक्षया प्राबल्येऽपि इदानीमज्झलादेशस्यापि स्थानिवद्भावेनोपधात्वाभावेन ह्रस्वाप्राप्तौ यथेष्टचामधातुष्विति वचनाद्विटोद्वित्वे हलादिशेषे दीर्घ ईकारस्यानुरूपस्थानिनः पूर्वत्वेन दृष्टत्वाभावेन तस्य ह्रस्वे कर्त्तव्ये स्थानिवत्त्वाप्राप्त्या प्राप्तस्य ह्रस्वस्य वारणार्थमेवं गांददातीति गोदस्तस्माण्णिचि टिलोपे लुङि चङि द्वित्वेऽजुगोददित्यादौ उपधाह्रस्व वारणार्थञ्चाग्लोपिग्रहणं स्थानिवद्भावस्य तु न प्राप्तिः पदान्तविधौ निषेधादित्यज्झलादेशेन स्थानिवदित्यत्र न ज्ञापकमिति वाच्यम्, यतः ठाज्जादावूर्द्ध्वं द्वितीयादच इत्यत्राज्ग्रहणमुक्तार्थज्ञापकन्तद्धि षडङ्गुलिदत्तशब्दाट्ठकि इकादेशेऽनेनङ्गुलिदत्तशब्दस्यैव द्वितीयादचः परस्य लोपार्थं तेनाकारस्य यस्येति लोपे तस्य स्थानिवद्भावेन भत्वाभावाज्जस्त्वमज्झलादेशस्यापि स्थानिवत्वे तु अज्ग्रहणाभावे द्वितीयाद्धलः परस्याङ्गुलिदत्तस्य लोपेऽपि तस्य स्थानिवत्वेन भत्वाभावेन जस्त्वस्यैव प्रवृत्तेः, अज्झलादेशस्यापि स्थानिवत्त्वेऽज्ग्रहणसत्वेङ्गुलिदत्तस्य लोपे तस्य स्थानिवत्त्वेन यस्येतिलोपाप्राप्त्या गुणे षडिक इति अज्ग्रहणाभावे अङ्गुलिदत्तस्य लोपे षडिक इति फलभेदात् षडुमापतिदत्तशब्दाट्ठकि अज्ग्रहणे मादेर्लोपे तस्यापि स्थानिवद्भावेनोर्गुणाभावेन षडुकस्तदभावे उकारादेर्लोपे षडिक इति फलभेदाच्च नोक्तार्थज्ञापकमिति चेन्मास्त्वन्वयवैचित्र्याद्वाच एवादेश इत्यर्थस्य साधितत्वात् ।

ननु अच एवादेश इत्यस्य महतमाचष्टे मारयतीत्यादौ मरुच्छब्दाण्णिचि टेरतोलोपस्य वृद्ध्यभावाय प्राप्तस्थानिवद्भावस्याभावः, फलं लोपस्याज्मात्रस्थानिकत्वाभावादिति चेन्न, नाग्लोपीति सूत्रस्याग्ति प्रत्याहारग्रहणस्य वृद्धेर्लोपो बलीयान् इत्यर्थज्ञापकत्वकथनपरभाष्यादि-

इदुदुपधेभ्यो णिचोऽनभिधानेनोक्तरूपस्यैवाभात्, इकारान्तादुकारान्ताच्च
णिचिपरत्वाद्वृद्धौ सत्यां टिलोपे ऐकारौकारयोरेव लोपेनाग्लोपाभावाच्च
तत्रनिषेधप्रवृत्तेरृकारान्तादृकारान्तात् लृकारान्ताण्णिचि वृद्धौ अकार-
लोप एव तर्ह्यनेनापीत्येवव्यक्तव्ये अगिति प्रत्याहारग्रहणं ज्ञापकं वृद्धेर्लो-
पोबलीयानित्यत्र हरिन्मरुत्कब्दाण्णिचि तु वृद्धिगुणयोरप्राप्त्या
टिलोपेऽग्लोपित्वान्निषेधोभवति प्रत्याहारग्रहणे, तदग्रहणे तु निषेधो-
नस्यादिति प्रत्याहारग्रहणस्यावश्यकत्वेन ज्ञापकत्वानापत्तिः, नचोक्त-
भाष्यादिदुदुपधप्रातिपदिकप्रकृतिकाण्णिजन्ताल्लुङ्नेत्येव कल्प्यतां तिप्य-
नभिधाने नमानमिति वाच्यम्, लाघवेन तादृशप्रातिपदिकाण्णिज्नेत्य-
स्यैव कल्पनीयत्वात्, नच स्रग्विणमाचष्टे स्रजयतीति भाष्यविरोधस्त-
स्येदुपधादेव णिचोविधानादिति वाच्यम्, विनो लुक्यङ्गवृत्तेपुनरङ्ग-
वृत्ताविति परिभाषया वृद्ध्यभावेन लुङि ह्रस्वतदभावयोर्विशेषाभावेन
ततोणिच्यपि फलभेदाभावेन तद्भिन्नेदुपधादेवणिचोऽनभिधानकल्पना
दिति चेन्न सरोभवद्यादिप्रकृतिकाण्णिचि टिलोपे सारयति भावयतीत्ये-
तदुपलक्षणात् ननु वृत्रहणमाचष्ट वृत्रहयतीति भाष्यप्रयोगे वृद्धेरकर-
णेन प्रातिपदिकप्रकृतिकाण्णिज्निमित्तकोपधावृद्धिर्नेतिकल्पनात्तत्र वृद्ध्य-
भाव एव न च वृत्रहयतीतिप्रयोगस्य वृद्धौ सत्यां टिलोप इति पक्षे
पूर्वं वृद्धौ टिलोपे लक्ष्येलक्षणन्यायेन पुनर्वृद्धिप्राप्तेर्व्याप्यतयोक्तार्थज्ञाप-
कत्वासम्भव इति वाच्यम्, स्रजयतीति भाष्यादेव तत्कल्पनस्यावश्य-
कत्वादत एव दूरं दवयति युवानमल्पम्वा कनयति ह्रस्वं ह्रसयती-
त्यादौ न वृद्धिः ननु संज्ञापूर्वकोविधिरनित्य इति परिभाषयावृद्धेर-
नित्यत्वेन तेषु न वृद्धिरिति नोक्तार्थकल्पनावश्यकतेति चेन्न तत्परि-
भाषयापि तत्र न वृद्धिरत्र न वृद्धिरित्यननुगतानित्यत्वकल्पनापेक्षया
लाघवेनोक्तानुगतानित्यत्वकल्पनाया एव न्याय्यत्वात्, नच पटुमाचष्टे पट-
यतीत्यादावुपधावृद्ध्यभावस्योक्तकल्पनयैव सिद्धौ प्रकृतसूत्रोदाहरणत्व-

कथनपरभाष्यासङ्गतिरिति वाच्यम्, उपायस्योपायान्तरादूषकत्वादिति चेदत्रोच्यते—ऋच्छतीति ऋट् ततः पूर्वे बहुच्प्रत्यये बहुऋट् ऋत्यक इति प्रकृतिभावस्ततो णिचि टेर्लोपेऽवशिष्टस्य बहोर्णिन्निमित्तकवृद्धौ बाहयतीति भवत्यज्झलादेशस्य स्थानिवत्त्वे तु वृद्ध्यभावापत्तिरतस्तद्वारणायाच एवादेश इत्यर्थ इति यत्तु नेत्यः चेक्रियः लोलुव इत्यादीन्यपि फलान्यन्यथाऽच्प्रत्ययनिमित्तकयङ्लुकोऽज्झलादेशस्यापि स्थानिवद्भावापत्त्या यणियङुवङामभावापत्तेरिति तन्न नधातुलोप इत्यस्य प्रत्याख्यानायातोलोपः यस्य च, हलः इति योगं विभज्य द्वितीययोगेऽत इत्यनुवर्त्य लुग्बाधकं यङोऽकारस्य लोपं विधाय तस्य स्थानिवद्भावेन गुणस्य वारणं भाष्यकृता कृतमिति न तत्राज्झलादेशोऽप्यज्मात्रस्थानिक एव तस्य स्थानिवद्भावेऽपि यणादीनां प्रवृत्तौ बाधकाभावात्, केचित्तु भीधातोर्घञर्थे कप्रत्यये इयङि भियस्तमततीति भियात् तमाचष्टे णिचि क्विपि णिलोपटिलोपयलोपेषु अवशिष्टस्य भीत्यस्य प्रत्ययलक्षणेन णिच्परे वृद्धौ भैरिति भवति अज्झलादेशस्य स्थानिवत्त्वे तु वृद्धिर्न स्यादिति फलं न च बहिर्भूतक्विब्निमित्तकयलोपस्य बहिरङ्गत्वासिद्ध्या न वृद्धिरिति वाच्यम्, नाजानन्तर्य्ये इति निषेधात्, निर्दिश्यमानेऽच्येव णिचोऽन्वयात्, अजादेश इत्यस्याच्त्वप्रतियोगिकेत्याद्यर्थकरणात् पटयति निगाल्यत इत्यादौ टिलोपणिलोपादेः स्थानिवद्भावोऽच्त्वावच्छिन्नस्थानितानिरूपकादेश इत्यर्थे त्वत्र स्थानिवद्भावो न स्यादत्रत्यस्थानितायाष्टित्वणित्वावच्छिन्नत्वेनाच्त्वावच्छिन्नत्वाभावात्, ननु स्थानिवदित्यस्य कोऽर्थः स्थानिनि सति यत्कार्य्यं भवति तदादेशेऽपि भवतीत्यर्थो वा स्थानिनि यन्नभवति तदादेशेऽपि न भवतीत्यर्थो वा उभयम्वा नाद्यः पटयतीत्यादावेतस्याप्रवृत्त्यापत्त्या स्वतः प्राप्ताया वृद्धेर्दुर्वारत्वात् न द्वितीयः स्थानिन्युकारे सत्यभवन्त्या वृद्धेरादेशेऽप्यभावेन पटयतीत्यस्य सिद्धावपि निगाल्यत इत्यसिद्ध्यापत्तेरादेशेऽनेन लत्वस्य प्रवर्त्तयितुमशक्य-

त्वात् । नापि तृतीय एकमेकमंशमादायोभयत्र निर्वाहेऽपि देवयतेः क्विपि णिलोपे छ्वोर्विधिमूठं प्रति स्थानिवत्त्वनिषेधादूठि अयादेशे सिद्धस्य द्यूरित्यस्यासिद्ध्यापत्तेः स्थानिनि णिचि सति ऊठोऽभावेनायादेशो न भवतीति स्थानिनि सत्यभवतोऽयादेशस्य स्थानिवद्भावेन णिलोपेऽभावापत्तेः न च स्थानिधर्म्ममादेश आरोप्य यत्कार्य्यं प्राप्नोति तद्भवति यत्र प्राप्नोति तत्र भवतीत्यर्थः, पटयतीत्यत्र लोपरूपादेशे उत्वारोपे वृद्ध्यप्राप्तेः निगाल्यत इत्यत्र स्थानिगतणित्वस्यादेशे लोप आरोपे वृद्धेः प्राप्तेः द्यूरित्यत्र णिलोपे णित्वारोपेऽपि ऊकारनिमित्तकायादेशस्य प्रतिबन्धकाभावेन सिद्धेश्च न दोष इति वाच्यम् । एषोयन्हसहतीति वदेषोगमयतीति भवति तन्नैतत्तदोरिति लोपस्य पदचरमावयवत्वाभावेन निषेधाप्राप्त्या गमादेशस्य स्थानिवद्भावेन हल्परत्वाभावेन लोपाप्राप्त्या हसिचेत्युत्वे गुणे च रूपासिद्धिर्भवति सम्प्रति गमादेशे स्थानिगतेत्वस्यारोपेऽपि गकारे हल्त्वानपायेन सुलोपापत्त्या एषगमयतीत्यापत्तेरेषोगमयतीत्यनापत्तेश्च, इयायेत्यत्र स्थानिवद्भावेनायादेशस्येत्वेनासवर्णाच्परत्वाभावेनेयङोऽप्राप्त्याऽभ्यासस्यासवर्णे इत्यस्याभ्यासकार्य्येत्याद्यर्थज्ञापकत्वं परिभाषेन्दुशेखरे वार्णपरिभाषायामुक्तन्तद्विरोधोऽपि स्यात्, आयादेशे स्थानिवत्त्वेनेत्वेप्याकारे असवर्णाच्त्वाहानिरत्रोच्यते-स्थानी न निवृत्त आदेशो न जात इति-बुद्धौ यत्प्राप्तन्तद्भवति यत्रप्राप्तस्तत्र भवतीत्यर्थस्तेन सर्वेष्टसिद्धिरादेशावस्थायां द्यूरित्यादावुकारस्य सत्वेन णिलोपस्थाने णिरस्त्येवेति बुद्धावप्ययादेशप्राप्तेः गमादेशो न जात इणेवास्तीति बुद्धौ लोपाप्राप्तेश्चेति स्थानिभूतादचः पूर्वस्यैवग्रहणन्त्वादेशान्निमित्ताद्वा पूर्वस्य वैयाकरणोऽयादेशापत्तेरिति मनोरमायामेवोक्तम्, ननु तन्नाशे तत्पूर्वत्वनाशस्याप्यनुभवसिद्धत्वं नहि वृक्षनाशे वृक्षपूर्वोयमिति कश्चिज्जानाति ततश्च स्थानिन आदेशेन नाशे स्थानिपूर्वत्वस्याप्यभावात् कथमुच्यते

स्थानिभूतादचः पूर्वस्येति चेन्न स्थानिभूताचः पूर्वत्वमुपलक्षणन्नतु विशेषणमेतदेवोक्तं स्थानिभूतादचः पूर्वत्वेनदृष्टस्येत्यनेन । तत्पूर्वत्वप्रकारकातीतकालिकश्रावणविषयस्यत्यर्थस्तत्पूर्वत्वसमानाधिकरणधर्म्मवत इत्यर्थोवा । तेनपूर्वत्वाभावेऽपि तत्समानाधिकरणधर्म्मस्य सत्वेनादोषः परस्मिन्नित्यादेर्थविशेषणमिति । ननु श्रुतत्वादचोविशेषणं पटयतीत्यत्र स्थानिभूतस्येकारस्य परनिमित्तकत्वाभावेन स्थानिवद्भावाप्राप्त्यावृद्ध्यापत्तेः परस्मिन्निति यस्य च भावेन भावलक्षणमित्यनेन सप्तमी परस्य सत्तारूपक्रियया आदेशस्य सत्तारूपाक्रिया लक्ष्यते इति परशब्दात्सप्तमी परस्य सत्वे एवादेशस्य स्थिति रितिप्रतीतेरादेशंप्रति नियतपूर्ववृत्तित्वरूपं निमित्तत्वं लब्धमिति परनिमित्तको य आदेश इत्यर्थलाभः यद्यप्युपपदविभक्तेरिति न्यायादधिकरणसप्तम्या एवौचित्येन पराव्यवहितपूर्वो य आदेश इत्येवार्थो युक्तस्तथापि लक्ष्यानुरोधात्सतीत्यध्याहारेण यस्य च भावेत्यनेनैवात्रसप्तमी पाणिन्यभिप्रेताऽन्यथा हरिणाकृतमित्यादौ कृतरूपपराव्यवहितपूर्वानादेशस्योऽपि स्थानिवत्स्यादितीकारस्य यण्स्यात्सत्सप्तम्यां तु न दोषो नादेशस्य परनिमित्तकत्वाभावात्, परस्मिन्नित्यस्याभावेऽप्ययंदोषः, युवतिर्जायास्य युवजानिरित्यादावपि आकारस्यनिङादेशोऽपि विसर्गाव्यवहितपूर्वस्वात्स्थानिवत्स्यादिति यलोपोनस्यात् यलोपे निषेधस्तु न स्यात् स्वरदीर्घयलोपेषु लोपरूपाजादेशस्यैव स्थानिवत्वनिषेधात्, परस्मिन्नित्यस्याभावेऽप्ययं दोषः,नचोपपदविभक्तेरिति न्यायादधिकरणसप्तमी श्रुतत्वाच्चाचोविशेषणं ततश्च पराव्यवहितपूर्वोयोच् तत्स्थानिको य आदेश इत्येवार्थो न्याय्यः युवजानिरित्यत्र निङादेशकाल आकारो न पराव्यवहितपूर्वो विभक्त्युत्पत्तेः प्रागेव निङादेशप्रवृत्तेः, हरिणाकृतमित्यादौ च पदसंस्कारपक्षे हरिणेति पदं संस्कृत्य कृतमित्यनेन सम्बन्धे नाकारः पराव्यवहितपूर्व इति न दोष इति वाच्यम्, वाक्यसंस्कारपक्षे

हरिणीत्यादौ पदसंस्कारपक्षे युवजानिरित्यादौ च दोषतादवस्थ्यात् पित्तः जुहुत इत्यादौ लुकः श्लोश्च स्थानिवद्भावापत्त्या लघूपधगुणापत्तेः जायाया जानिरित्यादेशेन युवजानिरित्यादौ न दोष इति तु न वाच्यम्, जायामाचष्टे णिचि टिलोपे क्विपि णिलोपयलोपयोर्जेति निष्पन्नस्यैकदेशविकृतन्यायेन जायाशब्दत्वात् युवतिर्जेति बहुव्रीहौ जान्यादेशे युवजानिर्निङादेशे युवज्निरिति फलभेदात् णिलोपस्य स्थानिवद्भावेन जायान्तोत्तरपदकबहुव्रीहित्वाभावान्नेष्यते, तत्र निङादेश इति चेत्तस्य जाशब्दस्येशब्देन समासे जे शब्दस्य पूर्वान्तवद्भावेन जाया शब्दत्वात्तस्य स्थानिभूतादचः पूर्वत्वाभावेन स्थानिवत्त्वाभावात्, तत्र बहुव्रीहौ फलभेदोबोध्यः, निगागमोऽन्तस्य लोप इत्यर्थकजायाया निङ् लोपश्चेति न्यासे लाघवाभावः, ङित्वस्य आचारक्विबन्तादात्मने पदार्थत्वाच्च लोपोव्योर्निङ्वलोरिति न्यासेन विशिष्य निङि परे यलोपविधानसामर्थ्यात्स्थानिवत्त्वाभावेन युवजानिसिद्धिरित्यपि लाघवाभावादेव निरस्तम्, द्वौ द्वौ पादौ ददातीति विग्रहे वुन्प्रत्यययोऽकारलोपश्च पादशतस्येत्यनेन भवति ततश्च पदादेशोऽपरनिमित्तकोऽप्यकारलोपःस्थानिवत्स्यादिति पदादेशो न स्यात्पादन्तत्वाभावादित्यपि फलम्, नचैवं यस्येति चेति सिद्धे लोपविधानसामर्थ्यान्न स्थानिवदिति न दोष इति वाच्यम्, पादशब्दस्येशब्देन समासे पूर्वान्तवत्त्वेन पादशब्दत्वात्तत्रैकारस्य वुन्प्रत्ययसन्नियोगेन लोपार्थत्तस्यावश्यकत्वात् व्याघ्रस्येव पादावस्यव्याघ्रपात् तस्य व्याघ्रपद इत्यत्र पादस्य लोप इत्यकारलोपस्य स्थानिवद्भावे पादः पदिति पदादेशो नस्यात्पादन्तत्वाभावादितीदमपि फलम्, नचैवं लोपं विहाय पादादेशविधानेनैवोक्तरूपसिद्धिरिति वाच्यम्, पादमाचष्टे णिचि क्विपि णिलोपटिलोपयोः पात् तस्य व्याघ्रादिभिस्समासे समासान्तलोपे व्याघ्रपा इति पादादेशे व्याघ्रपादिति फलभेदात्, णिलोपस्य स्थानिवत्त्वन्तु न क्वौ

कुप्तमिति तन्निषेधात्, अनेन पादादेशे प्रतिपदोक्तत्वादेतदन्तस्यैव-
पदादेशे पादमाचष्टे णिचि क्विपि णिलोपाल्लोपटिलोपैर्निष्पन्नपाच्छ-
ब्दस्य शसि पदादेशानापत्तेश्चात एव पादः पदिति सूत्रारम्भसाम-
र्थ्याच्च स्थानिवदित्यपास्तम्। नचापरनिमित्तकस्यापि स्थानिवत्त्वे
लोपः शयां प्रतिषेधो वक्तव्य इति वार्तिकस्य वैयर्थ्येन तत्सामर्थ्यादपरनि-
मित्तको न स्थानिवदिति ज्ञापनाच्च दोष इति वाच्यम्, सूत्रप्रणयन-
समये वार्त्तिकस्यासत्त्वेन तत्सामर्थ्येन ज्ञापनासम्भवादित्यलम्॥ पूर्व्ववि-
धावित्यस्याभावे नैधेय इतिदूषणं शेखरे एव दत्तम् तत्र निपूर्व्वाद्धा धातोः
कि प्रत्यय आलोपः परनिमित्तकस्तस्यापि स्थानिवद्भावे अच्त्वव्यपदेशेन
तद्धिरुद्धाच्त्वनिमित्तकोढक् न स्यात् तदुक्तौ तु पूर्वस्य कार्य्याभा-
वेनादोषः, पूर्वस्यैव विधौ कर्त्तव्य इति तस्यार्थस्तेनारतुरित्यादौ ऋऋ
ऋतुमिति स्थिते उरदत्वे उत्तरखण्डे ऋच्छत्यृतामिति गुणे अ-अर-
ऋतुमिति स्थिते सवर्णदीर्घे आरतुरिति भवति, तत्र सवर्णदीर्घे कर्त्तव्ये
गुणो न स्थानिवत्, दीर्घस्य पूर्वपरोभयसम्बन्धित्वात्, अत्रेदं चिन्त्यते
ऋच्छत्यृतामितिसूत्रे ऋकारप्रश्लेषोऽपि मास्तु पूर्वस्मिन्नेवेत्यर्थोऽपि
मास्तु आरतुरित्यत्र द्विर्वचनेऽचीति पूर्वं द्वित्वे ऋऋ अतुसिति स्थिते
आन्तरङ्गत्वाद्दीर्घात्पूर्वमुरदत्वे हलादिः शेषे अत आदेरिति दीर्घे यणि
आरतुरिति सिद्ध्यति, नच परत्वात्पूर्वोपस्थितनिमित्तकत्वेनान्तरङ्गत्वा-
च्च पूर्वं गुणे लक्ष्येलक्षणन्यायेन पुनर्दीर्घाप्रवृत्तेररतुरितिस्यादिति वाच्यम्।
ऋऋ अतुसिति स्थिते दीर्घगुणयणादेशानां प्राप्तौ पूर्वोपस्थितनिमित्त-
कत्वेन यणपेक्षयाऽनयोरन्तरङ्गत्वादनयोश्चाततुरानृजे इत्यादिसफललक्ष्य-
प्राप्तस्य परत्वगुणान्यतरस्य पूर्वान्तवद्भावेनाभ्यासत्वात्, कृतेऽन्यतरस्मिन्
चरितार्थेन दीर्घेण तक्रन्यायेनबाधात् पूर्वं दीर्घे पुनर्गुणाप्रवृत्त्या यणि ह-
पविद्दुरिति चेन्न, अर्त्तेर्लिटि क्वसौ ऋवसिति स्थिते कृतद्वित्वेकाच्त्वा-
भावेन वस्वेकाजित्यस्याप्रवृत्तौ द्वित्वे ऋऋ वसिति स्थिते उरदत्वे हला-

द्धिः शेषे अचक्षसिति स्थिते गुणं बाधित्वाऽत आदेरिति दीर्घे पुनर्गुणाप्राप्तौ चाक्षानित्यापत्तेरिष्यते तु चक्षसिति स्थिते उरदत्वे अतआदेरिति दीर्घे चच्छत्यृनामित्यत्र चकारप्रश्लेषेण गुणे सवर्णदीर्घे कृतद्वित्वैकाच्त्वेन वस्वेकाजितीटि आदिवानिति तस्यासिद्धापत्तेः । नचाभ्यासकार्य्यं उत्तरखण्डाजादेशस्य स्थानिवत्त्वनिषेधान्नदोषो दीर्घस्याभ्यास तदुत्तरखण्डोभयकार्य्यत्वेऽप्यभ्यासकार्य्यत्वाक्षतेरिति वाच्यम् । अभ्यासत्वावच्छिन्नोद्देश्यताककार्य्य एव तन्निषेधाभ्युपगमस्य धर्म्मिग्राहकमानेन सत्वादत एव विव्यतुरित्यादावभ्यासावयवेकारस्योपधायाश्चेत्यनेन दीर्घवारणायोत्तरखण्डाजादेशस्यानिवद्भावस्य नानेन निषेधः, नचेट्किट्कटीत्यत्र प्रश्लिष्टस्य ह्रस्वेकारस्य धातोर्लिटि अतुसि द्वित्वे इ-इ अतुसिति स्थिते एरनेकाच इत्यनेनाङ्गत्वाद्दीर्घं बाधित्वोत्तरखण्डस्य यणि इयतुरित्यादावुत्तरखण्डस्य यणः स्थानिवत्त्वेनाभ्यासेकारस्य यणोभावाय स्थानिवत्त्वनिषेधस्यानुपपत्त्याऽभ्यासत्वावच्छिन्नोद्देश्यताककार्य्यविषयकत्वस्य वक्तुमशक्यत्वमिति वाच्यम् । तत्र स्थानिवत्त्वेऽपि सवर्णाजव्यवहितपूर्वत्वस्यैव सत्वेनेकारयणोरन्यतरोद्देश्यतावच्छेदकेऽकः सवर्णे इत्यनेन सवर्णाजव्यवहितपूर्वभिन्नत्वस्यापि निवेशेन सवर्णाजव्यवहितपूर्वभिन्नस्येकारयणोरन्यतरस्येकारयणोरन्यस्य प्रवृत्त्यभावात् नच सवर्णदीर्घाभावार्थमेव स्थानिवत्त्वनिषेध आवश्यक इति वाच्यम्, पूर्वस्यैवविधावित्यर्थेनैव स्थानिवत्त्वाभावसिद्धेः नच विव्यतुरित्यादौ दीर्घेऽपि ह्रस्वइति ह्रस्वत्वेनादोष इति वाच्यम्, दीर्घस्यासिद्धत्वादाङ्गत्वाच्च पूर्वं पर्य्यन्यवद्ध्रस्वप्रवृत्तौ दीर्घं लक्ष्ये लक्षणन्यायेन पुनर्ह्रस्वत्वाप्रवृत्तेः, यदितु उपधायाश्चेत्यनेन प्रत्यासत्त्याधात्ववयवस्यैवेकारदीर्घोऽभ्यासस्य धात्वनवयवत्वात् स्थानिवत्त्वाभावेऽपि विव्यतुरित्यत्रादोषादभ्यासत्वावच्छिन्नोद्देश्यताकत्वनिवेशे फलाभावेन तेन निषेधादेव सिद्धिरित्युच्यते तदा पूर्वस्यैवेत्यस्य नेदं

फलम् । यदा तु अभ्यासमात्रोद्देश्यककार्य्ये एव निषेध इत्युच्यते तदा-
नस्य तत् फलं सम्यगेव । किञ्च द्वित्वनिमित्ततापर्य्याप्त्यधिकरण
घटकाच्पर्य्याप्तनिमित्तताककार्य्यस्यैव द्विर्वचनेऽचीत्यनेनर्निषेधाद्दार-
तुरित्यादौ तदप्राप्तेः परत्वात् गुणे द्वित्वे अकारस्य स्थानिभूतादचः
पूर्वत्वाभावेन स्थानिवत्वाभावोपपत्तेर्वोक्तार्थस्य फलम् । किञ्च हेपि-
त्पन्न इत्यत्र गुरोरनृत इति प्लुतार्थं सर्य्योगसंज्ञायां कर्त्तव्यायाम-
कारलोपस्य स्थानिवत्वाभावार्थं पूर्व्वस्यैवविधावित्यर्थं आवश्यको-
ऽन्यथा यथाकथञ्चित्संर्य्योगसंज्ञायाः पूर्वसम्बन्धित्वेन स्थानिवत्वं
दुर्वारम् । एवमतर्लिङि लावस्थायामेवाटि तिपि शपि चक्का-
देशस्तस्य वृद्धौ कर्त्तव्यायां स्थानिवद्भावे च बुद्ध्या ककारसहितस्याट-
श्चेत्यनेन वृद्धिःस्यात्, पूर्वस्यैवेत्यर्थेतु, न भवति वृद्धिः पूर्वपरोभयसम्ब-
न्धित्वात्, कृष्ण इवाचरति कृष्णायते अत्र क्यङन्तात्क्विप्यल्लोप-
यलोपे कृष्णा इति तस्मादौ विभक्तौ वृद्धिः कृष्णाविति तत्राप्यलोपस्य
स्थानिवत्वे वृद्धिर्नस्यात्, तदुक्तौ तु न दोषः, एवं हयशब्दादाचारक्विब-
न्तात्कर्त्तरि क्विप्यलोपे यलोपे औपरे वृद्धौ कर्त्तव्यायामलोपस्य स्थानिव-
त्वं स्यात्तदुक्तौ न भवति। क्वौलुप्तमित्यस्यासार्वत्रिकत्वाच्च तेन सिद्धाःशा
पटुशब्दस्यानृशब्देन समासे पट्वृन् शब्दाच्छसि यणः स्थानिवत्वेन सर्य्यो-
गसंज्ञाया अभावेन न सर्य्योगादिति निषधाप्राप्त्याऽलोपापत्तिस्तदुक्तौ
न भवतीति दिक्, विधिशब्दे कर्म्मणि प्रत्यये विधीयते इति विधिः
कार्य्यं पूर्वस्येति सम्बन्धसामान्यबोधकषष्ठ्यन्तस्य विधिशब्देन समासे
पूर्वोद्देश्यककार्य्ये कर्त्तव्य इत्यर्थः, पूर्वविधिशब्दस्यावृत्त्या द्वितीये
पञ्चमीसमासेन च पूर्वस्मात्परस्य कार्य्ये कर्त्तव्य इत्यप्यर्थः, विधिशब्द
आवृत्त्या द्वितीये भावप्रत्यये पूर्वस्येत्यस्य कर्त्तृषष्ठ्यन्तस्य समासे पूर्वस्य
विधिर्विधानं भावः स्थितिस्तत्र कर्त्तव्य इत्यर्थः, पञ्चमीसमासस्य
फलं पेत्सन् चधातोस्सवन्ताल्लुङोभिर्भस्यान्तादेशे शपि आपन्नप्सधा-

मोदिति ऋकारस्येत्वे रपरत्वे ऽत्रलोपोऽभ्यासस्येत्यभ्यासलोपे धस्य चर्त्वे आटश्चेति वृद्धौ ऐर्त्स अच्चन्तीति स्यिनाविकारलोपे तकारस्य सय्यों गान्तलोपे पूर्वरूपद्वये ऐर्त्संचिति सिद्ध्यति, तत्रानुमानिकस्या-न्त्यादेशभावमादाय स्थानिवद्भावेनाभ्यस्तत्वं यत् सचन्ते तदेकदेशविकृ-तन्यायेन सान्ते आनीयानुमानिकादेशत्वमाश्रित्यैवान्तिशब्दे झित्वं तदेकदेशविकृतन्यायेन तान्ते तदेव तेनैव न्यायेन नान्ते परादिवद्भावेनै-कादेशविशिष्टे अन्तित्यत्रानीय सिजभ्यस्तेति जुसापत्तिवारणायैकादे-शस्य स्थानिभूतादचः पूर्व्वंस्यकारस्ततः परस्य विधौ स्थानिवद्भावः वस्तु-तोऽपवादस्य विषयपरिहारेणैवोपमज्जनिष्यमाणन्यायेनोत्सर्गप्रवृत्ते-र्जुसोविषयेऽन्तादेशाप्राप्त्या शपैकादेशे पूर्वान्तवद्भावेनाभ्यस्तत्वात्ततः परस्य जुसापत्तिः प्राप्ता नच कार्य्यकालपक्षे एकापाये द्वावितिबुद्ध्यभा-ववदभ्यासलोपे उभे इति बुद्ध्यभावेन उभेऽभ्यस्तमित्यभ्यस्तसंज्ञाऽभा-वादेव जुसो प्राप्त्येष्टसिद्धेः पञ्चमीसमासस्य नोपयोगो—तत्रानुरोधा-द्ययोद्दृशपक्षानाश्रयणादिति वाच्यम्, प्रत्यैषिषचित्यत्र इणधातोस्सन-न्ताल्लङि द्वितीयैकाचो द्वित्वे अभ्यासस्येत्व आटि वृद्धौ शपैकादेशे पञ्चमीसमासेन स्थानिवद्भावं विना जुसापत्तेर्वारयितुमशक्यत्वात् । नच पूर्वोत्तरसाहचर्य्यादनतिदिष्टस्यैवाभ्यस्तस्य ग्रहणादत्रचाभ्यस्तस्याति-दिष्टत्वान्न जुसापत्तिरिति वाच्यम् । अनेनिजुरित्यनापत्तेरविदुरित्या-दावतिदिष्टस्यैवार्थवतोविदस्सत्वाच्च । विधिशब्दे भावसाधनस्य फल-मैनेयः, एत शब्दस्य स्त्रियामेनी ततोढकि एयादेशे यस्येति चेतीकार-लोपे सन्नियोगशिष्टन्यायेन नकारस्याप्यपाये प्राप्त ईकारलोपस्य नका-रस्थितौ कर्तव्यायां स्थानिवत्वेनान्यतरापायाभावान्न नकारापाय इति शेखर उक्तम् । वस्तुतस्तु सन्नियोगशिष्टानामिति परिभाषया नकार-स्यापायरूपे विधेये कर्त्तव्ये तत्प्रतिबन्धार्थस्थानिवत्वस्य कर्म्मसाधनेऽपि प्रवृत्तेर्न्नभावसाधनोपयोग इति बोध्यम्, भावसाधनोविज्ञास्यत इति

भाष्यन्तु आभीयासिद्धत्वेनान्यथासिद्धस्यायचामचिति प्रयोगस्य साधनार्थंप्रवृत्तत्वादेकदेश्युक्तिभूतमिति न तद्विरोधोदोषायेति दिक् ॥

(नपदान्तद्विर्वचनवरे यलोपस्वरसवर्णानुस्वारदीर्घयश्चरविधिषु ।)

अत्र पदान्त-द्विर्वचन-यलोप-स्वर-सवर्णानुस्वार-दीर्घ-यश्चरपदार्थानां द्वन्द्वनिर्दिष्टानां सर्वेषां विधिपदार्थेऽन्वयोद्वन्द्वान्त इति न्यायात्, पदस्यान्तश्चरमावयवः, विधानं विधिः, भावे किः पदान्तस्य विधिः पदान्तविधिः, कर्म्मषष्ठ्यासमासः, तथा च पदचरमावयवादिकार्य्यकर्म्मकविधाने कर्त्तव्ये परनिमित्तआदेशोनस्थानिवदित्यर्थः, वरे इति भिन्नं वाक्यम् तस्य च वरेप्रत्ययनिमित्तकोलोपो न स्थानिवदिति पृथगेवार्थस्तस्य विधावन्वयाभावेनैकधर्म्मावच्छिन्नान्वयित्वरूपसाहित्याभावेऽपि पदान्तादीनां चरपर्य्यन्तानां सौत्रत्वाद्द्वन्द्वः, सप्तम्या अलुक् च, यलोपेत्यत्र लोपपदस्यावृत्त्यैकस्य लोपस्यात्र सम्बन्धः, भाष्ये लुप्तमित्यत्र भावेक्तः, एतद्वाक्यस्योदाहरणं यायावरः, यातेर्य्यङन्ताद्वरचि द्वित्वे अल्लोपे यलोपस्तस्मिन् कर्त्तव्येऽलोपो न स्थानिवद्यलोपविधौ निषेधात्, अलोपस्य स्थानिवद्भावेनाजादिङिन्निमित्तक आतोलोपस्तु नानेन निषेधात्, नच यकारे सत्यकारस्य प्रत्ययत्वाभावेन कथन्तल्लोपस्य स्थानिवद्भावेनाजादिङित्प्रत्ययत्वमिति वाच्यम्, स्थानिवृत्तित्वेन सम्भावितस्यापि धर्म्मस्य स्थानिवद्भावेन लाभ इत्यर्थस्य वरेग्रहणेनैव ज्ञापनादत एव यातेर्य्यङन्तात् क्विचि द्वित्वेऽलोपे यलोपेऽलोपस्यैव स्थानिवद्भावेनाकारवृत्तित्वेन सम्भावितप्रत्ययत्वमादाय धातोराकारस्यातो लोप इटिचेति लोपे यलोपे यातिरिति सिद्धति, यदि पूर्वं यलोपस्यात्तदाऽकारस्य प्रत्ययत्वं स्यादिति सम्भावनामात्रेण प्रत्ययत्वस्याकारवृत्तित्वमिति भावः, स्पष्टं चेदमत्रैव शब्दरत्ने पदान्तविधावुदाहरणम् । कानि, सन्ति कौस्तः; अत्र वाक्यसंस्कारपक्षे किम् इस्

अस् अन्ति कौ अस्तमित्यवस्थायां पूर्वापरस्थितनिमित्तकत्वेनान्तरङ्गत्वात् क्रमेण जसादेः श्यादेशादौ कार्य्ये कृते कानीत्यादौ विकारादेर्लोपीयस्थानिताश्रयाकारापेक्षया पूर्वत्वेन दृष्टत्वात्तेषां यणावादेशादिकार्य्ये कर्त्तव्ये प्राप्तस्याल्लोपस्य स्थानिवद्भावस्यानेन निषेधो यणावादेशयोः पदचरमावयवत्वात्। यदि च पदसंस्कारपक्षमाश्रित्य सन्ति स्त इति संसाध्य कानि कावित्यस्य सम्बन्धे इकारादेः स्थानिभूतादचः पूर्वत्वेन दृष्टत्वाभावेन स्थानिवद्भावाप्राप्त्या रूपसिद्धिरित्युच्यते, तदा पदान्तविधावित्यस्योदाहरणमेषो यन्हसतीत्यादौ, अत्र हि इण् धातोर्लटः शतरि शोर्यणीति यणि यन्निति रूपन्तवैतच्छब्दप्रकृतिकसुस्थानिकरेफस्योत्वे कर्त्तव्ये यणादेशस्य स्थानिवत्त्वस्यानेन निषेध उत्वस्य पदचरमावयवत्वात्, पदसंस्कारपक्षाश्रयणेन तु न निर्वाहस्तथा सति एतत्प्रकृतिकसोर्य्यणः स्थानिभूतादचः पूर्वत्वेन दृष्टत्वाभावात्तस्यैतत्तदोरिति लोपे कर्त्तव्ये यणः स्थानिवत्त्वाभावात्सुलोपापत्त्यैषोयन्निति रूपासिद्धिप्रसङ्गात्, विधीयत इति विधिः कर्म्मणि किः कार्य्यमित्यर्थः, पदान्तस्य विधिरिति शेषषष्ठ्या समासे पदान्तस्थानिके कार्य्ये कर्त्तव्य इत्यर्थस्तु न युक्तो वृत्तं वेति वातिर्वेति विग्रहे वृतोपपदात् वोधातोर्वोधातोर्वा क्विपि तदन्तादाचष्टे अर्थे णिचि विचि णिलोपटिलोपयोर्वृतव्करोतीत्यत्र लोपो व्योरिति वलोपापत्तेस्तस्मिन्कर्त्तव्ये टिलोपणिलोपयोः स्थानिवत्त्वन्तु न तत्करोत्याचष्ट इत्यर्थे द्वितीयान्तात् णिजुत्पत्त्या प्रत्ययलक्षणेन वान्तस्य पदत्वेन पदान्तवकारस्थानिकलोपरूपे कार्य्ये कर्त्तव्येऽनेन निषेधात्, भावसाधने तु न दोषो लोपस्य पदान्तत्वाभावेन पदचरमावयवकर्म्मकविधानाभावेन निषेधाप्राप्त्या टिलोपादेः स्थानिवत्त्वादिति मनोरमाकारास्तत्र प्रातिपदिकाणिजुत्पत्त्या वकारस्य पदान्तत्वाभावात्, वृतव्प्रकृतिकसुपमादाय वान्तस्य पदत्वात् वकारस्य पदान्तत्वमित्यपि न णिलोपस्य स्थानिवत्वात्, पदान्तविधौ

निषेधस्तु न स्थानिवद्भावनिषेधे पदान्तत्वं पदान्तत्वे च निषेध इत्यन्योन्याश्रयात्, नहि पदान्ताः परे ऽणस्सन्तीति भाष्यात्तस्यानभिधानाच्च, तर्हि तस्यार्थस्य परित्यागः किमिति चेच्छृणु एधोयन्हसती-त्यादौ सुलोपे प्राप्तस्य यणस्स्थानिवत्त्वस्यानेन निषेधापत्त्या सुलोपापत्तेः, कर्म्मसाधनस्य परित्याग इति । ननु एधोयन्निति रूपस्य प्रामाणिकत्वे एव भावसाधनफलत्वन्तदेवासिद्धं पदसंस्कारपक्षाश्रयणेन यन्निति रूपं संपाद्यैतच्छब्दसम्बन्धेन सोः स्थानिभूतादचः पूर्वत्वाभावेन लोपे कर्त्तव्येऽचःपरस्मिन्नित्यस्य स्वत एवाप्रवृत्त्या सुलोपेनैधयन्नित्येव साधु एवमस्धातोस्सन्निति रूपं संसाध्य तच्छब्दसम्बन्धे ससन्निति लोप घटित एव प्रयोगो नतु सस्सन्निति, अस्तुवा वाक्यसंस्कारपक्ष-स्तथापि पादस्यलोपोहस्त्यादिभ्य इति लोपो यथासमासान्तः स्थानि द्वारा वा वोद्धोवा तथा प्रकृतेऽपि स्थानिद्वारकं वोद्धं वा पदान्तत्व-मभावेऽक्षतमेवेति स्थानिवत्त्वनिषेधाल्लोप इष्यत एव । एवं मधुन अः मध्वस्तत आचारक्विबन्ताद्‌गुनिप्यल्लोपे वलि परे वलोपे कर्त्तव्ये प्राप्त-स्याल्लोपस्यानिवत्त्वस्य निषेधोनानेन लोपस्य पदचरमावयवत्वाभा-वादिति फलं भावसाधनस्येत्यपि न, लोपस्यापि पूर्ववत्पदचरमावय-वत्वात्, अत एव देवदत्तस्य न शब्देन समासे देवदत्तनस्ततस्तृतीयाया इनादेशे देवदत्तनेनेत्यत्र पराद्विवद्भावेनैनेत्यस्य स्यादित्वात्तस्मिन्नान्तस्य भत्वे अल्लोपोन इत्यल्लोपे कर्त्तव्ये प्राप्तस्य गुणादेशस्यानिवत्त्वस्य निषेधो न, लोपस्य पदानवयवत्वादित्यपि भावसाधनस्य न फलं, मुक्तयुक्तेः परंतु पादस्यलोप इत्यस्य समासान्ताधिकारे पाठसामर्थ्यात्, स्थानिद्वारकान्तत्वग्रहणेऽप्यन्यत्र तथाग्रहणे प्रमाणाभावात् भावसा-धनस्य भाष्यसम्मतत्वेन तदनुसारेण वाक्यसंस्कारपक्षे निष्पन्नस्यैधोय-न्हसतीत्यस्यापलपितुमशक्यत्वाच्च भावसाधनेन सिद्धस्यैधोयन्नित्यस्य प्रकारान्तरेण साधने एव तस्याफलत्वसम्भवाच्च तस्मात्सर्वं भावसा-

धनस्य फलमेवेत्याहुः, किञ्च भाष्योक्तं षडिक इति च फलं षडङ्गुलि-
शब्दात् बह्वचो मनुष्यनाम्नष्ठज्वेति ठचि कृते ठाजादावूर्द्ध्वं द्वितीयादच
इत्यनेनाजादौ ठचि द्वितीयादचऊर्द्ध्वं लुप्यत इत्यर्थकेन ङ्गुलिशब्दस्य
लोपे ऽकारस्य यस्येति लोपे षष्शब्दप्रकृतिकविभक्तिनिमित्तकपदत्वा-
ज्जश्त्वे षड्कि इति सिद्ध्यति तत्र समानावधिकयैकनिमित्तकभसं-
ज्ञया पदत्वस्य बाधाज्जश्त्वाभावस्तु न, भसंज्ञायां कर्त्तव्यायां
यस्येति लोपस्य स्थानिवत्त्वात्, अनेन निषेधस्तु न भसंज्ञायाः पदचर-
मावयवत्त्वाभावात्, कर्म्मसाधने तु भसंज्ञायाः पदान्तोद्देश्यककार्य्य-
त्वेन स्थानिवद्भावनिषेधेन भत्वाज्जश्त्वाभावापत्तेः, नच वाचिको न
सिद्ध्यति वागाशीश्शब्दाट्ठचि शीरित्यस्योक्तप्रकारेण लोपे आकारस्य
यस्येति लोपे तस्य स्थानिवद्भावेन भत्वाभावेऽन्तर्वर्त्तिविभक्त्या पदत्वेन
जश्त्वापत्तेरिति वाच्यम्, कर्त्तव्योऽत्रयत्न इति भाष्येण समाधानात्
यत्नश्चायम् एकाक्षरपूर्वपदानामुत्तरपदलोप इत्यनेन वाचिकस्सिद्धः,
आशीश्शब्दस्य लोपेनाजादेशत्वाभावेन स्थानिवद्भावाप्राप्तेः षडिक
इत्यर्थञ्च षषष्ठाजादावूर्द्ध्वमिति पठनीयमिति न वाचिक इत्यत्र
तत्प्रवृत्तिः किञ्च कर्म्मसाधने विधिशब्दे शेषषष्ठ्या समासे पदान्तांशे
पदान्तोद्देश्यके कार्य्ये कर्त्तव्ये इत्यर्थे सम्भवे ऽपि द्विर्वचनाद्युद्देश्यक-
कार्य्याभावेन तदंशे ऽनन्वयापत्तेः द्विर्वचनादिविधौ निषेधानापत्तेश्च
विधिशब्देन पदान्तादीनां कर्म्मधारये तु क्रियाशब्दतया विशेषणत्वा-
पत्तौ तस्य पूर्वनिपातापत्तेः पूर्वनिपातप्रकरणस्यानित्यत्वमेतन्निर्द्देशादा-
श्रयणीयमितित्वगतिकगतिभूतम् तस्माद्भावसाधनमेवयुक्तम् । भानोरः
भान्वस्ततआचारक्विबन्ताद्दुनिप्यलोपे वलोपे कर्त्तव्ये अलोपस्य स्थानि-
वद्भावोऽनेन निषेधस्तु न लोपस्य पदान्तोद्देश्यकत्वेऽपि पदान्तत्वाभावा-
दित्येतदपि भावसाधनस्य फलम् इदन्तु बोध्यं पदचरमावयवकार्य्यस्य
साक्षात् साधकः साक्षात्प्रतिबन्धकः परंपराप्रतिबन्धकश्च स्थानिव-

द्भावोऽनेन निषिध्यते न परंपराप्रापकः आद्यस्य फलं कानिसन्ति दध्युपपदकेण्धातोः कप्रत्यये यणि दधिय इत्यत्र यणि कर्त्तव्ये यणो-नस्थानिवदिति च फलं द्वितीयस्यैषोयन्हसति पत्रोत्वे न स्थानिवत् तृतीयस्य तु दधि ऋच्छति दध्यार इति अत्राण्निमित्तको वृद्ध्यादेशो न स्थानिवदस्यस्थानिवद्भावस्य हि ऋत्यक इति प्रकृतिभावद्वारा पदचरमावयवस्य यणः परंपरया प्रतिबन्धकत्वात् परंपराप्रापकस्य ग्रहणे तु षडिक इति न सिद्ध्यति तत्र भत्वप्रतिबन्धकस्थानिवद्भावस्य परंपरया पदान्तजश्त्वप्रापकस्य निषेधापत्त्या भत्वेन जश्त्वानापत्तेः ननु ऋत्यक इत्यनेन ह्रस्वस्यापि विधानेन तत्रत्यस्थानिवद्भावस्यापि साक्षात् पदान्तविधिप्रापकत्वेनैव संग्रहात् परंपराप्रतिबन्धकस्य ग्रहणे न फलमितिचेदस्तु तावतापि क्षतिविरहात् ननु परंपराप्रतिबन्धक-स्यैवंसति न फलमितिचेदत्रोच्यते व्याघ्रपाच्छब्दस्याशब्देन समासे आचारक्विबन्ताद्विच्लोपे टाविभक्तौ भत्वेन पदादेशे व्याघ्रपदेति भवति तत्राल्लोपस्थानिवद्भावस्य पादन्तनिष्ठभत्वप्रतिबन्धद्वारा पदा-देशरूपपदान्तविधिप्रतिबन्धकस्यानेन निषेधः ननु द्विर्वचनसवर्णानु-स्वार जश्चरां त्रिपादीस्थत्वेनातिदेशदृष्ट्याऽसिद्धत्वेनाचः परस्मिन्नि-त्यस्य तेषु कर्त्तव्येषु प्रवृत्त्या द्विर्वचनादिग्रहणं व्यर्थं सदतिदेशानां वतिघटितानां त्रिपाद्यामपि प्रवृत्तिरिति ज्ञापयति शेखरेऽन्यातिदेशे-त्यत्रान्येति फलितार्थकथनमन्यत्रधातुग्रहणेनेति वत् न तु ज्ञापको टौ प्रविष्टन्तथासति द्विर्वचनादिग्रहणस्य ज्ञापितेऽपि स्वांशे चारिता-र्थ्यानापत्तेः वतिघटितेति कथनादसिद्धं वहिरङ्गमित्यस्य त्रिपाद्यामप्र-वृत्तावपि न विरोधः ननु प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रे वतिघ-टितत्वाभावेन त्रिपाद्यामप्रवृत्त्यापत्तौ हेदीर्घाहोर्निदाघेत्यादावसु-पोति निषेधाप्रवृत्तौ नकारस्य रत्वेनोत्वानापत्तिरिति चेन्न तस्य निय-मार्थत्वेन स्थानिवत्सूत्रेणैव तत्र सुप्परत्वात् विधिमुखेन नियमस्य

प्रवृत्तावपीतरनिवृत्तावेवतात्पर्य्यात् प्रत्ययलोपे प्रत्ययवदिति न्यास-
स्यैव नागेशसम्मतत्त्वाच्च नखैर्निर्भिन्न इत्यादौ प्रत्ययस्थानिककार्य्या-
भावरूपस्य लक्षणग्रहणफलस्यातिदेशेनोच्चारणप्रसङ्गरूपस्यानवष्ठार्थो-
लाभइत्यनेनान्यथासिद्धेस्तेनोक्तत्वात् नन्वतिदेशसूत्राणामिति ज्ञाप्य-
शरीरकरणेनैवान्तरंगपरिभाषाव्यावृत्तौ वतिघटितेति निवेशो व्यर्थ
इति चेन्न लाघवाभावात् परिभाषाया अपि संज्ञा च परिभाषाचेत्यने-
न सूत्रे एव परिगणितत्वाच्च व्यपदेशिवदेकस्मिन्निति लोकसिद्धस्या-
सङ्ग्रहापत्तौ धुगित्यादौ भष्भावे कर्त्तव्येऽप्रवृत्त्यापत्तेश्चेतिदिक् नच
पूर्वत्रासिद्धे न स्थानिवदित्यस्यासिद्धत्वमूलकतया ऽसिद्धत्वस्य चाति-
देशं प्रत्यनेन ज्ञापनेनाभावे द्विर्वचनादिपरिगणितभिन्नत्रिपादीस्थका-
र्य्येऽचः परस्मिन्नित्यस्यप्रवृत्तौ बाधकाभावेन सय्योँगादिलोपलत्वण-
त्वेषु तस्य दोष इत्यादिवचनमन्तरेणैवाभीष्टसिद्धावपि पच्यन्लिह-
दुह्तत्प्रकृतिकण्यन्तात्क्विचि क्विपि णिलोपे तस्य स्थानिवद्भावेन
पाक्तिः याष्टिः लेढिः दोग्धिः तगित्यादौ कुत्वषत्वढत्वघत्वसय्योँ-
गादिलोपानापत्तिरिति वाच्यं द्विर्वचनादिग्रहणप्रत्याख्यानपरभाष्येण
फलैक्याय द्विर्वचनादिग्रहणस्य त्रिपादीशास्त्रमात्रोपलक्षकत्वात् तस्य-
दोष इति वचनस्थाने सय्योँगादिलोपलत्वणत्वेषु स्थानिवद्भावो
नेति वचनस्यैव करणीयत्वाच्चैतदतिरिक्तत्रिपाद्युपलक्षकत्वाद्वा ननु
वेतस शब्दात् ड्मतुपि ड्विति परे टिलोपे स्वादिष्विति पदत्वे
पदान्तसकारस्य रुत्वापत्ति स्तस्मिन्नल्लोपस्य स्थानिवत्वन्तु
न पदचरमावयवरुत्वं प्रति साक्षात्प्रतिबन्धकत्वेन निषेधात्
तसोमत्वर्थ इत्यनेन सान्तस्य भत्वमपि न तस्मिन्कर्त्तव्येऽल्लोपस्य
स्थानिवत्वात् निषेधस्य तु भत्वं प्रति साक्षात्प्रतिबन्धकस्य तस्य पद-
चरमावयव रुत्वं प्रति साक्षात्प्रापकत्वप्रतिबन्धकत्वयोरभावेनाप्राप्ति-
रिति चेन्न पदे अन्तः पदान्त इतिसप्तमीतत्पुरुषेण पदे परे योन्त-

स्तत्कर्म्मके विधावित्यर्थेन पदपरत्वाभावेन निषेधाप्राप्तेः स्थानिवद्भावेन सकारस्य पदान्तत्वाभावेन रुत्वाप्राप्तेः ननु शेखरे प्रत्यासत्त्या परपदस्याजादेशस्यैव स्थानिवद्भावोऽनेन निषिध्यत इत्युक्तं तस्य किं फलम् पदपरत्वाभावेनैव प्रकृतदोषवारणसम्भवादिति चेन्न औपदेशिकनान्तध्वन्धातोर्ण्यन्तात् क्विपि णिलोपे सम्बोधने ध्वाणिति ततः परमस्वशब्दप्रयोगे ध्वाणस्व इत्यत्र णिलोपस्य क्विब्निमित्तस्य स्थानिवद्भावेन पदान्तस्येत्यनेन णत्वनिषेधो न भवति तत्र पदपरकान्तस्य णस्य निषेधप्रतिबन्धद्वारा प्रापकोणिलोपस्थानिवद्भावो ऽनेन निषिद्ध स्यात् प्रत्यासत्त्या परपदस्याजादेशस्थानिवद्भावस्यैवानेन निषेधे तु णिलोपस्य परपदस्थत्वाभावेन निषेधाप्राप्त्या दोषाभावात् नचोक्तरीत्या परंपराप्रापकस्यानिषेधेन प्रत्यासत्त्याश्रयणमन्तरेणापि निषेधाप्राप्त्या दोषाभाव इति वाच्यं णत्वविधायके अपदान्तस्य मूर्धन्य इत्यधिकृत्य णग्रहणस्य पदान्तस्येतिनिषेधस्य च भाष्ये प्रत्याख्यानेनास्य स्थानिवद्भावस्य साक्षाण्णत्वप्रापकत्वात् प्रत्यैषिषन् देवदत्ता इत्यत्र परादिवद्भावेनाभ्यस्तात्परस्य झेर्जुसोऽभावाय पञ्चमीसमासमाश्रित्येष्टस्य पररूपैकादेशस्थानिवद्भावस्य पदपरकपदान्तजस्कर्म्मकविधिप्रतिबन्धकस्य निषेधाभावाय प्रत्यासत्त्याश्रयणस्यावश्यकत्वाच्च नचैतन्निषेधाप्राप्तावपि पूर्वत्रासिद्धे न स्थानिवदिति निषेधो दुर्वार इति वाच्यम् पदे अन्त इति सप्तमीसमासमाश्रित्य स्थानिवत्त्वनिषेधव्यावृत्तिपरभाष्यप्रामाण्येन पूर्वत्रासिद्धस्य पदचरमावयवविधायकातिरिक्तस्यैवग्रहणेनादोषात् नच पिपठिषतेरप्रत्ययेऽलोपे सकारस्य रुत्वे र्वोरिति दीर्घे पिपठीरित्यत्र रुत्वे कर्त्तव्ये अतोलोपोनस्थानिवत् पूर्वत्रासिद्धे न स्थानिवदिति निषेधादिति शेखरतो विरुद्धे। रुत्वस्य पदचरमावयवत्वादितिवाच्यम् तद्धित निमित्तकाङ्गसंज्ञावदवयवपदचरमावयवभिन्नस्य लोपादिकस्य ग्रहणेनादोषात् माहृषमानित्यत्रापि झलाञ्जशोन्त इति

जश्त्वचाल्लोपस्य स्थानिवत्त्वादुक्तरीत्या पूर्वत्रासिद्धे नस्थानिवदित्यस्याप्रवृत्ते र्वेशा जश्त्वविधिं प्रति स्थानिवत्त्वनिषेधश्चरसाहचर्य्येण परनिमित्तकस्य झलाञ्जशझशीति विहितस्यैव जश्त्वस्य तत्र ग्रहणात् पिपठीरित्यत्र क्वौलुप्तमित्यनेन निर्वाहेपि गर्द्दभमाचष्टे गर्द्दभयति ततः क्विपि णिलोपे टिलोपस्य स्थानिवद्भावधारणाय तद्भिन्ननिमित्तके-त्यादिनिवेशस्यावश्यकत्वं टिलोपस्य णिनिमित्तकत्वेन क्वौलुप्तमित्यस्याप्रवृत्तेः ननु वेतस्वान् महिष्मानित्यत्रान्तरङ्गपरिभाषया रुत्वजश्त्वयोरन्तङ्गयोः परनिमित्तकत्वेन बहिरङ्गस्यातोलोपस्यासिद्धत्वेनोपपत्तौ पदे परे इति पदचरमावयवातिरिक्तेत्यर्थकरणं व्यर्थमेवेतिचेन्न कार्य्यकालपक्षेऽपि त्रिपाद्यामन्तरङ्गपरिभाषाया अप्रवृत्तेः शेखरे प्रतिपादितत्वात् ननु गामस्वतीति क्विपि गतिकारकोपपदानामितिपरिभाषया सुबुत्पत्तेः प्रागेव समासे तृतीयान्तगोचेत्यादावचश्चेत्यल्लोपस्य स्थानिवद्भावेनावादेशापत्तिः परस्य पदत्वाभावात् पदेपरे अन्तस्याभावेन निषेधाप्रवृत्तेरिति चेन्न गतिकारकेत्यस्यानित्यतया सुबुत्पत्त्युत्तरमेव-समासात् अत एव धनक्रीतेति सिद्ध्यति नचोत्तरपदत्व इति प्रत्ययलक्षणनिषेधेनापदत्वमेवेति वाच्यम् उत्तरस्य पदत्वप्रयुक्तकार्य्ये एव तद्वार्त्तिकस्य प्रवृत्त्या प्रकृते तदभावेनाप्रवृत्तेः कार्य्यत्वानिवेशादेव-माषकुम्भवापेनेत्यस्यसिद्धिरित्यन्यत्र स्पष्टम् पदे परे अन्तस्येत्यत्र पदपदस्य पदत्वयोग्यपरत्वाद्वा पदेऽन्तः पदान्त इति सप्तमीसमासपरभाष्यमेवपदत्वयोग्योपलक्षकत्वे प्रमाणमन्यथाऽत्रफलभेदापत्तेः इदञ्च साक्षात् पदचरमावयवसाधकस्थानिवद्भावनिषेधस्योदाहरणम् । अचश्चेत्यस्य भसंज्ञानिमित्तकत्वेऽपि परनिमित्तकत्वाभावेन न स्थानिवद्भावप्रसक्तिरिति तु न वाच्यं वस्रश्चेत्यत्रोरदत्वस्येवात्राप्यचश्चेत्यस्य परनिमित्तकत्वात् परस्य सत्तां विना यस्य न प्रवृत्ति स्तस्य परनिमित्तकत्वस्वीकारात् नपदान्तसूत्रे भाष्ये यद्यपि दीर्घग्रहणस्यापि प्रत्या-

ख्यानमुक्तम् परन्तु शमधातोर्णिजन्ताणिण्चि कर्मणि लुटि तासि-प्रत्यये चिण्वद्भावे णिचोर्लोपे चिण्वद्भावसन्नियोगशिष्टे इटि च चिण्णमुलोर्दीर्घोऽन्यतरस्यामिति दीर्घः प्रत्ययलक्षणेनैकं णिचमादाय विकल्पेन भवति ततश्च शामिता शमितेति रूपद्वयम्भवति तत्र प्रथमणिलोपस्य स्थानिवद्भावे तेन णिचा व्यवधानाच्चिण्परकणिपर-कमितोऽभावेन दीर्घानापत्तिः दीर्घग्रहणाभावेन स्थानिवद्भावनिषेधस्य सापादिकत्वेन पूर्वत्रासिद्धेनेति वचनस्य चाप्राप्तेः णाविति जाति-परोनिर्देश इति दीक्षितोक्तप्रकारस्तु न युक्तस्तत्रैव शेखरकृता खण्डितत्वात् तस्मात् प्रत्याख्यानपरभाष्ये वरे यलोपस्वरवर्जमित्यत्र वर्ज्यकोटौ दीर्घोऽप्युपलक्षणीय स्तस्य न प्रत्याख्यानमिति यावत् ।

अन्तादिवच्च ।

अत्र पूर्वपरयोरित्यनुवृत्तमन्तादिभ्यां क्रमेण सम्बध्यते एकमित्यनु-वृत्तमेकादेशपरम् अन्तादिशब्दौ चैकादेशस्थानिपरौ पूर्वपरशब्दौ च तद्घटितसमुदायपरौ एवञ्च पूर्वस्य परस्य च समुदायस्यान्तादिभ्यां वर्णाभ्यां तुल्यस्तत्स्थानिक एकादेशोभवतीत्यर्थः ताभ्यां पृथगवस्थिता भ्यां पूर्वपरसमुदाये ये प्रातिपदिकत्व सुबन्तत्वप्रत्ययत्वादिव्यवहा-रास्ते एकादेशविशिष्टे पूर्वस्मिन् परस्मिन् समुदायेऽपि भवन्तीति यावत् एकादेशे अन्तादि वर्णसादृश्यं पूर्वपरसमुदायवृत्त्युक्तधर्म्मवद्घ-टकत्वमेवेति तत्त्वम्? तद्वच्चेत्येव वक्तव्यन्तत्पदेन तयोरेवाद्यन्तयोः परामर्शस्स्यात्तथा च तयोराद्यन्तयोः पृथगवस्थितयो स्सतोस्तयोस्त-द्घटितपूर्वसमुदायपरसमुदाययोश्च ये व्यवहारास्ते एकादेशे सति तस्मिन् तद्घटिते च स्युरित्यर्थस्स्यात् ततश्चात्रादिवर्णमात्रवृत्तयो ऽत्वादय स्तद्घटितसमुदायवृत्तयोऽदन्तत्वादयश्च ये धर्म्मा स्तेषा-मप्यतिदेशापत्तौ खट्वाभिरित्यादावदन्तत्वादीनामतिदेशापत्तौ भिस ऐस् स्यात् समुदायसाकाङ्क्षान्तादिशब्दोच्चारणे तु समुदायपर्य्याप्तधर्म्मा-

णामेवातिदेशो न तु वर्णमात्रवृत्तीनामत्वादीनान्तदविनाभूतानामदन्तत्वादीनाञ्च तेषामप्यत्वातिदेशमन्तराऽतिदेशासम्भवात् तेन खट्वाभिरित्यत्रादन्तत्वमादाय नैसादेशः, अतएव षत्वतुकोरसिद्ध इत्यनेन तुक्येकादेशस्यासिद्धत्वविधानं सार्थक मन्यथाऽधीत्येत्यत्रोपसर्गधात्वोरेकादेशस्य दीर्घस्य पूर्वान्तवद्भावेन ह्रस्वत्वमादाय तुक्सिद्धौ तद्व्यर्थमेव स्यादिति शेखरे वस्तुतस्तु दैवादिकादीङ्गताविस्मात् क्त्वोल्यपि अधीयेत्यत्र पूर्वान्तवद्भावेन ह्रस्वत्वमादाय प्राप्तस्य तुकोवारणायासिद्धत्वस्यावश्यकतया नैतन्मनोरमम् । तादूप्यानतिदेशादित्यस्यापि वर्णमात्रवृत्तिधर्म्मानतिदेशादित्यर्थः ननु रामावित्यादौ वृद्ध्यादेशस्यानेन सूत्रेण परादिवद्भावेनसुप्त्वान्मान्ते एकदेशविकृतन्यायेन प्रकृतित्वात्सुबन्ततदादित्वस्यार्थसमाजग्रस्तस्य सिद्धौ पदत्वसिद्धा रामौगच्छत इत्यत्र तिङ्तिङ इतिनिघातसिद्धिरेतत्फलन्तत्तु न युक्तं कार्य्यकालेऽतिदेशं विना सुबन्ततदादित्वाभावेन पदत्वाप्राप्तावपि यथोद्देशपक्षे एकादेशात्पूर्वंजातपदत्वस्यानुमानिकस्यान्यादेशभावकल्पनया स्थानिवत्सूत्रेणैव पदत्वस्य सिद्धेर्व्यवस्थितपक्षद्वयेऽन्यतरेणलक्ष्यसिद्धौ पक्षान्तरेणदोषप्रदानस्यानुचितत्वात् नच यथोद्देशेपि नित्यत्वादेकादेश एव स्यात्पूर्वं च पदत्वमिति वाच्यम्विरोधे एव वाध्यवाधकभावेनैकादेशपदत्वयोरविरोधेन युगपत्प्रवृत्तावदोषात्- नच क्षीरपेणेत्यत्रसापादिकत्वात् पूर्वमिनादेशे गुणे क्षीरपेनेतिस्थितौ-णत्वचस्यादेकाजुत्तरपदघटितसमासावयवपूर्वपदावयवनिमित्तात्परस्य नस्य हि णत्वं विधीयते क्षीरपेनेतिस्थितौ न समुदायस्य समासत्वं न क्षीरपे इत्यस्य न वा पे इत्यस्योत्तरपदत्वं पेत्यस्यैवोत्तरपदत्वात् स्थानिवद्भावस्या पि नावसरः ओतादेशस्य स्थानिनि वर्णद्वयात्मके उत्तरपदत्वाभावात् क्षीरप इनेत्यस्य स्थाने क्षीरपेनेत्यानुमानिकस्यान्यादेशभावेऽपि स्थानिनि क्षीरप इनेत्येतस्मिन् समासत्वाभावात्

क्षीरप इत्यस्य स्थाने क्षीरपे इत्यादेश इत्यपि न श्रौतस्थानिघटितस्यैवानुमानिकस्थानित्वादकारैकारयोर्मिलितयोरेव श्रौतस्थानित्वात् न क्षीरपेत्यस्य तदघटितत्वात् सत्येतस्मिन् सूत्रे पूर्वान्तवद्भावेन पे इत्यस्योत्तरपदत्वं सुलभम् नच नैतदपिफलमुत्तरपदत्वस्याशास्त्रीयत्वादेकाजुत्तरपदत्वस्य शास्त्रीयघटितत्वेन शास्त्रीयत्वेपि वर्णत्वव्याप्याच्त्वघटितत्वेनादन्तत्वादिवत्ताद्रूप्यत्वात् नचैकदेशविकृतन्यायेन पेत्यस्य यदुत्तरपदत्वन्तत्ये शब्दे आनीय निर्वाह इति वाच्यमर्द्धाधिकस्य विकृतत्वात् नच क्षीरपशब्दे यदेकाजुत्तरपदघटितसमासत्व न्तदुक्तन्यायेन क्षीरपे शब्दे आनीयत इति नार्धविकार इति वाच्य मेकारस्योभयादेशत्वेन तदेकदेशमात्रस्य विकाराभावात् पूर्वैपुकामसम इत्यत्रत्यभाष्यप्रामाण्येन मात्रपदनिवेशस्यावश्यकत्वादिति परिभाषेन्दुशेखरे स्पष्टम् नच नैतदर्थमन्तादिवच्चेत्यस्यावश्यकता एकादेशस्य पूर्वस्थानिघटित पूर्वसमुदाये परस्थानिघटितपरसमुदाये च प्रत्येकं स्थानित्वपर्य्याप्ति रेकादेशघटितेचादेशत्वपर्य्याप्तिरानुमानिकस्थान्यादेशकल्पनस्थलेऽङ्गीक्रियते एतल्लक्ष्यानुरोधात् तथाच क्षीरप इन इत्यस्य स्थाने क्षीरपेनेत्यादेश इत्यानुमानिके स्थान्यादेशभावे क्षीरपशब्दे स्थानितापर्य्याप्तिरिन्शब्दे च स्थानिता पर्य्याप्तिरादेशता च क्षीरपेन शब्दे इतिस्थिते एकाजुत्तरपदघटितसमासत्वं स्थानिवद्भावेन क्षीरपेन शब्दे स्थानिवत्सूत्रेणानीय णत्वोपपत्तेरितिवाच्य मच्त्वघटितत्वेन विशिष्टतयाऽनाश्रयणात् यदि च प्रत्येकंस्थानित्वपर्य्याप्तिवदादेशत्वमपि श्रौतादेशघटिते स्थान्यन्तरतमे एव कल्प्यते ततश्च क्षीरपेनेत्यत्र क्षीरपशब्दस्य क्षीरपे आदेश इनेत्यस्य नेत्यादेशः इनेत्यस्य एनादेशः क्षीरपेत्यस्य क्षीरप इत्यादेश इति वा कल्प्यते एवं पेत्यस्य पे आदेश इनेत्यस्य नेत्यादेश इति च कल्पयितुं शक्यते न तत्र क्षीरपशब्दगतं समासत्वं क्षीरपे शब्दे आनीयते प शब्दगत-

मुत्तरपदत्वं पे शब्दे आनीयते तस्यैकाच्त्वं स्वत एवास्ति वीरपे
शब्दे चैकाजुत्तरपदघटितसमासत्वमार्थसमाजग्रस्तमित्यन्तादिवच्चेति
सूत्रं विनापि णत्वसिद्धिः, न चाशास्त्रीयत्वान्नोत्तरपदत्वमतिदेष्टुं
शक्यते, स्थानिवत्सूत्रेण शास्त्रस्थपदसंकेतितावच्छेदकं हि शास्त्रीय-
मिति वाच्यं शास्त्रस्थपदशक्यतावच्छेदकस्यैव शास्त्रीयत्वाभ्युपगमेना-
दोषादित्युच्यते तदा नैतत् फलम् एवममी इत्यपि फलञ्च अत्राद
स्शब्दाज्जसि त्यदाद्यत्वे श्यादेशे गुणे अदेशब्दे एतद्बहुवचने
इत्येतत्प्रवृत्त्यर्थमदश्शब्दत्वमानेयं तच्चान्तवद्भावाधीनं स्थानिवत्सू-
त्रेण नानेतुं शक्यं औतस्थानित्वमकारैकारयोरानुमानिकस्थानित्वमद
द इति समुदायस्योभयत्र नादश्शब्दत्वं यत्रादश्शब्दत्वं न तत्र स्था-
नित्वपर्य्याप्तिरिति फलं वक्तव्यं तत्रैकादेशपूर्वस्थानिघटितपूर्वसमुदा-
येऽपि स्थानित्वपर्य्याप्त्यभ्युपगमेन स्थानिवत्सूत्रेणैव निर्वाहात्, यदपि
भियोहेतुभयेषुगितिसूत्रे भी ई भीस्तस्य भिय इत्यत्रैकादेशविशिष्टे
धातुत्वमानेयमियङर्थं तच्चान्तवद्भावमन्तरा न सम्भवतीति सूत्रमा-
वश्यकमिति शेखरे उक्तम्, तदपि न युक्तम्, भी ई इत्यस्य स्थाने भी
इत्यादेश इत्यानुमानिकस्यान्यादेशभावमाश्रित्यनिर्वाहसम्भवात्, एका-
देशपूर्वस्थानिघटिते पूर्वस्मिन् भीसमुदाये स्थानित्वपर्य्याप्त्यभ्युपगमेन
स्थानिवत्सूत्रेणैव भी इत्यत्र धातुत्वातिदेशसम्भवात् यदपि प्रत्येक-
मेकादेशस्थानिघटिते पूर्वस्मिन् परस्मिंश्च समुदाये स्थानित्वपर्य्याप्त्य-
भ्युपगमे स्व अश्व इत्यस्य स्थाने स्वाश्व इत्यादेश इत्यानुमानिकस्या-
न्यादेशभावे पूर्वसमुदाय-स्व शब्दगतंस्वशब्दत्वं स्वाश्वशब्दे आनुमानि-
कादेशे स्थानिवद्भावेनादायैरिन्शब्दयोगे स्वादीरेरीति वृद्ध्यापत्तिरूप-
न्दूषणमुक्तं शेखरकृता तदपि न यथा स्थानितापर्य्याप्तिस्समुदायद्वये
तथाऽऽदेशत्वमपि औतादेशघटिते पूर्वसमुदायरूपस्थान्यन्तरतमे
समुदाये पूर्वसमुदायनिष्ठस्थानितानिरूपितं परसमुदायरूपस्थान्यन्त-
रतमे औतादेशघटिते समुदाये परसमुदायनिष्ठस्थानितानिरूपितमभ्यु-

येयते ततश्च स्वशब्दस्य स्वा आदेशः, अश्व शब्दस्य आश्व आदेशः स्व अश्व शब्दस्य स्वाश्व आदेश इति कल्पनाचयम्, ततश्च स्थानिवद्भावेन स्वशब्दत्वं स्वाशब्दे अश्वशब्दत्वं आश्वशब्दे स्व अश्वशब्दत्वं स्वाश्वशब्दे एव स्याच तु स्वाश्वशब्दे स्वशब्दत्व मान्तरतम्यञ्च स्वघटकओतस्यानीतरयावद्वर्णघटितत्वविशिष्टस्वाघटकओतादेशेतरवर्णाघटितत्वरूपेणेत्यदोषात् यदप्यभीयादित्यस्यासिद्धिरित्युक्तम् तदप्यसमञ्जसमेव अभि-इ-इत्यस्य स्थाने अभी इत्यानुमानिके स्थान्यादेशभावे अभीत्यस्य पूर्वसमुदायस्य स्थानित्वाभ्युपगमेन स्थानिवत्सूत्रेणाभीत्यानुमानिकादेशस्योपसर्गत्वेऽपि ततः परस्येणोऽभावेन ह्रस्वाप्रवृत्तेः नच परस्थानिभूतस्येकारस्योपसर्गात्परत्वेण्त्वयोस्सत्वेन स्थानिवत्सूत्रेणेकारे दीर्घे तयोरतिदेशेन ह्रस्वापत्तिः प्रत्येकं स्थानित्वस्वीकारे स्यादिति शेखराशय इति वाच्यम्, वर्णसन्निवेशसापेक्षस्य पूर्वत्वादेरतिदेशसहस्रेणाप्यतिदेष्टुमशक्यत्वात् नपदान्तसूत्रे शब्दरत्ने स्पष्टमेतत् एकदेशविकृतन्यायेनाभित्यस्योपसर्गत्वमादाय ह्रस्वापत्तेस्तूपसर्गत्वस्यात्कपरिमाणतया न्यायाप्रवृत्त्या वारणम्, अनित्यतयाऽचः परस्मिन्निति स्थानिवद्भावेन-चोक्तन्यायेन पदत्वमादाय नस्त्वापत्तिरपि न नपदान्तेति निषेधस्तु परपदस्याज्मात्रस्थानिकाजादेशविषयोऽतएवघटानयनमित्यत्र नस्त्वचेत्यपि बोध्यमिति स्थानिवत्सूत्रेण गतार्थमिदं सूत्रमितिमनोरमोक्तमेवयुक्तमितिदिक् ॥

यथासङ्ख्यमनुदेशः समानाम् ॥

समानामिति सर्वपर्यायस्यत्र सर्वादिगणे पाठात्सदृशपर्यायेऽत्र-न सुट् सादृश्यञ्चात्र समानसंख्यावत्त्वेनेव बोध्यम्, कर्मणिषष्ठी विधानार्थकानुदेशयोगादिति तु न विधेयानामुद्देश्यसमसङ्ख्याकत्वे यवलपरे यवलावेत्यत्र ; समकर्मकविधानसद्भावेन सूत्रसार्थक्येऽप्यनुवादो सम्लाक्षतिलीबेषु इनकञ्यह इत्यादावप्रवृत्त्यापत्तेः तस्मात्समानामित्यत्र प्रतियोगित्वनिरूपकत्वरूपे सम्बन्धे षष्ठी तस्य-चानुदेशपदार्थे अनु-

प्रतियोग्यनुयोगिभ्यां पश्चात्दिश्यते ज्ञायते इति व्युत्पत्तिलभ्ये सम्बन्धे-
ऽन्वयः, सङ्ख्यामनतिक्रम्य यथासङ्ख्यं सङ्ख्याशब्दार्थः क्रमः प्रथमत्व-
द्वितीयत्वादिरूपः भवतीति शेषः समानां सम्बन्ध इत्यनेनैव सम्बन्धस्य
प्रतियोगित्वेन विवक्षितानाम-नुयोगित्वेन विवक्षितानाञ्च समानस-
ङ्ख्यावत्त्वं लभ्यते तथा च समुदायविशिष्टोऽनुदेशस्सम्बन्धो यथा-
सङ्ख्यम्भवतीति वाक्यार्थः, सम्बन्धे समुदायवैशिष्ट्यञ्च स्वघटकपदार्थ-
प्रतियोगिकत्व, स्वविशिष्टसमुदायघटकपदार्थानुयोगिकत्वोभयसम्ब-
न्धेन सम्बन्धघटकवैशिष्ट्यं स्वघटकयावत्पदार्थपर्य्याप्तसङ्ख्यासमानस-
ङ्ख्याधयावत्पदार्थघटितत्व,सम्बन्धेन इदमुद्देश्यदलं विधेयदलं यथा-
सङ्ख्यमिति तस्य च सङ्ख्यामनतिक्रम्य भवतीत्यर्थस्सङ्ख्यामनतिक्र-
म्यभवनञ्च सम्बन्धे स्वप्रतियोगिनिष्ठक्रमसजातीयक्रमवदनुयोगिकत्व-
रूपम् सङ्ख्यातिक्रमणञ्च स्वप्रतियोगिनिष्ठक्रमविजातीयक्रमवदनुयो-
गिकत्वं तद्भवतीति यावत् । क्रमश्च यत्किञ्चित्समदायपर्य्याप्तसङ्-
ख्याप्रयोजकापेक्षाबुद्धीयसङ्ख्यानिष्ठप्रकारतानिरूपितविशेष्यतारूपः यथा
प्रथमाद्वितीयातृतीयाचतुर्थीपञ्चमीषष्ठीसप्तमीत्येतत्समुदायपर्य्याप्ता
सप्तत्वसङ्ख्या तत्प्रयोजिका अपेक्षाबुद्धयः प्रथमा एका प्रथमैकविशिष्टा-
द्वितीयाएकेति, इमे प्रथमाद्वितीये द्वे इति द्वित्वोत्पादिका अपेक्षा-
बुद्धिः इमे द्वे एतद्द्विविशिष्टा तृतीया एकेति, इमाः प्रथमाद्वितीया-
तृतीयास्तिस्र इति त्रित्वोत्पादिका अपेक्षाबुद्धिः इमास्तिस्रः एतत्त्रि-
विशिष्टा चतुर्थी एकेति, इमाश्चतस्र इति चतुष्ट्वसङ्ख्योत्पादिका अपे-
क्षाबुद्धिः इमाश्चतस्रः एतच्चतुर्विशिष्टा पञ्चमी एकेति, इमाः पञ्च
इति पञ्चत्वसङ्ख्योत्पादिका अपेक्षाबुद्धिः इमाः पञ्च एतत्पञ्चवि-
शिष्टा षष्ठी एकेति इमाः षट् इति षट्त्वसंख्योत्पादिका अपेक्षा
बुद्धिः इमाः षट् एतत् षट्विशिष्टा सप्तमी एकेति इमाः सप्त इति
सप्तत्वसङ्ख्योत्पादिका अपेक्षाबुद्धिः, (इमा) स्सर्व्वा अपेक्षाबुद्धयः सप्त-
त्वसङ्ख्याप्रयोजिकास्तदीयैकत्वसङ्ख्यानिष्ठप्रकारतानिरूपितविशेष्यता

प्रथमाद्वितीयादिनिष्ठेति सप्तसु प्रथमादिषु क्रमः प्रथमत्वञ्च यादृ-
शसमुदायनिरूपितं प्रथमत्वं विवक्षितन्तादृशसमुदायपर्य्याप्तसङ्ख्या
प्रयोजकापेक्षाबुद्धीय सङ्ख्यानिष्ठप्रकारतानिरूपितसङ्ख्यानवच्छिन्न-
विशेष्यताश्रयत्वम् तच्च प्रकृते प्रथमाया एव एकत्वनिष्ठप्रकारतानिरू-
पितसङ्ख्यानवच्छिन्नविशेष्यताश्रयत्वात् द्वितीयायास्तु एकत्वसङ्ख्या
वच्छिन्नविशेष्यताश्रयत्वात् न प्रथमत्वं मिलितयोस्तु प्रथमाद्वितीययो-
र्द्वित्वसङ्ख्यानिष्ठप्रकारतानिरूपितसङ्ख्यानवच्छिन्नविशेष्यताश्रयत्वेन
प्रथमत्वमिष्यत एव अतएवास्यां पङ्क्तौ प्रथमे त्रयः पण्डिता इति
त्रिषु पर्य्याप्तं प्रथमत्वं प्रथमयोः पूर्वसवर्ण इत्यत्र प्रथमपदेन प्रथ-
माद्वितीययोर्ग्रहणम् अत्र प्रथमापदे आवृत्तिरेकं प्रथमापदं द्वितीया
परमिति व्याख्यानन्तु हेयमेव प्रामाणिकेषु ग्रन्थेष्वनुक्तेः । एवंप्रथमद्वि-
तीयतृतीयादिष्वपि बोध्यम्, एवं द्वितीयत्वं द्वित्वसङ्ख्योत्पादकापेक्षा-
बुद्धीयैकत्वनिष्ठप्रकारतानिरूपितैकत्वावच्छिन्नविशेष्यताश्रयत्वं तच्च
द्वितीयस्यैव एवं तृतीयत्वं त्रित्वसङ्ख्योत्पादकापेक्षाबुद्धीयैकत्वनिष्ठप्र-
कारतानिरूपितद्वित्वावच्छिन्नविशेष्यताश्रयत्वमेवं क्रमेणैव चतुर्थ-
त्वादिकमपि बोध्यम्, एवमेव समूलाकृतिजीवादिसमुदायनिरूपितः क्रमः
प्रथमत्वादिकञ्च बोध्यं समूले उपपदे हनधातोरेवाकृत्युपपदे कृञ
एव जीवे उपपदे ग्रहधातोरेव प्रत्ययः समूलकर्मसाजात्यं हन्कर्म एव
आकृतिकर्मसाजात्यं कृञ्कर्म एवेति तयोरेव सम्बन्धे क्रमानतिक्रमो
न समूलकृञो स्सम्बन्धे तयोः कर्मयो र्विजातीयत्वेन क्रमातिक्रम एव
स्यात् साजात्यञ्च सङ्ख्यानवच्छिन्नत्व, सङ्ख्यात्वव्याप्यधर्मकिञ्चिद्धु-
र्माश्रयसङ्ख्यावच्छिन्नत्वान्यतररूपेण प्रथमत्वरूपे आद्यधर्म्मेण द्विती-
यत्वादिरूपे क्रमे द्वितीयधर्म्मेण बोध्यम् । ननु यदा समूलमेकम् आ-
कृति रेका जीव एक इति समूलाकृतिजीवा स्त्रय इत्येवं क्रमेणैवापे-
क्षाबुद्ध्या त्रित्वमुत्पन्नन्तदा समूलाकृतिजीवसमुदायपर्य्याप्तत्रित्वसङ्-
ख्योत्पादकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितं विशेष्यताश्रयमेव

सङ्ख्यानवच्छिन्नमिति त्रिषु प्रथमत्वापत्तिरेवं त्रित्वसङ्ख्योत्पादिका-
ऽपेक्षाबुद्धिस्तत्र तदीयैकत्वनिष्ठप्रकारतानिरूपिता कापि विशेष्यता
द्वित्वावच्छिन्नानास्तीति न कुत्रापि तृतीयत्वमेवमत्रैव द्वित्वोत्पादका-
पेक्षाबुद्ध्यभावेन द्वित्वोत्पादकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपिते-
कत्वावच्छिन्नविशेष्यताया अभावेन नाकृतेर्द्वितीयत्वमिति रीत्या
सर्वत्रैवाव्याप्त्यति व्याप्तिसद्भावान्नेयं व्यवस्था युक्तेति-चेदत्रोच्यते यत्र
पूर्व्वसङ्ख्यानवच्छिन्नविशेष्यताकैवायमेकोऽयमेकोयमेक इत्याद्याकारा-
पेक्षाबुद्धिस्तत्र त्रित्वादिकं नोत्पद्यते किन्तु बहुत्वमेव यत्र पूर्व्वसङ्ख्या-
वच्छिन्नविशेष्यताकाऽपेक्षाबुद्धि र्यथा अयमेकः एतदेकविशिष्टोऽयमेक
इत्याकारा इमौ द्वौ एतद्द्विविशिष्टोऽयमेक इत्याद्याकारा वा तत्रैव
द्वित्वत्रित्वोत्पत्तिरिति पूर्वोक्तापेक्षाबुद्धेस्त्रित्वानुत्पादकत्वेन न ता-
मादाय दोषोऽन्यथा क्व बहुत्वोत्पत्तिः क्व त्रित्वाद्युत्पत्तिरित्यव्यवस्थैव
स्यादिति गुरुचरणाः, केचित्तु "अनेकैकत्वबुद्धिर्य्या साऽपेक्षाबुद्धिरिष्यते"
इति कारिकाऽनुरोधादेकत्वमात्रावगाहिनी अयमेकोयमेकोयमेक
इत्यपेक्षाबुद्धिरपि त्रित्वोत्पादिका किञ्च पूर्व्वसङ्ख्यावच्छिन्नविशेष्य-
ताकैवापेक्षाबुद्धिर्य्यद्युत्तरसङ्ख्योत्पादिका तदा अयमेकोऽयमेक इत्यपे-
क्षाबुद्ध्या द्वित्वोत्पत्तिर्नस्यात् त्रित्वादिस्थले बहुत्ववदत्र कस्याप्युत्पा-
द्यस्याभावेनेष्टापत्यभावात्, अवधानविशेषस्यापि त्रित्वाद्युत्पत्तौ
हेतुत्वोपगमेन व्यवस्थासम्भवाच्चेत्याहुस्तन्मते प्रथमत्वादिक-
मन्यदेव वक्तव्यम्, तथाहि तत्समुदायनिरूपितं प्रथमत्वन्तत्स-
मुदायविशिष्टत्वं वै॰ स्वारम्भकत्व, स्वारम्भकानुत्तरत्वोभयसम्बं-
न्धेन द्वितीयादावतिव्याप्तिवारणाय द्वितीयस्सम्बन्धः उदासीने-
ऽतिव्याप्तिवारणायाद्यस्सम्बन्धः। द्वितीयत्वञ्च स्वारम्भकत्व, स्वार-
म्भकप्रथमाव्यवहितोत्तरत्वोभयसम्बन्धेन तत्समुदायविशिष्टत्वम्, एवं
तृतीयत्वादिकमपि स्वारम्भकत्व,स्वारम्भकद्वितीयाऽव्यवहितोत्तरत्वो-
भयसम्बन्धेन समुदायविशिष्टत्वादिकमेव क्रमत्वञ्चारम्भकत्वमेव तत्त्वेवं

प्रथमद्वितीयोभयात्मकसमुदायस्य प्रथमत्वव्यवहारो न स्यादुभयात्मकसमुदायस्यारम्भकत्वाभावादिति चेन्न स्वारम्भकत्वेत्यस्यस्थाने स्वारम्भकघटितत्वस्य दानेनादोषात् प्रथमत्वरूपक्रमसाजात्यं प्रथमत्वरूपे क्रमे उत्तरत्वाघटितत्वरूपेण द्वितीयत्वादिरूप क्रमसाजात्यं द्वितीयत्वादौ क्रमे प्रथमघटितत्वद्वितीय घटितत्वाद्यन्यतमरूपेण· समन्वयस्सुगमः यद्वा यथासङ्ख्यमित्यत्र सङ्ख्यापदं सङ्ख्यापरमेव सम्बन्धे सङ्ख्यानतिक्रमश्च स्वप्रतियोगिविशिष्टसङ्ख्यासजातीयसङ्ख्याविशिष्टानुयोगिकत्वमेव प्रतियोगिवैशिष्ट्यञ्च सङ्ख्यायां स्ववृत्तित्व, स्वपूर्व्वमाणत्वोन्यतरसम्बन्धेन प्रथमप्रतियोगिवैशिष्ट्यं वृत्तित्वसम्बन्धेनैकत्वसङ्ख्यायां द्वितीयादिप्रतियोगिवैशिष्ट्यं द्वित्वादिसङ्ख्यायां स्वपूर्व्वमाणत्वसम्बन्धेन अथ सङ्ख्यावैशिष्ट्यमनुयोगिनि स्वाश्रयत्व स्वपूरकत्वान्यतरसम्बन्धेन प्रथमे अनुयोगिनि एकत्वसङ्ख्यायाः स्वाश्रयत्वं सम्बन्धः द्वितीयाद्यनुयोगिनि द्वित्वादिसङ्ख्या वैशिष्ट्यं स्वपूरकत्वसम्बन्धेन सङ्ख्यासाजात्यञ्च सङ्ख्यायां संख्यात्वव्याप्ययत् किञ्चिज्जातिमत्त्वेन प्रथमे एकत्वत्वेन द्वितीये द्वित्वत्वादिनेति विवेकः ॥ यद्यपि शत्रुं मित्रं विपत्तिञ्च जय रञ्जय भञ्जयेत्यादावितस्यानाख्यलौकिकप्रमाणेनैव समसङ्ख्यकानां क्रमेणान्वयोपपत्ति स्तथापि यस्य सूत्रस्य वाक्यार्थबोधे क्रमेणान्वयो विवक्षित स्तस्मिन् सूत्रे यत्र समुदायोनोपात्तः किन्तु समुदायबोधकमेकमेव पदन्तत्र शास्त्रान्तरस्य समुदायमादायापि यथासङ्ख्यान्वयलाभार्थं यथासङ्ख्यसूत्रम् । यथा एचोऽयवायाव इत्यादौ किञ्चाद्यन्तौ टिकताविंत्यत्र समूलाकृतजीवेषु हन्कृञ्ग्रह इत्यादौ साहित्ये एव द्वन्द्वविधानान्मिलितानामेकरूपेणैकस्मिन्नन्वयविवक्षाया एव साहित्यपदार्थतया द्वन्द्वसाधुत्वोपपत्तये समुदायस्य समुदाये एवान्वयोवक्तव्यः क्रमेणान्वये द्वन्द्वस्यासाधुत्वं स्यादेतत्सूत्रारम्भसामर्थ्यात् क्रमेणान्वयबोधोपयोगिद्वन्द्वरहितं वाक्यं कल्पयित्वाऽनेन यथासङ्ख्यान्वयः कर्त्तव्यः स एव बोधो लक्ष्यसाधुत्वो-

प्रयोगीति बोध्यम्, वस्तुतस्तु धवखदिरौ छिन्धीत्यादावपि धवख-
दिरयोरेकत्रान्वयोऽवयवविभागरूपच्छेदनस्य धवादिभेदेन भिन्नत्वा-
दपित्वेकच्छेदनत्वधर्मावच्छिन्ने अन्वय इत्येव तदनुरोधेन मिलि-
तानामेकधर्मावच्छिन्नेऽन्वयविवक्षैवसहविवक्षा वक्तव्या ततश्चाद्य-
न्तयोष्टिति किति च भिन्ने एव पदार्थे उभयत्वरूपैकधर्मावच्छिन्ने-
ऽन्वय इति न क्रमेणान्वयानुरोधेन वाक्यान्तरकल्पनावश्यकतेति
बोध्यम्, यत्र समानामपि यथासङ्ख्यान्वयो न विवक्ष्यते तत्र कौमुद्या-
मुक्तमत्र यथासङ्ख्यमेष्यत इति तत्रैतत्सूत्राप्रवृत्त्यर्थमुद्देश्यकोटौ स्वरि-
तत्वं प्रवेश्य स्वरितत्वविशिष्टसमसङ्ख्यकानां सम्बन्धो यथासङ्ख्यं
भवतीत्यर्थः कर्त्तव्यः, तत्र तत्रैतत्प्रवृत्तिस्थले स्वरितत्वं प्रतिज्ञेयं यत्र
नेष्यते तत्र न स्वरितत्वप्रतिज्ञेति नैतत्सूत्रप्रवृत्तिरिति बोध्यम् ॥

ङमो ह्रस्वादचि ङमुण्नित्यम् ॥

अत्र ह्रस्वात्परो यो ङम् तदन्तं यत्पदं ततः परस्याचो ङमुडित्यर्थः,
परमश्चासौ दण्डी परमदण्डी द्विवचने परमदण्डिनावित्यादावुत्तरस्य
दण्डिन्नित्यस्य प्रत्ययलक्षणेन पदत्वमादाय ततः परस्याच औ इत्यस्य
ङमुट् प्राप्तौ न ङसंपुत्तरपदस्य इति प्रत्ययलक्षणनिषेधादत एवात्र
न लोपो न प्रकृतसूत्रे भाष्येऽपि तेन निषेधेन सिद्ध इत्युक्तम्, इति
प्राचीनाः शेखरकृत्तु ङञि च पद इत्यस्मात्पद इत्यनुवर्त्त्याचीत्यत्र
तदादिविधावजादेः पदस्य ङमुडित्यर्थेन परमदण्डिनावित्यादावावि
त्यस्य पदत्वाभावेन ङमुडभाव उत्तरपदत्वे इति निषेधस्तु न युक्तो
वार्त्तिके उत्तरेति लुप्तषष्ठीकं पृथक्पदन्तच्चोत्तरपदे लाक्षणिकं पदत्व
इत्यस्य पदत्वप्रयुक्तकार्य्ये इत्यर्थे स्तथाचोत्तरपदस्य पदत्वप्रयुक्ते कार्य्ये
कर्त्तव्ये प्रत्ययलक्षणन्नेति वार्त्तिकार्थः प्रकृते उत्तरपदस्य दण्डिन्नित्यस्य
पदत्वप्रयुक्तङमुट्कार्य्यस्याभावात् न लोपार्थं प्रत्ययलक्षणन्तु नानेन नि-
षेधात् पदत्वप्रयुक्तनलोपकार्य्यस्योत्तरपदे दण्डिन्नित्यत्र कर्त्तव्यत्वात्
कार्य्यिस्वनिवेशादेव माषकुम्भवापेनेत्यादौ माषाणां कुम्भो माषकुम्भं

स्नस्य वापी माषकुम्भआपस्तेनेत्यर्थके प्रत्ययलक्षणेन कुम्भेत्यस्य पद-
त्वेन तेन व्यवाये पदव्यवायेनेति णत्वनिषेधसिद्धिरन्यथोत्तरपदत्व
इति प्रत्ययलक्षणनिषेधेन णत्वनिषेधानापत्तिः ममतु कुम्भेत्यस्य पद-
त्वप्रयुक्तकार्य्याभावेन वार्त्तिकाप्रवृत्तिरिति न दोषः तेन निषेधेन सिद्ध
इति प्रकृतिसूत्रस्थं भाष्यंत्वेकदेशिन एवेत्याह अत्रैव प्रसङ्गाद्वार्त्तिकार्थो
विचार्य्यते उत्तरपदस्य पदत्व इत्यर्थे आर्द्रचर्म्मेत्यादौ चर्म्मेत्यत्र प्रत्य-
यलक्षणत्वस्यादिति नाशङ्क्य मुत्तरपदेन समासचरमावयवस्य ग्रहणा-
दस्य चातथात्वात् नन्वेवमत्रेरपत्यानि मधोरपत्यानीत्यर्थे यञञो-
श्चेति यञञोर्लुकि तद्धितान्तत्वात्प्रातिपदिकत्वेन तदवयवसुपोलुकि
जसि अत्रयः मधव इत्यादौ जसिचेति गुणे प्रत्ययलक्षणेन पदत्वा
देङः पदान्तादतीति पूर्वरूपापत्तिः निषेधस्तु न समासचरमावयव-
त्वाभावादिति चेदोत्तरपदस्य वृत्तिचरमावयवपरत्वेन तद्धितवृत्तेरत्र
सत्वेनादोषात् नन्वेवमपि पूर्वे दण्डीप्रियो यस्येति त्रिपदे बहुव्रीहा-
वुत्तरपदेपरे पूर्वदण्डिन्नित्यस्य तद्धितार्थोत्तरपदसमाहारेचेति तत्पुरुषे
दण्डिन्नित्यस्यापि तत्पुरुषरूपवृत्तिचरमावयवत्वेन तस्य पदत्वप्रयुक्ते
नलोपे कर्त्तव्ये प्रत्ययलक्षणनिषेधेन नलोपानापत्तिरिति चेन्न वृत्तिचर-
मावयवस्य मध्यमपदत्वानाक्रान्तस्यैव ग्रहणेन प्रकृते च दण्डिन्नित्यस्य
मध्यमपदत्वाक्रान्तत्वेन निषेधाप्रवृत्तेः, ननु वृत्तिचरमावयवस्यैवोत्तर-
पदत्वे पञ्चगवधन इत्यत्र समासान्तप्रत्ययस्यैव वृत्तिचरमावयवत्वेन
गोपदस्य तत्पुरुषवृत्तिचरमावयवत्वस्याप्यभावेन निषेधाप्रवृत्त्या प्रत्य-
यलक्षणेन पदत्वेनावङाद्यादेशापत्तिरिति चेन्न वृत्तिविशिष्टस्यैव
वृत्तिचरमावयवपदेन ग्रहणात् वृत्तिवैशिष्ट्यञ्च स्वघटकत्व, स्वारम्भ-
कपदपूर्वत्वाभाववत्त्वोभयसम्बन्धेन पञ्चगवधन इत्यत्र तत्पुरुषरूपवृ-
त्तिवैशिष्ट्यं वर्त्तते गोशब्दस्य तस्यटचः पूर्वत्वेऽपि पदपूर्वत्वाभावात्
धनपदस्य तत्पुरुषवृत्त्यारम्भकपदत्वाभावाच्च नचैवमपि पञ्चधनयो-
र्मध्ये एव सत्वेन गो इत्यस्य मध्यमपदत्वाक्रान्तत्वमेवेति न निषेध-

प्रवृत्तिरिति दोष एवेति वाच्यम्, वृत्तिविशिष्टत्वस्यैव मध्यमपदत्वाक्रान्तत्वपदार्थत्वेनादोषात्, वैशिष्ट्यञ्च स्वारम्भकोत्तरत्व, स्वारम्भकपदाव्यवहितपूर्वत्वोभयसम्बन्धेन टचा व्यवधानेन पदाव्यवहितपूर्वत्वाभावेन मध्यमपदत्वानाक्रान्तत्वात्, वस्तुतस्तु पूर्वदण्डिप्रिय इत्यादौ पूर्वदण्डिन्नित्यत्र वृत्तिपर्य्याप्तिर्नास्ति मानाभावात् समुदाये या वृत्तिस्तस्या एवापर्य्याप्त्या पूर्वदण्डिन्नित्यत्र सत्वेनोत्तरपदे परे समासविधानसामर्थ्येनापर्य्याप्तायाः अपि वृत्तेस्समासप्रयोजकत्वाभ्युपगमेन च तत्पुरुषोपपत्तेरेवञ्च दण्डिन्नित्यस्योत्तरपदत्वाभावेन निषेधाप्रवृत्तेर्मध्यमपदत्वानाक्रान्तत्वनिवेशो निरर्थकः, नचैवं सति पञ्चगवधन इत्यत्रापि निषेधाप्रवृत्तौ पदत्वेनावङापत्तिरिति वाच्यम् । पञ्चगवधनेति समुदायवृत्तिमादायैवोत्तरपदत्वस्य धने सत्वेनादोषात् वृत्तिविशिष्टत्वमेवह्युत्तरपदत्वं वैशिष्ट्यञ्च स्वारम्भकत्व, स्वारम्भकपदाव्यवहितपूर्वत्वाभाववत्त्वोभयसम्बन्धेन प्रकृते टचा व्यवहितत्वेनाव्यवहितपूर्वत्वाभावसत्वेना दोषात् उत्तरपदस्य वृत्तिचरमावयवपरत्वादेव बहुत्राचौ बहुसेचावित्यादिसिद्धौ बहुच्पूर्वस्य च पदादिविधावेव प्रत्ययलक्षणमिति वचनान्तरं नारम्भणीयन्तत्रापि तद्धितवृत्तेस्सत्वात् उत्तरपदादिः कर्णोवर्णलक्षणादित्यत्रानेन निषेधादुत्तरपदत्वमसम्भवीति न वाच्यन्तत्रोत्तरपदशब्दस्य समासचरमावयवपरत्वेन प्रत्ययलक्षणाभावेऽप्यदोषात्, ननु माषकुम्भवापेनेति कार्य्यित्वनिवेशस्य फलमयुक्तम्, तथाहि आर्द्रगोमयेणेत्यत्र पदव्यवायेऽपीत्यनेन गोरूपपदव्यवायात् प्राप्तस्य निषेधस्याभावायातद्धितइति वाच्यमिति वार्तिकं वार्तिककृता आरब्ध—तस्य व्यवधायकपदस्य तद्धितपरत्वे सति न निषेध इति तदर्थः भाष्यकृता च पदे व्यवाय इति सप्तमीतत्पुरुषं पदव्यवायेपीत्यत्राश्रित्य पदपरकर्य्यत्तेन व्यवाये नेत्यर्थादार्द्रगोमयेणेत्यत्र व्यवधायकस्य गोशब्दस्य पदपरत्वाभावेन निषेधाप्रवृत्त्या वार्त्तिकं

प्रत्याख्यातम् तत्र माषकुम्भं वपतीति माषकुम्भवापस्तेन माषकुम्भ-
वापेनेत्यत्र गतिकारकोपपदानामिति सुबुत्पत्तेः प्रागेवोपपदसमासे
आरम्भपक्षे कार्य्यित्वनिवेशे प्रत्ययलक्षणनिषेधकवार्त्तिकाप्रवृत्त्या कुम्भे-
त्यस्य प्रत्ययलक्षणेनपदत्वात्पदव्यवायेऽपीति निषेधो भवति सप्त-
मीतत्पुरुषेण प्रत्याख्यानपक्षे तु वापेत्यस्य पदत्वाभावेन कुम्भेत्यस्य
पदपरकत्वाभावेन निषेधाप्राप्त्या णत्वं स्यादिति फलभेदेन प्रत्याख्या-
नपरभाष्यविरोधेन पदपदं पदत्वयोग्यपरमित्यवश्यं वक्तव्यम्, ततश्च
पदत्वाभावेप्यर्थवत्वेन पदत्वयोग्यतायास्सत्वेन तत्परकेण कुम्भेन
व्यवधानान्निषेधस्सिद्ध्यतीति फलाभेद एवञ्च कार्य्यित्वनिवेशाभावे
प्रत्ययलक्षणनिषेधेऽपि कुम्भेत्यस्य पदत्वयोग्यत्वेन णत्वनिषेधोपपत्तौ
कार्य्यित्वनिवेशस्यानावश्यकत्वात् नच भाष्यविरोधाभावाय गतिकारको
पपदानामित्यस्यानित्यत्वकल्पनया सुबुत्पत्त्युत्तरमेव समासोऽनभि-
धानम्वाऽस्य कल्पनीयमिति वाच्यं कार्य्यित्वनिवेशाकरणलाघवेन शक्तं
पदमित्याश्रयणस्यैव युक्तत्वात् नचाटतीत्यटः पचाद्यच् परमश्चासा-
वटः परमाटस्स इवाचरतीत्याचारक्विबन्तात् संज्ञायां क्तिच्यतो-
लोपे तितुत्रेतीटोऽभावे परमाट्तिरित्यत्र प्रत्ययलक्षणेनाटः पदत्वान्न
पदान्तादिति ष्टुत्वनिषेधः कार्य्यित्वनिवेशाभावे प्रत्ययलक्षणनिषेधा-
पत्त्या ष्टुत्वापत्तिरिति स निवेश आवश्यक इत्यपि न ष्टुत्वमेवेष्यते
तत्र स्यादिति स निवेशो न युक्त इत्यस्य वक्तुं शक्यत्वात् । स्वादिष्व-
सर्वनामस्थाने यचि भमित्यत्र स्वादिष्विति योगः स्वादौ पूर्वं पद-
म्भवतीति तस्यार्थ स्तेन भ्यामादौ पदत्वसिद्धिः ततोऽसर्वनामस्थाने
यचीति द्वितीयो योगोऽसर्वनामस्थानेति प्रसज्य प्रतिषेधस्तेन यकारा-
द्यजादौ च सर्वनामस्थाने पूर्वं पदञ्च सुबित्यनुवर्त्य मध्ये चेत्सु-
बन्तन्तदपि पदवेत्यर्थस्तेन राजानावित्यादौ सुबाचेत्यादावन्तर्वर्त्ति-
विभक्तिमादाय वागित्यस्य च न पदत्वम् ततोभमिति अत्र स्वादि-

ष्वसर्वनामस्थाने यचीति सर्वमनुवर्त्तते तेन यजादावसर्वनामस्थाने स्वादौ पूर्वं भम्भवतीति तस्यार्थ-स्तेन सुवाचेत्यादेर्वार्त्तिकफलस्य सिद्धौ वार्त्तिकम्भाष्ये प्रत्याख्यातम्, अत्र विमलदिषी सुवाचेत्यत्र सर्वनामस्थानपरत्वाभावेन निषेधाप्राप्त्याऽन्तर्वर्त्तिविभक्त्या पदत्वेन दिव उदित्युत्वापत्तिः चोः कुरिति कत्वापत्तिश्च वार्त्तिकसत्वे च न भवतीति फलभेदवारणाय सर्वनामस्थानपदं स्वादिपर-स्तथापि परमश्चासौ कविश्च परमकविस्स इवाचरति परमकवयतीत्यादौ वार्तिकसत्वे प्रत्ययलक्षणनिषेधेन पदत्वाभावात्पूर्वरूपाभावः प्रत्याख्याने स्वादिपरत्वाभावेन निषेधाप्राप्त्या प्रत्ययलक्षणेन पदत्वात्पूर्वरूपापत्तिरिति फलभेद-स्तदर्थं यजादिप्रत्ययमात्रपरमित्युक्तावपि परमश्चासौ लिट्च परमलिट् स इवाचरतीत्याचारक्विबन्ताद्धुनिपि परमलिड्ढित्यादौ वार्त्तिकेन प्रत्ययलक्षणनिषेधाड्ढत्वाभावः प्रत्याख्यानेऽजादिप्रत्ययपरत्वाभावेन निषेधाप्राप्त्या प्रत्ययलक्षणेन ढत्वापत्त्या फलभेद एव तदभेदाय प्रत्ययमात्रपरत्वमेव वक्तव्यमेवं सति परमाट्टतिरित्यत्रापि निषेधेन पदत्वाभावात् नपदान्तादित्यस्याप्राप्त्या ष्टुत्वमेवेत्यारम्भपक्षेऽपि ष्टुत्वस्यावश्यकत्वेन कार्य्यित्वनिवेशायाञ्जलिप्रदानमेव युक्तमितिदिक् ॥

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ।

अत्रार्थोच्चारणविहितइत्यनेनेन्प्रत्यये अर्थीति कुतोनेति नाशंक्यं-शब्दार्थसम्बन्धस्यनित्यत्वाच्छब्देऽर्थसन्निधानस्यैवसत्वात् असन्निहितइत्यन्येन स्वविषयकेच्छावत्त्वसम्बन्धेनार्थविशिष्टेऽर्थेऽर्थशब्दादिनित्यर्थ एव तात्पर्य्यावधारणेन शब्दस्य तादृशसम्बन्धेनार्थविशिष्टत्वाभावाच्च लक्ष्यानुरोधेनासन्निहितपदेनचप्रयोजनवाच्यर्थशब्दस्यैवतत्रग्रहणाच्च अर्थवत्त्वञ्च प्राचीनमते अर्थविषयकबोधजनकत्वन्तच्च प्रत्ययमात्रस्याप्यस्तीति हरिष्वित्यादौ सोऽपि प्रातिपदिकत्वे प्रौत्सर्गि-

केकवचनापत्तिवारणायाप्रत्ययपर्य्युदासः सार्थकः कृत्तद्धितान्तञ्चैवार्थवच्चकेवलाःकृतस्तद्धिताश्चेति भाष्यात् धात्वादीनां विशुद्धानामितिहरिकारिकाबलाच्चोत्तरसूत्रे एकार्थीभावेनलौकिकप्रयोगप्रसिद्धत्वमर्थवत्त्वम् तच्च न केवलकृत्तद्धितयोर्वर्त्तत इति नोक्तभाष्यादिविरोधः एकार्थीभावश्च शब्दविशिष्टा काचिच्छक्तिरेव वैशिष्ट्यञ्च स्वपर्य्याप्तत्व, स्वघटकशब्दनिष्ठशक्तिज्ञानाधीनज्ञानविषयत्वोभयसम्बन्धेन प्रतिष्ठानिष्ठाकृष्णसर्पादिसमासनिष्ठा शक्तिर्नैकार्थीभावरूपा किन्तु रूढिरेवसेति तत्र स्वघटकेत्यादिद्वितीयसम्बन्धाभावेऽपि नाव्याप्तिः राजपुरुषादिसमासनिष्ठा च राजसम्बन्धिपुरुषत्वावच्छिन्ननिरूपिता शक्तिरतिरिक्ता वर्त्तते वैयाकरणमते साच राजादिपदनिष्ठशक्तिज्ञानादेव ज्ञायत इति तत्र राजपुरुषपदविशिष्टत्वादेकार्थीभावत्वोपपत्तिः नच लक्षणात्मकशक्तावतिव्याप्तिः स्वं लाक्षणिकःशब्दस्तद्घटको व्यपदेशिवद्भावेन स एव तन्निष्ठशक्तिज्ञानाधीनज्ञानविषयत्व स्वपर्य्याप्तत्वोभयसम्बन्धेन शब्दविशिष्टत्वस्य तत्रापि सत्वादिति वाच्यं द्वितीयसम्बन्धस्याने स्वघटकविशिष्टत्वस्य निवेशात् वैशिष्ट्यञ्च स्वनिष्ठशक्तिज्ञानाधीनज्ञान विषयत्व स्वभिन्ननिष्ठशक्तिज्ञानाधीनज्ञानविषयत्वोभयसम्बन्धेन ।

तथाचैकार्थीभावात्मकशक्तिज्ञानाधीनबोधजनकत्वमुत्तरसूत्रेऽर्थवत्वम् परन्त्वस्मिन्मतेऽर्थवत्त्वद्वयोपस्थितिद्वयस्य विभिन्नरूपेण बोधद्वयं प्रति कारणता वक्तव्या अस्मिन् वक्ष्यमाणे च सूत्रद्वये एकस्मिन् अर्थवत्त्वे बोधद्वयं प्रत्येकस्या एकरूपेणैवार्थवत्त्वोपस्थितेः कारणत्वमितिलाघवम् किञ्च पूर्वसूत्रे प्रत्ययपर्य्युदासस्य कर्त्तव्यत्वेन गौरवम् अतएव वक्ष्यमाणार्थवत्त्वस्य गुरुशरीरकतया तदुपस्थितेरेकस्या अपि तदुपस्थितिद्वयसमतया न प्राचाम् गौरवमित्यपास्तम् किञ्चोपस्थितेर्योग्यताज्ञानादिकारणसहिताया एव कार्य्योत्पादकतया तत्र योग्यताज्ञानविशिष्टोपस्थितित्वेनोपस्थितिविशिष्टयोग्यताज्ञानत्वेन व विनिगमनाविरहात् का-

रणता द्वयं प्राचीनमते प्रत्ययभिन्नोपस्थितेराधिक्येन योग्यताज्ञानार्थव-
त्त्वोपस्थितिस्थाने योग्यताज्ञानार्थवत्त्वोपस्थितिप्रत्ययभिन्नोपस्थितीनां
प्रवेशेन तेषां विशेष्यविशेषणभावे विनिगमनाविरहात्कारणता
षट्कमित्यतिगौरवम् अतो नागेशेन सूत्रद्वये एतत्संज्ञाफलभूतविभ-
क्तीतरसमभिव्याहारानपेक्षयाऽर्थबोधजनकत्वमर्थवत्त्वमङ्गीकृतम् कृत्त-
द्धिताश्चैवार्थवदित्यादिभाष्यमप्यत्रैव प्रमाणम् । एतस्यार्थवत्त्वेन विव-
क्षितस्य या संज्ञा प्रातिपदिकसंज्ञा तत्फलभूता या विभक्तिस्तदित-
रानपेक्षयेत्यर्थः प्रत्ययमात्रस्य नार्थवत्त्वं यतस्तस्य या प्रातिपदिक-
संज्ञा तत्फलभूतविभक्तीतरा प्रकृतिस्तत्समभिव्याहारापेक्षयैवार्थव-
त्त्वात् रामेत्यादेः प्रातिप्रदिकसंज्ञाफलभूतविभक्त्यपेक्षत्वेऽपि तदित-
रानपेक्षयैवार्थबोधकत्वात् प्रातिपदिकत्वोपपत्तिः रमा गौरीत्यादौ
रम गौरेत्यस्य या संज्ञा प्रातिपदिकसंज्ञा तत्फलभूतविभक्तीतरष्टाप्
ङीप् तदपेक्षत्वेऽपि न प्रातिपदिकत्वहानि–स्तत्र विभक्तिपदस्य
प्रत्ययपरत्वात् नचेन्द्राणीत्यादाविन्द्रेत्यस्य या प्रातिपदिकसंज्ञा तत्-
फलभूतप्रत्ययेतरश्चानुगागमस्तत्समभिव्याहारापेक्षत्वेन प्रातिपदिक-
त्वानुपपत्तिरितिवाच्यम् एतत्संज्ञाफलभूतेतरेत्यस्यैव तत्र विवक्षणात्
प्रत्ययस्याप्रवेशादानुगागमस्य च प्रातिपदिकसंज्ञाफलभूतत्वेनादो-
षात् नचैधाञ्चक्र इत्यादावेधामित्यस्य या प्रातिपदिकसंज्ञा तत्फल-
भूतेतरत्वं चक्र इत्यस्य तत्समभिव्याहारापेक्षयैवार्थवत्त्वात् प्राति-
पदिकत्वोपयोग्यर्थवत्त्वाभावेनाप्रातिपदिकत्वात्सोरनुत्पत्तौ पदत्वा-
नापत्त्या वापदान्तस्येत्यनेन वैकल्पिकपरसवर्णानापत्तिरिति वाच्यं
एतत्संज्ञाफलभूतस्थाने एतन्निष्ठोद्देश्यतानिरूपितविधेयताश्रयस्य निवे-
शेन चक्र इत्यस्यैधाम्निष्ठोद्देश्यतानिरूपितविधेयताश्रयत्वस्यैव सत्वेना-
दोषात् नच कुम्भकार इत्यादौ कारेत्यस्य प्रातिपदिकत्वानापत्तिरर्थ-
वत्त्वाभावादतः कारेत्यस्य स्वनिष्ठोद्देश्यतानिरूपितविधेयताश्रयेतर-

कुम्भसमभिव्याहारेणैवार्थवत्त्वमिति वाच्यम् निरुक्तविधेयताश्रयेतरो यः पदेतरस्तत्समभिव्याहारेत्यर्थेनादोषात् एवञ्च तन्निभस्तन्मात्रमित्यादावुत्तरपदस्य पूर्वपदसापेक्षबोधजनकतयाऽर्थवत्त्वाभावेनाप्रातिपदिकत्वाद्विभक्त्यनुत्पत्तौ समासानापत्तिरपि निरस्ता पञ्चगवधन इत्यादौ पञ्चगवेत्यस्यार्थवत्त्वेन प्रातिपदिकत्वापत्त्या ङीबापत्तिस्तस्य धनापेक्षया बोधकत्वेऽपि धनस्य पदेतरत्वाभावादिति न वाच्यम् पदेतरेत्यस्य स्थाने पूर्वपदेतरस्य निवेशनीयत्वात् नचैतच्छब्दार्थस्याननुगतत्वेन यत्किञ्चिद्व्यक्तिघटितवाक्यार्थबोधे व्यक्त्यन्तरे प्रातिपदिकत्वानापत्तिः नचैतत्पदार्थमनिवेश्य प्रातिपदिकसंज्ञाफलभूतेत्यादेरेवनिवेश इति नाननुगम इति वाच्यम् राज्ञः पुरुषावित्यादौ राज्ञः पुरुषेत्यस्यापि प्रातिपदिकसंज्ञाफलभूता या औविभक्तिस्तदितरानपेक्षबोधजनकत्वेनार्थवत्त्वात्प्रातिपदिकसंज्ञापत्त्या राजप्रकृतिकविभक्तेर्लुगापत्तेः एतत्पदार्थप्रवेशे त्वावित्यस्य राज्ञः पुरुषेत्यस्य या संज्ञा तत्फलभूतेतरत्वात्तत्समभिव्याहारापेक्षयैव बोधजनकत्वेनादोषादिति वाच्यम् । शब्दविशिष्टत्वमर्थवत्त्वमिति स्वीकारेणानुगमसम्भवात् वैशिष्ट्यञ्च स्वतादात्म्य स्वविशिष्टसमभिव्याहारानपेक्षबोधजनकत्वोभयसम्बन्धेन तत्र वै० स्वनिष्ठोद्देश्यतानिरूपितविधेयताश्रयेतरत्व स्वावधिकपूर्वपदेतरत्वोभयसम्बन्धेन समन्वयः स्पष्टः नन्वेवं हरिष्वित्यादावपिहरिशब्दस्य स्वादिष्वसर्वनामस्थान इत्यनेन पदत्वात् सु रूपप्रत्ययस्याप्यर्थवत्त्वापत्तिः हरिशब्दस्य स्वावधिकपूर्वपदेतरत्वाभावेन स्वविशिष्टत्वाभावादिति चेन्न सुबन्तस्यैवपदशब्देन ग्रहणाद्धरिशब्दस्य स्वविशिष्टत्वात् नन्वेवमप्यार्त्रिष्वित्यादावत्रेरपत्यानीत्यर्थे प्रत्यस्य लुकि तद्धितान्तत्वात्प्रातिपदिकत्वेन प्रातिपदिकावयवत्वेन सुपो लुकि पुनः सुपि तत् प्रकृतेस्सुबन्तत्वस्य सत्वेन स्वविशिष्टत्वाभावात्तत्र सोः प्रातिपदिकत्वापत्तिरिति चेन्न स्वादिष्वितिपदत्वाभाववत्सुबन्तस्यैव पदशब्देन ग्रहणेना

दोषात् ननु सर्वं हि वाक्यं क्रियया परिसमाप्यत इति न्यायेनास्त्या
दिसमभिव्याहारेणैव घटः पट इत्यादावपि बोधकत्वात् कथं प्राति-
पदिकत्वं घटादिशब्दानामिति चेन्न समभिव्याहारपदेन पूर्वत्वपरत्व-
योरेव ग्रहणेनादोषात् घटइत्यादिना बोधेह्यस्त्यादिसान्निध्यमात्रम-
पेक्ष्यते न तु तत्पूर्वत्वं परत्वं वा प्रत्ययस्य बोधकत्वे तु प्रकृतिपरत्वम-
पेक्ष्यते तथाच स्वविशिष्टनिरूपितय्यँत्पूर्वत्वं परत्वम्वा तदन्यतरज्ञाना-
प्रयोज्यबोधजनकत्वं सम्बन्धः पर्य्यवसितः ननु बोधजनकता न स्वरूपयो-
ग्यतारूपा साहि बोधजनकतावच्छेदकानूपूर्व्वीमत्त्वरूपा सुरस्तीत्यादौ
सु शब्दस्य तादृश बोधकत्वात्तदवच्छेदकं सुत्वन्तद्वत्त्वस्य हरिष्वित्यादौ
सौ रपि सत्वात्प्रातिपदिकत्वापत्तेः नापि फलोपधायकत्वरूपा सा हि
कार्य्याव्यवहितप्राक्क्षणावच्छेदेनकार्य्याधिकरणवृत्तित्वरूपा तस्याः प्र-
तिबन्धकवशाद्बोधाभावे घट इत्यादावप्यसत्वेन प्रातिपदिकत्वानाप-
त्तेरिति चेन्न बोधजनकत्वप्रकारकतात्पर्य्यीयविशेष्यतावत्त्वस्य विवक्षित-
त्वात् घट इत्यादौ बोधाभावेऽपि तात्पर्य्यसत्वात् हरिष्वित्यादौ सुशब्दे
तादृशतात्पर्य्याभावाच्च नाव्याप्त्यतिव्याप्ती नच रामादिशब्दघटकरे-
फादावप्यपर्य्याप्त्या तात्पर्य्यीयविशेष्यतासत्वात्प्रातिपदिकत्वापत्तिरिति-
वाच्यम् तात्पर्य्यीयविशेष्यतापर्य्याप्त्यधिकरणत्वस्यैव निवेशात् नच
रामशब्दघटको रेफोऽर्थबोधकोभवत्विति तात्पर्य्यीयविशेष्यतापर्य्याप्ते-
रपि रेफे सत्वेन दोषतादवस्थ्यं समुदायतात्पर्य्यसत्वे तादृशतात्पर्यात्
बोधाभाव इत्यन्यदिति वाच्यम् तात्पर्य्यविशिष्टत्वस्य निवेशात्
वैशिष्ट्यम् स्वीयविशेष्यतापर्य्याप्त्यधिकरणत्व, स्वज्ञानजन्यतावच्छे-
दकविषयतावच्छेदकधर्म्मावच्छिन्ननिरूपितशक्तिपर्य्याप्त्यधिकरणत्वो-
भयसम्बन्धेन रेफे च तादृशविशेष्यतापर्याप्त्यधिकरणत्वेऽपि तात्पर्य-
ज्ञानजन्यतावच्छेदकविषयतावच्छेदकधर्म्मो रामत्वादिस्तदवच्छिन्ननि-
रूपितशक्तिपर्य्याप्त्यधिकरणत्वाभावात्, सम्बन्धद्वयसद्भावे प्रातिपदि-

कत्वस्येष्टत्वाच्च नह्यवयवापर्य्याप्तस्य समुदाये पर्याप्तिरिति रीत्या समुदायपर्याप्ता शक्तिस्तादृशी विशेष्यता वाऽवयवेऽपि पर्याप्त्या वर्त्तत एवेति तद्दोषताद-वस्थ्यमेवेति न वाच्यम् संज्ञाविधिस्थले उद्देश्यतावच्छेदकप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकीभूतधर्मावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगित्वं संज्ञाया भवतीति नियमात् प्रातिपदिकसंज्ञा स्वीयोद्देश्यतावच्छेदकीभूतार्थवत्त्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकीभूतधर्म्मावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिनी भवितुमर्हति पूर्वोक्तरीत्याऽप्यर्थवत्त्वपर्याप्तिर्या रामेति समुदाये वर्तते सैवावयवेऽपि तदनुयोगितावच्छेदकं रामेति समुदायगतं चतुष्ट्वमेव नरेफादिनिष्ठमेकत्वं न्यूनवृत्तित्वात् अन्यूनानतिरिक्तवृत्तिधर्म्मस्यैवावच्छेदकत्वात्तदवच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिन्यैव प्रातिपदिकसंज्ञया भवितव्यं तच्च समुदाये प्रातिपदिसंज्ञायां भविष्यति नावयवे तस्यां सत्यामित्यवयवस्य प्रातिपदिकसंज्ञाया अप्राप्तेः नच समुदाये जायमाना प्रातिपदिकसंज्ञोक्तरीत्याऽवयवेऽप्यस्त्येवेति कृतेऽप्यर्थवद्ग्रहणे धनंवनमित्यादौ प्रत्येकं वर्णेभ्यो विभक्त्युत्पत्तिर्दुर्वारेति वाच्यम् प्रातिपदिकात्प्रत्यय इत्यस्य प्रातिपदिकसंज्ञावन्निष्ठावधितानिरूपकपरत्वविशिष्टः प्रत्ययो भवतीत्यर्थः तत्रावधितायां प्रातिपदिकसंज्ञाया धर्म्मिपारतन्त्र्येण स्वपर्याप्त्यनुयोगितावच्छेदकधर्म्मावच्छिन्नानुयोगितानिरूपकपर्याप्तिप्रतियोगित्वसम्बन्धेनान्वयः प्रातिपदिकघटकवर्णात्प्रत्ययोत्पत्तौ वर्णनिष्ठावधितायां प्रातिपदिकसंज्ञापर्याप्त्यनुयोगितावच्छेकस्समुदायगतो धर्म्मस्तदवच्छिन्नानुयोगितानिरूपकपर्याप्तिप्रतियोगित्वम्बाधितमिति वर्णात्प्रत्ययोत्पत्तेरसम्भवात् वृक्षप्रचलनन्यायेन समुदायादेव प्रत्ययोत्पत्तेश्च । यत्तु एधामासतुः कल्पमित्यत्रासतुःकल्पेत्यस्य प्रातिपदिकत्वं न स्यादेधाम्समभिव्याहारेणैवार्थबोधजनकत्वे नार्थवत्त्वाभावादिति तन्न एधामासतुःकल्पेतिस-

समुदायस्य प्रत्ययान्तभिन्नतयाऽर्थवत्त्वेन च प्रातिपदिकत्वसम्भवात् समासग्रहणानियमेन वारणन्तु नोत्तरभागस्य स्वातन्त्र्येण प्रयोगार्हत्वाभावात् कृत्तद्धितेति सूत्रे प्रत्ययग्रहणपरिभाषाया अप्रवृत्तौ देवदत्तोगार्ग्य इत्यत्र गार्ग्यप्रकृतिकसुरहितस्य देवदत्तोगार्ग्येति समुदायस्य तद्धितान्तत्वेन प्रातिपदिकत्वापादनपरभाष्यासङ्गति—स्तस्य गार्ग्यप्रकृतिकविभक्त्यपेतयैवार्थबोधकत्वेनार्थवत्त्वाभावादिति तु न वाच्य न्तद्धितान्तस्य विशेषणमर्थवत्तदन्तबोधकं येनविधिस्तदन्तस्येति सूत्रात् तथाच गार्ग्यशब्दस्यार्थवत्वेन तदन्तस्य तद्धितान्तस्य देवदत्तोगार्ग्येति समुदायस्य प्रातिपदिकत्वापत्तेस्सम्भवात् नियमेन वारणन्तु न युक्तम् गार्ग्येत्युत्तरभागस्य स्वातन्त्र्येण प्रयोगार्हत्वाभावात् केचित्तु सूत्रद्वये वृत्तिमत्वमेवार्थवत्त्वमस्तु प्रत्ययपर्युदासोऽपि मास्तु प्रत्ययमात्रस्य प्रातिपदिकत्वेऽपि वृत्तिविरहस्तदर्थे लिङ्गसंख्यादेरभावेन ततो विभक्त्युत्पत्तेरसम्भवात् न चौत्सर्गिकमेकवचनापत्ति स्तस्य संख्यादेरनपेक्षणादिति वाच्यं प्रमाणसद्भावे एवौत्सर्गिकैकवचनप्रवृत्तेः प्रमाणाभावे तु एकं वक्तीति एकवचनमिति महासंज्ञानुरोधात् संख्यासद्भाव एव तस्याप्युत्पत्ते रभ्युपगमात् यथा अव्ययेभ्यस्तदुत्पत्तावव्ययादाप्सुप इत्यत्र सुब्ग्रहणं पचतिकल्पमित्यादौ तादृशभाष्यप्रयोगः प्रमाणं न तथा प्रकृते प्रमाणमस्ति नच कृत्तद्धितान्तस्यैवार्थवत्त्वकेवलाः कृतस्तद्धिताश्चेति भाष्यविरोधः वृत्तिमत्वस्य केवलप्रत्ययेऽपि सत्वात् इति वाच्यम् कृत्तद्धितान्तस्यैवार्थवदित्यस्य प्रातिपदिकमिति शेष-स्तथाच कृत्तद्धितान्त मेवार्थवत् प्रातिपदिकं भवति केवलाः कृतस्तद्धिता वा अर्थवन्तोऽपि न प्रातिपदिकसंज्ञका इत्यर्थात् कृत्तद्धितग्रहणाभ्यां प्रत्ययग्रहण परिभाषया तदादितदन्तोपस्थितौ कृदन्ततदादिरूपं तद्धितान्ततदादिरूपं च यदर्थवत्तस्य प्रातिपदिकसंज्ञेति कृत्तद्धितेति सूत्रार्थेन केवलस्य कृतस्तद्धितस्यचार्थवत्त्वेऽपि कृदन्ततदादित्वाभावात् व्यपदेशिवद्भावेन केवलयोः कृत्तद्धितयोस्तदन्तत्वेऽपि तदादित्वाभावात् नच तदादित्वमपि व्यपदेशि-

तद्भावेन स्यादतएव ध्यातिसे इत्यत्र से मात्रस्य-पदत्व-मिरियानित्यादौ-
प्रत्ययमात्रस्य तद्धितान्तत्वात्प्रातिपदिकत्वन्तथैवशब्दरत्ने प्रतिपादित-
ञ्चेति वाच्यम् घटकत्वघटितत्वयोरैवतेनातिदेशस्यान्यत्रोपपादितत्वात्
ध्यातिसे इरियानित्यादौ यथोद्देशपक्षस्यैवाश्रयणेन पदत्वप्रातिपदिकत्वोप-
पत्तिरित्याहुः नन्वर्थवद्ग्रहणस्य किं फलं धनम्वँनमित्यादौ प्रतिवर्णं प्राति-
पदिकत्वेऽपि लिङ्गसंख्यादेरभावेन वृत्तप्रचल नन्यायेन समुदायादेव विभ-
क्त्युत्पत्त्या-चावयवेभ्योविभक्त्युत्पत्त्यभावेन दोषाभावात् नापि प्रातिप-
दिकत्वे प्रातिपदिकाद्धात्वर्थे इति णिच् प्रत्ययापत्तिप्रत्याशा तत्करोति
तदाचष्ट इत्यनेन करणकर्म्माख्यानकर्म्मबोधकादेव करोत्याद्यर्थे तस्य-
विधानलाभेन निरर्थकात्तस्य प्राप्त्यसम्भवादिति चेन्न दशदाडिमानिषड्
पूपाइत्यादिनिरर्थकसमुदायस्य प्रातिपदिकत्वापत्त्या तदवयवस्य सुपो
लुगापत्तेः नच समासग्रहणनियमेन न दोष इति वाच्यम् दशदाडी-
त्येतन्मात्रसमुदायोत्तरभागस्य स्वातन्त्र्येण प्रयोगार्हत्वाभावेन तस्य
नियमेन वारणासम्भवात् तत्रप्रातिपदिकत्वापत्तेर्दुर्वारत्वात् यदि च
सुपो धातुप्रातिपदिकयोरित्यत्र धातु साहचर्येण प्रातिपदिकस्यापि
वृत्तिमत एव ग्रहणात्प्रकृते वृत्तेरभावेनादोषइत्युच्यते तदा साहचर्यपरि-
भाषाऽनित्यत्वज्ञापकन्तदित्यवेहि अधातुरित्यस्य वैयाकरणमते समासेऽ
तिरिक्तशक्तिस्वीकाराद्धातु प्रतियोगिकभेदवानित्यर्थः तस्याभेदेनार्थवत्य-
न्वयः नैयायिकमते न अर्थभेदे प्रतियोगितया धातोरन्वयः भेदस्यच स्वरूप
सम्बन्धेनार्थवत्यन्वयो नामार्थयोरभेदातिरिक्तसम्बन्धोऽव्युत्पन्न इत्य
स्य निपातातिरिक्तनामार्थविषयकतया प्रकृते न तद्विरोधः नञो भेद-
वति लक्षणयाऽभेदान्वयोवा नञर्थवत्त्वावच्छेदेन धातुप्रतियोगिको
भेदो न ज्ञा बोधयितुमशक्यः अर्थवत्त्वस्य धातुवृत्तित्वात् प्रतियोग्य
वृत्तिधर्मस्यैव भेदानुयोगितावच्छेदकत्वनियमात् अतएव द्रव्यत्वावच्छेदेन
घटत्वावच्छिन्नप्रतियोगिताकभेदतात्पर्येण द्रव्यं न घट इति न प्रयोगः
इति चेन्न उद्देश्यतावच्छेदकव्यापकत्वस्य नियमतो विधेये भानेन द्रव्य-

त्वरूपोद्देश्यतावच्छेदकव्यापकत्वस्य घटत्वावच्छिन्न प्रतियोगिताकभेद-
रूपविधेये बाधात्तादृशप्रयोगविरहोपपत्तावुक्तनियमानुपयोगेनापत्त्यभा-
वात् प्रकृते प्रातिपदिकसंज्ञाया एव विधेयतया भेदस्याविधेयत्वेनार्थ-
वत्त्वव्यापकत्वाभावेऽपिक्षतिविरहात् अर्थवत्त्वस्यानुयोगितावच्छेदक-
त्वाऽभावेऽपि तत्सामानाधिकरण्येनानुयोगितयास्सत्त्वे बाधकाभावाच्च
भेदविधेयस्थल एव तादृशनियमस्वीकारोऽतएवाघटं द्रव्यमानयेत्यादौ
द्रव्यत्वावच्छेदेन घटभेदप्रतीतिरित्यदोषाच्च अथ धातुप्रतियोगिकभे-
दवतोऽर्थवतः प्रातिपदिकत्वे भूधातुरेध् धातुर्नेति प्रतीतिविषयी
भूतस्यैध्धातुनिष्ठप्रतियोगिताकभेदस्यार्थवत्त्वस्य च भूधातौ सत्त्वेन
तस्य प्रातिपदिकत्वापत्तिः नचा-धातुपदे धातुत्वावच्छिन्नप्रतियोगि-
ताकभेदत्वावच्छिन्ननिरूपितशक्तिस्वीकारेण भेदे धातोः धातुत्वावच्छि-
न्नप्रतियोगिताकत्वसम्बन्धेनान्वयेन च धातुत्वावच्छिन्नप्रतियोगिता कभे-
दविशेषविशिष्टस्यैवार्थवतः प्रातिपदिकसंज्ञेत्यर्थलाभेन भेदस्य प्रतियो-
गितावच्छेदकेन सहविरोधाद्भूतौ धातुत्वावच्छिन्नप्रतियोगिताकभेद-
स्याभावेनापत्त्यभाव इति वाच्यं भूधातुर्धातुघटोभयन्नेतिविषयीभूत-
धातुत्वघटत्वोभयत्वावच्छिन्न प्रतियोगिताकभेदस्यधातुत्वावच्छिन्नप्रति-
योगिताकतया तस्य च धातावपि सत्त्वेनापत्तितादवस्थ्यात् नचोक्तभे-
दीयप्रतियोगितावच्छेदकमुभयत्वमेव न धातुत्वादिकमिति तं भेदमा-
दाय न दोष इति वाच्यम् यत्किञ्चिदुभयवतिदेशे घटपटौ नस्त
इति घटपटौ देवदत्तयज्ञदत्तौ नेति प्रतीत्यनापत्तेः प्रतियोगितावच्छे-
दकीभूतोभयत्वावच्छिन्नस्य· तद्देशे प्रतियोगितावच्छेदकीभूतोभय-
त्वस्य च घटपटयोस्सत्त्वात् न च सामानाधिकरण्येनोभयत्वविशे-
षणतया प्रतियोगितावच्छेदकतावच्छेदकतयैव घटत्वादेर्भानेनोक्ताप-
त्त्यभावेन न प्रतियोगितावच्छेदकन्धातुत्वमिति न दोष इति वाच्यं
धातुघटौ नस्त इति प्रतीतौ प्रतियोगिविशेषणतयैव तयोर्भानस्य
सर्वसम्मततयाऽवच्छेदकत्वस्यैव तयोस्सत्त्वाद्दोषापत्त्यवारणात् नच धातु-

त्वमात्रावच्छिन्नप्रतियोगिताकभेदवत एवार्थवतः प्रातिपदिकत्वविधा-
नाचोभयभेदमादायापत्तिसम्भवो यतोऽन्ययोगव्यवच्छेदो मात्र शब्दा-
र्थोऽन्यत्वंच समभिव्याहृतपदार्थापेक्षया योगस्सम्बँन्धस्सच समभिव्या-
हृतपदार्थो येन सम्बँन्धेन समभिव्याहृतपदाऽर्थेऽन्वेति स एव व्यव-
च्छेदोऽभावस्तथाच धातुत्वावच्छिन्नधातुत्वेतरधर्म्मानवच्छिन्नप्रतियोगि-
ताको भेद एव गृह्यते नोभयभेदस्तत्र धातुत्वेतरघटत्वावच्छिन्न त्वस्यैव
प्रतियोगितायां सत्वादितिवाच्यम् धातुत्वेतर धर्म्मावच्छिन्नत्व घटोभ-
याभावमादायोभयभेदस्य ग्रहणासम्भवेनापत्तितादवस्थ्यादितिचेन्न धातु-
त्वपर्य्याप्तावच्छेदकतानिरूपितावच्छेदकताश्रयप्रतियोगितानिरूपकभेद-
स्य ग्रहणेनादोषादुभयभेदीयप्रतियोगितावच्छेदकताया धातुत्व घट-
त्वोभयत्व रूपत्रितयपर्य्याप्तत्वेन धातुत्वापर्य्याप्तत्वात् नचोभयभेदी-
यप्रतियोगितावच्छेदकता धातुत्वादिप्रत्येकपर्याप्तैव न त्रितयपर्य्याप्ता
मानाभावादिति वाच्यम् घटः घटो न पटो नेति प्रतीति र्वं भवति
घटः घटपटौ नेति प्रतीतिर्भवतीति वैषम्यस्य त्रितयपर्याप्तावच्छेदक-
तामन्तरेणोपपत्त्यभावात् नच नह्यवयवापर्य्याप्तस्य समुदाये पर्याप्ति-
रस्तीतिन्यायाद्वस्तु गत्या च त्रितयपर्य्याप्ताऽपि प्रत्येकपर्य्याप्ताऽस्त्ये-
वेति वाच्यं धातुत्वगतैकत्वावच्छिन्नानुयोगिताकपर्य्याप्तिप्रतियोगयव-
च्छेदकतानिरूपितावच्छेदकताश्रयप्रतियोगिताकभेदस्यैव ग्रहणेनादोषात्
प्रकृतावच्छेदकताव या त्रितयपर्याप्ता सैवोक्तयुक्त्या धातुत्वपर्य्याप्ता
तस्याः पर्य्याप्तिरप्येकैव त्रितये विद्यमाना धातुत्वेऽपि वर्त्तते तदनुयोगि-
ताऽपि तथैव वर्त्तते एकैव च सा तदवच्छेदकञ्च तदन्यूनानतिरिक्त-
वृत्ति त्रितयगतं त्रित्वमेव न धातुत्वादिगतमेकत्व न्तस्य न्यू नवृत्तित्वा-
दितिसाऽवच्छेदकता न धातुत्वगतैकत्वावच्छिन्नानुयोगिताकपर्याप्तिप्र-
तियोगिनीति नोभयभे दमादाय दोष इति बोध्यम् नच तस्या अवच्छेद
कतात्वेनपर्याप्तिर्यद्यपि त्रित्वेव तथापि वस्तुत्वादिना तस्याः पर्याप्तिः
प्रत्यकमेव धातुत्वादिष्वित्ति तदनुयोगितावच्छेदकं धातुत्वादिगतमे-

कत्वमेवेति तद्दोषतादवस्थ्यमिति वाच्यम् स्वनिरूपितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन धातुत्वगतैकत्ववृत्तिप्रतियोगितानिरूपकभेदेत्यर्थेनादोषात् तथासति वस्तुत्वावच्छिन्नप्रतियोगिताकपर्याप्तेरग्रहणात् ननु सकलब्राह्मणव्यक्तिषु वर्त्तमानं ब्राह्मणत्वमेतद्ब्राह्मणवृत्तित्वविशिष्टब्राह्मणत्वत्वेनैतद्ब्राह्मणे एव यथा वर्त्तते तथा त्रितयपर्य्याप्ताप्यवच्छेदकता धातुत्ववृत्तित्वविशिष्टावच्छेदकतात्वेन धातुत्व एव वर्त्तत इति नोक्तदोषनिस्तारः नच सम्बन्ध घटकप्रतियोगिता अवच्छेदकतात्वमात्रावच्छिन्ना गृह्यते निरुक्ता तु धातुत्ववृत्तित्वावच्छेदकतात्वोभयधर्म्मावच्छिन्नेति तद्व्युदास इति वाच्यं पुनरप्युभयाभावमादाय दोषस्य सत्वात् अवच्छेदकतात्वपर्याप्तावच्छेदकतानिरूपितावच्छेद्यतावती प्रतियोगिता निवेश्यते सा तु अवच्छेदकतात्व धातुत्ववृत्तित्वोभयपर्याप्तावच्छेदकतानिरूपितावच्छेद्यतावतीति न दोष इत्यपि पूर्वोक्तदिशा दोषस्तमेवेति चेदत्रोच्यते अयं ब्राह्मण एतद्ब्राह्मणवृत्तित्वविशिष्टब्राह्मणत्ववान् एतद्ब्राह्मणवृत्तित्वविशिष्टपदार्थत्ववान् एतद्ब्राह्मणवृत्तित्वविशिष्टद्रव्यत्ववानित्याद्यनन्तप्रतीतिविषयीभूताऽऽधेयता एतद्ब्राह्मणवृत्तित्वावच्छिन्नैकैव नैतद्ब्राह्मणवृत्तित्वब्राह्मणत्वत्वाद्युभयधर्म्मावच्छिन्ना प्रतिप्रतीति भिन्नाऽनन्ताधेयताकल्पनाप्रसङ्गात् एतद्ब्राह्मणवृत्तिमानयं ब्राह्मण इति प्रतीतावेतद्ब्राह्मणवृत्तित्वावच्छिन्नाधेयतायाः क्लृप्तत्वात् नच प्रतीतिवैलक्षण्यानुपपत्तिः प्रकारतया भासमान ब्राह्मणत्वादिवैलक्षण्येन प्रतीति वैलक्षण्य सम्भवात् एवमेतद्व्यक्तिवृत्तिब्राह्मणत्ववानयं तद्व्यक्तिवृत्तिब्राह्मणत्ववान् स इत्यादिप्रतीतावपि एतद्व्यक्तिवृत्तित्वादिधर्म्मावच्छिन्नैवाधेयता नोभयधर्म्मावच्छिन्ना धर्म्मद्वयस्यावच्छेदकत्वे गौरवात् फलाभावाच्च न ब्राह्मणत्वत्वावच्छिन्ना सर्वासु व्यक्तिषु एतद्व्यक्तिवृत्तिब्राह्मणत्ववानित्यादिप्रतीत्यापत्तेः तथा प्रकृतेऽपि धातुत्ववृत्तित्वविशिष्टावच्छेदकतावद्धातुत्वमिति प्रतीतावपि

धातुत्वशक्तित्वावच्छिन्नैवाधेयता नावच्छेदकतात्वावच्छिन्ना नवा धातुत्ववृत्तित्वावच्छेदकतात्वोभयधर्म्मावच्छिन्नाऽतिप्रसङ्गात् गौरवाच्च तथाच प्रकृते स्वनिरूपितावच्छेदकतात्वावच्छिन्न-प्रतियोगिताकपर्याप्तिसम्बन्धावच्छिन्नाधेयतानिरूपिताधारतावच्छेदकत्वसम्बन्धेन धातुत्वगतैकत्ववृत्तिप्रतियोगितानिरूपकभेदेत्यर्थेन न दोष इति वाच्यम् किञ्च यथा त्रितयपर्याप्तावच्छेदकता धातुत्ववृत्तित्वेन धातुत्वपर्याप्तैव तथैव त्रितयपर्य्याप्तं त्रित्वमपि धातुत्ववृत्तित्वेन धातुत्वपर्याप्तमेवेति क्लृप्तत्वात्त्रित्वमेव तथाभूतं तथाभूतावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकत्वत्वेकत्वमिति पूर्वोक्तसम्बन्धेऽपि नदोष इत्यपिसाधु नचैवमपि धातुत्वेन घटो न धातुरिति व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकभेदमादाय धातोः प्रातिपदिकत्वं दुर्वारमेतद्भेदस्य निरुक्तभेदरूपत्वात् नच प्रतियोगिताया धातुनिष्ठत्वेन विशेषणान्न दोष एतद्भेदीयप्रतियोगिताया घटनिष्ठत्वादिति वाच्यम् धातुत्वेन भू एधनेति सामान्यधर्म्मावच्छिन्नप्रतियोगिताकविशेषभेदमादाय दोषस्य तादवस्थ्यात् तदीयप्रतियोगिताया धातुनिष्ठत्वात् नच धातुत्वव्यापकत्वेन प्रतियोगिता विशेषणीया निरुक्तभेदीयप्रतियोगिताचैधनिष्ठैव न धातुत्वव्यापिकेति न दोष इति वाच्यम् धातुत्वेन धातुघटोभयत्वेति भेदमादाय दोषस्य दुरुद्धरत्वादेतद्भेदीयप्रतियोगिताया धातुत्वव्यापकत्वादितिचेन्न प्रतियोगिनाऽभावस्य निरूपणादभावस्य प्रतियोगी निरूपको निरूपकतावच्छेदकश्च प्रतियोगिविशेषणतयाभासमानो धर्म्मस्तथाच धातुत्वविशिष्टो यो भेद इत्यर्थः वैशिष्ट्यञ्च स्वावच्छिन्नप्रतियोगितानिरूपकत्व स्वावच्छिन्ननिरूपकतानिरूपितनिरूप्यतावत्त्वेतदुभयसम्बन्धेन तादृशश्च भेदो धातुत्वेन धातुर्नेत्याकारक एवेति तदन्यभेदमादाय दोषानवकाशात् नच प्रदर्शितभेदीयनिरूपकताया अपि धातुत्वावच्छिन्नत्वात्तमादाय दोषो वज्रलेपायितः तत्रापि पर्याप्तिनिवेशे पूर्वोक्तरीत्याऽनिस्तार एवेतिवाच्यं धातुत्वगतैकत्ववृत्ति भेदवत

इत्यर्थेनादोषात् वृत्तिताच स्वप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रति-
योगिताक पर्य्याप्त्यनुयोगितावच्छेदकत्व स्वनिरूपकतावच्छेदकतात्वा-
वच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वोभयसम्बन्धेन समन्वयः
पूर्वोक्तप्रकारेणैवेत्यदोषात् अथ व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिता-
वच्छेदकताकं धातुत्वेन संयोगेन धातुर्न धातुरित्याद्याकारकं भेदमा-
दायापत्तिस्तस्य केवलान्वयित्वेन धातौ सत्वादितिचेन्न अवच्छेदकता-
याःस्वरूपसम्बन्धावच्छिन्नत्वेन विशेषणात् नच स्वरूपसंयोगोभयसम्बन्धे
न धातुत्वेन धातुर्नेतिभेदमादायानिस्तारः स्वरूपपर्याप्तावच्छेदकता
कावच्छेदकतायाः निवेशेनापि न निर्वाहः पूर्वोक्तयुक्त्या स्वरूपसंयोगो-
भयपर्याप्ताया अपि स्वरूपपर्याप्तत्वादिति चेन्नैवम् धातुत्वप्रतियोगि-
कस्वरूपसम्बन्धस्य धातुत्वरूपतया धातुत्वगतैकत्व निरूपितवृत्तिता-
वच्छेदकतया स्वनिरूपितप्रतियोगितावच्छेदकतावच्छेदकतात्वावच्छि-
न्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेकत्वरूपस्तृतीयोऽपि सम्बन्धो-
निवेश्यः निरुक्तोभयसम्बन्धावच्छिन्नावच्छेदकतावच्छेदकतात्वावच्छिन्न
प्रतियोगिताकपर्य्याप्त्यनुयोगिताच्छेदकताच धातुत्वरूपस्वरूपसंयोगो-
भयगत द्वित्व एव न तु धातुत्वरूपस्वरूपगतैकत्व इति नोभय-
सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकभेदमादाय दोषः नच धातु-
त्वेन घटो न घटत्वेन धातुर्नेति॰ प्रतीतिद्वयविषयीभूतभेदद्वयस्य
समनियतत्वेनैकतया तयोः श्च धातावपि सत्वेन तद्भेदस्य निरूपक-
तावच्छेदकताऽन्तिम–प्रतीतिमादाय प्रतियोगितावच्छेदकता–चाद्य
प्रतीतिमादाय तामेवादाय–प्रतियोगितावच्छेदकतावच्छेदकताच
धातुत्व एवास्तीति स भेद उक्तसम्बन्धत्रयेण धातुत्वगतैकत्वे वर्त्तत
इति तमादाय धातोः प्रातिपदिकत्वं दुर्वार मेवेति वाच्यम् धातुत्व-
गतैकत्ववृत्तिप्रतियोगितानिरूपकस्य भेदस्य विवक्षणात् वृत्तिता च
स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगिता वच्छेदकत्व
स्वावच्छेदकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगिता

वच्छेदकत्व स्वानुयोगितावच्छेदकाभावत्वावच्छिन्ननिरूप्यतानिरूपित-निरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेद-कत्वैतदुभयसम्बन्धेन स्वं प्रतियोगिता यस्याः प्रतियोगितायाः धातुत्वमवच्छेदकं तन्निरूपितानुयोगितावच्छेदकाभावत्वावच्छिन्ननिरू-प्यतानिरूपितनिरूपकतावच्छेदकं घटत्वं यन्निरूपितानुयोगितावच्छेद-काभावत्वावच्छिन्ननिरूप्यतानिरूपितनिरूपकतावच्छेदकं धातुत्वं तस्या अवच्छेदकञ्च घटत्वमिति नेयं प्रतियोगिता निरुक्तसंज्ञाप्रयोजककु-क्षिप्रविष्टा घटत्वावच्छिन्ननिरूपकताकभेदत्वावच्छेदेन धातुत्वावच्छिन्न-प्रतियोगितानिरूपकत्वं धातुत्वावच्छिन्ननिरूपकताकभेदत्वावच्छेदेन-चास्यभेदस्य घटत्वावच्छिन्नप्रतियोगिताकत्वमेवेति यावत् ॥

पूर्वसूत्रेणैवसिद्धे समासग्रहणन्नियमार्थमिति ॥

राजन् अस पुरुष इत्यादिसमासस्यार्थवत्सूत्रेण धातुभिन्नत्वप्र-त्ययभिन्नत्वप्रत्ययान्तभिन्नत्वार्थवत्वानां सत्वेन प्रातिपदिकत्वसिद्धिरि-त्यर्थः ननु राजन्अस पुरुष सित्यस्य प्रत्ययान्तत्वस्यैवसत्वात् कथं पूर्वसूत्रेण सिद्धिरिति चेन्न प्रत्ययग्रहणपरिभाषया प्रत्ययान्ततदादिभिन्नस्येत्यर्थेन प्रकृते प्रत्ययान्तत्वे ऽपि तदादित्वाभावात् ननु तदादित्वं प्रकृत्या-दित्वमेव तदप्यस्त्येव ङस् प्रकृतित्वं राजन्शब्दे समुदायस्य तदादि-त्वादिति चेन्न प्रत्ययविशिष्टत्वस्यैव तदादित्वपदार्थत्वात् वैशिष्ट्यञ्च स्वनिष्टचरमावयवतानिरूपकत्व स्वनिष्ठविधेयतानिरूपितोद्देश्यता-श्रयनिष्ठावयवतानिरूपकत्वोभयसम्बन्धेन राजन अस पुरुषसिति समुदाये हि आद्यसम्बन्धाभावात् ङसमादाय द्वितीयसम्बन्धाभावा-त्सुमादाय न प्रत्ययविशिष्टत्वम् ननु घटपटसमुदायो न घट इति प्रतीत्यभावात् स्ववृत्तिव्यासज्यवृत्तिधर्म्मावच्छिन्नानुयोगिताकः स्वप्रति-योगिकोभेदो नाङ्गीक्रियत इति प्रत्ययान्तसमुदायत्वावच्छिन्नानुयोगि ताकस्य प्रत्ययान्तप्रतियोगिकभेदस्याप्यभावेन कथं प्रत्ययान्तसमुदाये राजन ङस् पुरुषसित्यत्र प्रत्ययान्तभिन्नत्वमिति चेन्न प्रत्ययान्तसमु-

दायत्वे अनुयोगितावच्छेदकत्वमन्तरेणैव निरवच्छिन्नानुयोगिताकस्य तादृशभेदस्य सत्त्वे बाधकाभावेनादोषात् नन्वेवं निरवच्छिन्नानुयोगिताकभेदमादायैव घटपटसमुदायो नघट इति प्रतीत्यापत्तिरिति चेन्न उद्देश्यतावच्छेदकावच्छेदेनैव विधेयान्वयनियमेन प्रकृते भेदस्य विधेयत्वेन निरवच्छिन्नानुयोगिताकस्य तस्य भानासम्भवादत्र च भेदस्य विधेयत्वाभावा-द्वस्तुतः तद्व्यक्तित्वावच्छिन्नानुयोगिताक एव प्रत्ययान्तभेदः प्रत्ययान्तसमुदाये तमादायैव निर्वाहसम्भवात् न तथा पूर्वोक्तप्रतीतौ तद्व्यक्तित्वस्यानुल्लेखात् अत एव स्वाङ्गसमुदाये नस्वाङ्गत्वं सुसखिसमुदाये सखिभिन्नत्वमित्यादि प्रामाणिकशिरोमणेर्व्यवहारोपपत्तिः प्रत्ययान्तत्वप्रतियोगिकपर्य्याप्त्यनुयोगितावच्छेदकधर्म्मावच्छिन्नप्रतियोगिताक एव भेदोविषय-स्तस्य च सत्त्वे बाधकाभाव इति कश्चित् ॥

ननु विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते इति यथा स्वर्गकामो यजेत अहरहः सन्ध्यामुपासीदित्यादौ यागस्य सन्ध्योपासनस्य च प्रमाणान्तरेणाप्राप्तस्य विधानादनयोर्विधित्वम् व्रीहीन-वहन्ति समेयजतीत्यादौ तुषविमोकस्यावघातेन नखविदलनेन च सम्भवा-द्यदा नखविदलनेनैव तुषविमोकेच्छा तदाऽवघातस्याप्राप्तत्वात्पाक्षिकस्य तस्य विधाना-देवं यदा विषमदेश एव सौकर्य्यादिना यागकरणेच्छा तदाऽप्राप्तत्वात्पाक्षिकस्य समदेशाधिकरणकत्वस्य विधानाच्चानयोर्नियमत्व-मवघातेनैव तण्डुलनिष्पत्तावपूर्वोत्पत्ति र्न नखविदलनेन समदेशाधिकरणकयागेनैवापूर्वोत्पत्ति-र्न विषमदेशाधिकरणकयागेनेति नियम्यते पञ्च पञ्च नखा भक्ष्या इत्यादौ क्षुन्निवृत्त्यर्थं रागात् शास्त्रव्यापारमन्तरेणैव भक्षणं प्राप्तं तच्च भक्षणं पञ्चसु पञ्चनखेषु अन्यत्र च श्वमांसादिषु प्राप्तं बोध्यत इति परिसंख्या अत्रापि पञ्च पञ्च नखा एव भक्ष्या न श्वादय इतिनियमस्यैव प्रतीतेः कथन्नियमत्व-मिति शङ्का न कार्य्या भक्षणेनैव क्षुन्निवृत्ते-र्भक्षणस्य पाक्षिकत्वाभावेन नियमत्वासम्भवात्

एवञ्च प्रातिपदिकत्वस्य पाक्षिकत्वाभावात् कथं नियमः प्रत्युत— समासे वाक्ये च प्राप्तत्वात् परिसंख्यैव वक्तुं युक्तेरिति चेन्न अन्यनिवृत्तिरूपनियमसाधर्म्येणात्रशास्त्रे परिसंख्यायामपि नियमशब्देन व्यवहारात् नियमत्वमत्र शास्त्र यत् किञ्चिच्छास्त्रविशिष्टत्वं वैशिष्ट्यं स्वीयविधेयतावच्छेदकधर्म्मावच्छिन्नविधायकत्व स्वीयोद्देश्यतावच्छेदकव्याप्यधर्म्मावच्छिन्नोद्देश्यताकत्वोभयसम्बन्धेन समासग्रहणस्यार्थवच्छास्त्रविशिष्टत्वान्नियमत्वम् । वृद्धिरेचीत्यस्याद्गुणसूत्रवैशिष्ट्यवारणायादः ओमाङोश्चेत्यस्यैङिपररूपसूत्रवैशिष्ट्यवारणाय द्वितीयस्सम्बन्ध-स्तस्य च द्विविधा प्रवृत्ति-र्निषेधमुखेन विधिमुखेन च आदौ स्वीयोद्देश्यतावच्छेदकव्यापको यः स्ववैयर्थ्यप्रयोजकशास्त्रीयोद्देश्यतावच्छेदकव्याप्यो धर्म्म-स्तद्धर्मावच्छिन्नस्य स्वीयोद्देश्यतावच्छेदकधर्म्मावच्छिन्नातिरिक्तस्य स्वविधेयाभावो बोध्यते यथा समासत्वव्यापकोऽर्थवत्सूत्रोद्देश्यतावच्छेदकीभूतधातुभिन्नप्रत्ययान्तभिन्नप्रत्ययभिन्नार्थवत्त्वव्याप्यः पूर्वभागपदघटितसमुदायत्वधर्म-स्तदवच्छिन्नस्य समासत्वावच्छिन्नातिरिक्तस्य वाक्यस्य प्रातिपदिकत्वाभावो बोधनीयः समासग्रहणेन परन्त्वस्मिन् पक्षे वाक्ये प्राप्तस्य प्रातिपदिकत्वस्य बाधः समासस्य प्रातिपदिकसंज्ञेति योऽयं स्वार्थ स्तस्य त्यागः वाक्यस्य नेति परार्थकल्पनेति चिदोपयासात् विधिमुखेनैव सर्वत्र प्रवृत्ति नवीनाः स्वीकुर्वन्ति तत्र च पक्षे स्वीयोद्देश्यतावच्छेदकव्यापको व्यर्थताप्रयोजकशास्त्रीयोद्देश्यतावच्छेदकव्याप्यो यो धर्म्म-स्तद्धर्म्मावच्छिन्नातिरिक्तत्वेन व्यर्थताप्रयोजकशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने संकोचो भवति तथाच स्वीयोद्देश्यतावच्छेदकावच्छिन्ने शास्त्रान्तरेणाप्राप्तत्वात् स्वेन कार्यं विधीयते यथा प्रकृते धातुभिन्नप्रत्ययभिन्नप्रत्ययान्तभिन्नार्थवति पूर्वभागपदघटितसमुदायत्वरूपं यत्समासत्वव्यापकमर्थवत्वव्याप्य-स्तद्धर्मावच्छिन्नातिरिक्तत्वेन संकोचे समासे वाक्ये च न प्राप्तं प्रातिपदिकत्वं समासे समासग्रहणेन विधीयते वाक्ये च नैवेष्यते एवमेव सर्वत्र

समन्वयः कर्त्तव्यः॥ एतदेवोक्तं कौमुद्यां यत्रसंघातइत्यादिना। अत्रोत्तरभागः पूर्वभागप्रकृतिकप्रत्ययभिन्नोगृह्यते तेन जन्मवानित्यस्य न व्यावृत्ति-र्नापि राजा—इयानित्यस्य प्रातिपदिकत्वम् गवित्ययमाहेत्यादौ पूर्वभागस्य गवित्यस्याभेदानुकरणत्वेनापदत्वाद्व्यावृत्यनापत्त्या वृषणश्व इत्यादौ समासे वृषण्वस्वश्वयोरित्यनेन पूर्वभागस्य भत्वात्समासत्वव्यापकत्वस्य पूर्वभागपदघटितसमुदायत्वेऽभावाच्च यद्वा प्रकृतिप्रत्ययभावानापन्नसंघात इत्यादि मनोरमाकारेणोक्तम् अत्रोच्यते प्रकृतिप्रत्ययभावानापन्नत्वं प्रत्ययविशिष्टभिन्नत्वं वैशिष्ट्यं स्वनिष्ठचरमावयवतानिरूपकत्व, स्वनिष्ठविधेयतानिरूपितोद्देश्यताश्रयनिष्ठाद्यवयवतानिरूपकत्वोभयसम्बन्धेन तत्त्वञ्च राजन् असित्यस्य पुरुषस् इत्यस्य च तद्भिन्नत्वं राजनसपुरुषसित्यस्येति भवति प्रकृतिप्रत्ययभावानापन्नत्वं नचैवं रामेत्यस्यापि तदनापन्नत्वेन नियमात्प्रातिपदिकत्वानापत्तिरेवं बहुपटवइत्यस्यापि तत्त्वेन तत्त्वानापत्तिरिति वाच्यम्। प्रत्ययविशिष्टत्वस्यैव प्रकृतिप्रत्ययभावानापन्नत्वपदार्थत्वात् वैशिष्ट्यञ्च स्वघटितत्व स्वप्रकृतिघटितत्व स्वविशिष्टघटितत्वैतत्तृतयसम्बन्धेन। तत्रवैशिष्ट्यं स्वावयवाघटितत्व स्वप्रकृत्यवयवाघटितत्व, स्वान्तप्रकृतिकेतरत्वैतत्तृतयसम्बन्धेन राजन् अस् पुरुषसित्यत्र सुप्रत्ययस्य तृतीयसम्बन्धो राजन्शब्दमादाय सम्बन्धद्वयञ्च स्पष्टमेव बहुपटव इत्यत्र तृतीयसम्बन्धाभावात्तत्वम्। रामेत्यत्र चोदासीन प्रत्ययस्य तृतीयसम्बन्धसत्वेप्याद्यसम्बन्धाभावान्नतत्त्वम् नवीनैश्चोक्तदोषद्वयेन मूलोक्तं विहाय स्वातन्त्र्येण प्रयोगार्हपूर्वोत्तरभागकसमुदायस्य चेत्समासस्यैवेति नियमाकार उक्तः बहुपटव इत्यत्र बहुवः प्रयोगार्हत्वेऽपि स्वातन्त्र्येणतत्वाभावात् अनीतपरस्याप्यनुकरणस्य सत्वेन गवित्ययमाहेत्यादौ गवित्यस्य स्वातन्त्र्येण प्रयोगार्हत्वाज्जन्मवान् पुत्रकाम्येत्यादावुत्तरभागस्य तत्वाभावात् वृषणश्व इत्यत्र पूर्वोत्तरभागस्य तत्वान्नदोषः स्वातन्त्र्येणप्रयोगार्हत्वञ्च न स्व-

प्रकृतिकप्रत्ययेतरसमभिव्याहारानपेक्षबोधजनकत्वं देवदत्तोगार्ग्य इत्यत्र गार्ग्येत्यस्यापि तत्वापत्त्या देवदत्तोगार्ग्येति समुदायस्य समासग्रहण-नियमेनैव प्रातिपदिकत्वानापत्त्या प्रत्ययग्रहणपरिभाषाया अभावे तद्व्यु-तान्तत्वात् प्रातिपदिकत्वापादनपरभाष्यासंगत्यापत्तेः किन्तु यस्य समु-दायस्य स्वातन्त्र्येणप्रयोगार्हपूर्वोत्तरभागकसमुदायत्वं विवक्षितं तस्य या संज्ञा तत्फलभूतविभक्तीतरसमभिव्याहारानपेक्षबोधजनकत्वं राज्ञः पुरुष इत्यादिवाक्यस्य समासस्य च या संज्ञा तत्फलभूतविभ-क्तीतरानपेक्षयाऽर्थबोधकत्वाद्राज्ञ इत्यस्य पुरुषइत्यस्य च स्वात-न्त्र्येणप्रयोगार्हत्वं सुघटम् नच कुम्भकार इत्यादौ समासे कारेत्यस्य पूर्वपदसमभिव्याहारेणैवबोधकत्वा-त्तत्वाभावेन तादृशसमुदायत्वस्य-समासत्वव्यापकत्वानापत्तिरिति. वाच्यम् विभक्तीतरपदार्थे पूर्वपदेतर-त्वस्य विशेषणत्वात् नच प्रभवतीति वाक्ये प्रेत्यस्य भवतिसम-भिव्याहारेण बोधकत्वा—त्तत्वाभावेन नियमानाक्रान्ततया प्रातिपदि कत्वापत्तिरिति वाच्यं यत्किञ्चित्समुदायविशिष्टत्वस्यैव तत्वात् वैशिष्ट्यञ्च स्वघटकत्व घटकप्रकृतिकप्रत्ययेतरत्व स्वविशिष्टसमभि-व्याहारानपेक्षबोधजनकत्वैतत्तृतयसम्बन्धेन तत्र वैशिष्ट्यं स्वनिष्ठ-संज्ञाफलभूतविभक्तीतरत्व स्वाघटकत्वोभयसम्बन्धेन राज्ञः पुरुष इत्यादिसमुदायमादाय तद्घटक- पूर्वोत्तरभागे समन्वयः कर्त्तव्यः प्रभवति पञ्चगवधनः कुम्भकार इत्यादौ भवति धन कुम्भापे-क्षबोधजनकत्वस्य प्रादीनां सत्वेऽपि भवतीत्यादीनां तत्समुदा-याघटकत्वाभावात् कुम्भकारेति समासप्रकृतिकविभक्तिसापेक्षबो-धजनकत्वेन कारेत्यस्यतत्त्वानापत्त्या स्वनिष्ठसंज्ञाफलेत्यादि देवद-त्तोगार्ग्य इत्यत्र देवदत्तोगार्ग्येति समुदायविशिष्टो गार्ग्यप्रकृतिकः सुपत्यय-स्तत्समभिव्याहारेणैवबोधकत्वा-त्तत्वाभावेन न प्रत्ययग्रहण-परिभाषा प्रयोजनपरभाष्यासंगतिः रामेति समुदायघटक रा मेत्यनयो स्तत्वापत्तिवारणाय स्वाघटकत्वस्थाने स्वघटकपदभिन्नत्वन्देयम् ।

नन्वेवं देवदत्तेन कृतमित्यत्र देवदत्तेन कृतेत्यस्य कृद्ग्रहणपरिभाषया
कृदन्ततदादितया प्रातिपदिकत्वापत्तिः कृतेत्यस्योक्तयुक्त्या तत्वाभावेन
नियमानाक्रान्तत्वात् देवदत्तोगार्ग्येतिव-द्देवदत्तेन कृतेत्यस्याप्यर्थव-
दन्तत्वाच्चेति चेदत्रोच्यते । देवदत्तेनकृतमित्यत्र कृतप्रकृतिकविभक्त्य-
र्थसंख्यान्वयात्प्रागेव देवदत्तेनेत्यस्य कृ धात्वर्थेऽन्वयो धातुना क्रिया-
यास्साध्यत्वेन भानात्साध्यस्य च साधनाकाङ्क्षत्वात् तदुत्तरं देवदत्त-
कर्तृककरणकर्म्मत्वावच्छिन्ने देवदत्तेन कृतेत्येतत्प्रतिपाद्ये कृतप्रकृतिक
विभक्त्यर्थ संख्याया अन्वयः देवदत्तोगार्ग्य इत्यत्र च समानविभक्तिक प्राति-
पदिकार्थेऽभेदान्वयादन्तरङ्गत्वात् गार्ग्यपदार्थे गर्गापत्ये विभक्त्यर्थान्वये
एव देवदत्तस्यैकत्वविशिष्टे गर्गापत्येऽन्वयः स्वनिष्ठसंज्ञाफलभूतविभ-
क्तीत्यस्यस्थाने स्वप्रतिपाद्यतावच्छेदकधर्म्मावच्छिन्नविशेष्यतानिरूपित
संख्यानिष्ठप्रकारताप्रयोजकविभक्तीतिदेयं तथाच देवदत्तेन कृतेत्येतत्प्र-
तिपाद्यतावच्छेदकदेवदत्तकर्तृककरणकर्म्मत्वावच्छिन्नविशेष्यतानिरू-
पितसंख्यानिष्ठप्रकारताप्रयोजकत्वमेव कृतपदोत्तरविभक्ते-स्तदितरानपे-
क्षयैवबोधकत्वात् कृतेत्यस्यतत्त्वम् । देवदत्तोगार्ग्येत्येतत्प्रतिपाद्यताव-
च्छेदकमेव नास्ति तदवच्छिन्नविशेष्यतानिरूपितसंख्यानिष्ठप्रकारताप्र-
प्रयोजकत्वं तु सुतरां गार्ग्यप्रकृतिके प्रत्यये नास्तीति तदितरत्वमेवतस्य
तदपेक्षयैवचगार्ग्यस्य बोधकत्वा-त्तत्वाभाव इति तयोर्वैषम्येनादोषा-
दित्यलम् ॥

सरूपाणामेकशेषएकविभक्तौ ॥

एकविभक्ताविति सारूप्ये उपलक्षणं नतु एकशेषे विशेषणन्त-
थाचैकविभक्तौ सरूपाण्येव यानि प्रातिपदिकानि तेषामेकः शिष्यते
इत्यर्थ इत्यनैमित्तिकत्वेन विभक्त्युत्पत्तेः प्रागेवैकशेषः एकविभक्ता
वित्यस्याभावे हरितवर्णवाचकहरिणीशब्दहरिणस्त्रीवाचकहरिणीश-
ब्दयोस्तद्धितादौ वैरूप्येणैकशेषानापत्तिः वृद्धोयूनेति सूत्रादेवकारा-
पकर्ष-स्तदभावे जननीवाचकमातृशब्दपरिच्छेतृवाचकमातृशब्दयो-

र्थ्यामाद्वावेकविभक्तौ सारूप्यादेकशेषापत्ति–स्तत्सत्त्वे तु न औजसादौ
वैरूप्यस्यापि सत्वात् अथैत्वकारार्थस्य क्वान्वयः न सरूपपदार्थे
सरूपारब्धसमुदाये तथासति सरूपारब्धसमुदायघटकस्सरूपारब्ध-
समुदायेतराघटक एक शिष्यत इत्यर्थे मातृमात्रोरापत्ति वा-
रणाभावादेवकारापकर्षणस्य वैयर्थ्यापत्ते–र्नेवा सरूपे ऽन्वयस्ता-
वतापि सरूपारब्धस्सरूपेतरानारब्धोयस्समुदायस्तद्घटक इत्यर्थेनो-
क्तापत्तेरवारणात् एकमातृशब्दस्यापरमातृशब्दसरूपत्वेन सरूपेतर-
त्वाभावा-न्नापि सारूप्येऽन्वय–स्तथाच सारूप्यमेव येषान्तैरारब्धो य-
स्समुदायस्तद्घटकइत्यर्थस्सारूप्यवान्यः सारूप्येतराभाववान् तदा-
रब्धसमुदायघटक इति यावत्तेनाप्युक्तापत्तेरवारणात् एकस्यैव मातृ-
शब्दस्य च सारूप्यं स्वसारूप्येतराभाववत्त्वञ्च वर्त्तत एव तदारब्धश्च
मातृमातृसमुदायस्तद्घटकत्वान्मातृशब्दस्येति चेदत्रोच्यते सरूपाणा-
मेक इत्यस्य शब्दविशिष्टसमुदायघटक एकः शिष्यत इत्यर्थः वैशिष्ट्यञ्च
स्वघटितत्व स्ववृत्तिरूपाभाववदघटितत्वोभयसम्बन्धेनास्मिँश्चार्थे
मातृमातृसमुदाय एकशेषः प्राप्त-स्स्ववृत्तिरूपवत्त्वसत्वे स्ववृत्तिरूपाभा-
ववत्त्वस्याभावात् स्ववृत्तिरूपाभाववान्मातृशब्दो–नापि तु घटादि-
स्तदघटितत्वात् अत एवकारस्य सम्बन्ध–स्सव सरूपपदस्य शब्द-
विशिष्टस्समुदायोऽर्थ इत्यत्र तात्पर्यग्राहकः वैशिष्ट्यञ्च स्वारब्धत्व
स्ववृत्तिरूपविशिष्टरूपवदनारब्धत्वोभयसम्बन्धेन तत्रवैशिष्ट्यं स्वभि-
न्नत्व स्वाश्रयप्रकृतिकविभक्तिसजातीयविभक्त्यव्यवहितपूर्ववृत्तित्वो
भयसम्बन्धेन द्वितीयसम्बन्धे तात्पर्य्यग्राहकमेकविभक्ताविति पदम्
मातृमातृसमुदाये एकस्यांविभक्तौ परे मातारत्वमपरस्यां तस्याम्मातर-
त्वन्तयोर्भिन्नत्वमेकविभक्त्यव्यवहितपूर्ववृत्तित्वञ्चेति न तत्रैकशेषः
नच जराशब्दे एकशेषानापत्ति–रेकस्य ङे परे जरस्त्व–मपरस्य ङे परे
जरात्वं जरसादेशस्य वैकल्पिकत्वात् तथाच स्ववृत्तिरूपं जरस्त्वं
तद्विशिष्टमुक्तोभयसम्बन्धेन जरात्वं तद्वज्जराशब्द–स्तदनारब्धत्वा-

भावादिति वाच्यं स्वभिन्नत्वस्थाने स्वविशिष्टभिन्नत्वसम्बन्धस्य विवक्षितत्वात् वैशिष्ट्यञ्च स्वसामानाधिकरण्य स्वाश्रयप्रकृतिक-विभक्तिसजातीयविभक्त्यव्यवहितपूर्ववृत्तित्वोभयसम्बन्धेन तथाच यस्य जराशब्दस्य यस्यांविभक्तौ जरस्त्वं तस्य 'तस्यांविभक्तौ जरात्वमपीति भवतिजरस्त्वरूपविशिष्टमुक्तोभयसम्बन्धेन जरात्वं तद्भिन्नत्वं जरात्वे नास्ति नापि जरस्त्वरूपविशिष्टभिन्नत्वं जरस्त्वे एवं जरात्वरूपवि-शिष्टभिन्नत्वमपि जरस्त्वे जरात्वे वा नास्तीति स्ववृत्तिरूपस्य स्ववि-शिष्टभिन्नत्व स्वाश्रयप्रकृतिकविभक्तिसजातीयविभक्त्यव्यवहितपूर्व-वृत्तित्वोभयसम्बन्धेन विशिष्टं घटत्वादिकमेव तद्वदनारब्धत्वस्य जरा-जरासमुदाये सत्वादेकशेषसिद्धेः ननु नित्यबहुवचनान्त-दारशब्दस्य सर्ववचनान्त-दारशब्देन सहैकशेषापत्तिरिति चेन्नेष्टत्वेनापत्त्यभावात् न च संज्ञाभूतसर्वशब्दस्य सर्वनामसर्वशब्देन सहैकशेषानापत्तिरिति वाच्य—त्तत्रानिष्टत्वेनापत्त्यभावात् नच नित्यद्विवचनान्त पुष्पवन्त-शब्दस्य नित्यैकवचनान्तैकशब्देन सहैकशेषापत्तिरिति वाच्यं स्ववृत्ति-रूपाभाववदनारब्धत्वस्यापि तृतीयसम्बन्धस्य शब्दवैशिष्ट्यनियामक-तयाभ्युपगमेनापत्त्यभावात् तथाच स्वारब्धत्व स्ववृत्तिरूपविशिष्ट-रूपवदनारब्धत्व स्ववृत्तिरूपाभाववदनारब्धत्वैतत्तृतयसम्बन्धेन शब्द-विशिष्टसमुदाय घटक एकशिष्यते सम्बन्धघटकवैशिष्ट्यञ्च स्ववि-शिष्टभिन्नत्व स्वाश्रयप्रकृतिकविभक्तिसजातीयविभक्त्यव्यवहितपूर्ववृ-त्तित्वोभयसम्बन्धेन पुनर्वैशिष्ट्यं स्वसामानाधिकरण्य स्वाश्रयप्रकृतिक-विभक्तिसजातीयविभक्त्यव्यवहितपूर्ववृत्तित्वोभयसम्बन्धेनेति निष्कर्षः ॥ उद्भूतावयवभेदकघटसमुदायादौ घटादिपदस्य शक्तत्वादेकशेषं विनापि घटौ घटा इत्यादयः प्रयोगाः पृथ्वीशान्तिसमुदायनिरूपित-शक्तेः क्षमाशब्दे सत्वेन तादृशसमुदायबोधनेच्छया क्षमयोरितिप्रयोग एकशेषं विनापि सिद्धः तादृशसमुदाये घटघटेत्यस्य क्षमाक्षमेत्यस्य च शक्त्यभावात् प्रत्यर्थं शब्दाभिनिवेश इत्यभ्युपगमेऽपि न घटघटावि-

त्यादयः तमान्तमे इत्यादयश्च प्रयोगा इति सरूपाणामित्यस्य प्रत्या-
ख्यानमेव-मेवैकशेषविधायकानि सर्वाणि शास्त्राणि प्रत्याख्यातानि ॥

अट्कुप्वाङ्नुम्व्यवायेऽपि ॥

रेफषकाराभ्यां परस्य नस्य णत्वं भवत्यट्कवर्गपवर्गाङ्नुम्भिर्व्य-
वाये ताभ्यामव्यवहितोत्तरस्य च नस्य णत्वमित्यर्थः अपि शब्दोरषा-
भ्यां नोणस्समानपदे इत्यर्थसमुच्चायकः नन्वादर्शनेत्यत्राटा व्यवाय-
सत्वाचस्य णत्वं स्या-चन्वडाद्यतिरिक्तव्यवाया-च णत्वमिति वाच्यम-
डादिव्यवाये णत्वमित्यर्थस्यैव सूत्रतो लाभेनाडाद्यतिरिक्तव्यवाये न
णत्वमित्यर्थस्य-चालाभेनाडाद्यतिरिक्तव्यवायस्य वाधकत्वाभावादिति
चेन्न रषाभ्यामिति पञ्चमीनिर्द्देशेनोपस्थितया तस्मादित्युत्तरस्येति
परिभाषया रेफषकाराव्यवहितोत्तरत्वं नकारे विशेषणमुपस्थाप्यते
ततश्च रेफनकारयोः षकारनकारयोश्च वर्णान्तरकर्तृकव्यवधानशून्यत्वं
लब्धम्, अटकुप्वाङ्नुम् व्यवाये इत्यनेनाडादिवर्णकर्तृकव्यवधानवत्वं-
लब्धं तथाच रेफषकाराभ्यामव्यवहितोत्तरस्य सतोऽडादिव्यवहितस्य
नस्य णत्वमित्यर्थः पर्य्यवसन्नः व्यवहिताव्यवहितत्वस्य विरोधात्सूत्रं
व्यर्थं स्यादतोऽट्कुप्वाङ्नुम् व्यवायेऽपीत्यनेन वर्णान्तरे अडाद्यतिरि-
क्तत्वमात्रं बोध्यते ततश्चाट्कुप्वाङ्नुम्भिन्नवर्णकर्तृकव्यवधानशून्यस्य
रषाभ्याम्परस्य नस्य णत्वमिति पर्य्यवसितन्तेनादर्शनेत्यादावडाद्य-
तिरिक्तशकारव्यवायान्न णत्वम् । एतदेवाभिप्रेत्य भाष्यकृतोक्तम् णत्व-
ऽन्यव्यवाये प्रतिषेधो वक्तव्यो नवा ऽन्येन व्यवहितत्वादिति । अयं
प्रकारः शेखरकारस्य, भाष्ये चुटुतुलशर्व्यवायेनेत्येव सिद्धे अटकुप्वा-
ङ्नुमित्युक्त्या ऽटैव व्यवाय इत्यर्थो बोध्यते तेनादर्शनेत्यत्र णत्वं
वारितम् तच्च शेखरकारेणैकदेश्युक्तमित्युक्तम् तत्र हेतुरुक्तः निषेधे
प्रतियोगिज्ञानस्यापेक्षणात् मात्राणांसाम्याच्च क्रियमाणन्यासस्य गुरुत्वा
त्तेन कृतन्यासवैयर्थ्योद्भावनमयुक्तमिति ? भाष्ये ऋवर्णान्तस्य णत्वं
वाच्यमित्यस्य प्रत्याख्यानाय व्यवाये इति योगः व्यवाये णत्वमिति

तदर्थस्तेन मातृणामित्यादौ ऋकारैकदेशाज्भागव्यवहितस्य रेफात्परस्य नस्य णत्वसिद्धि रनेनैव योगेन सिद्धेऽट्कुप्वाङ्नुमिति आनरसमाम्नायिकैर्व्यवायेचेदडादिभिरेव व्यवाय इति नियमार्थन्तदा आदर्शेनेत्यादौ न णत्वप्राप्तिरित्यपि शेखरे उक्तम्, अत्रेदं क्रमेण विचार्य्यते ।

परिभाषोपस्थापिताव्यवहितपदार्थैकदेशव्यवधानकर्तृतयाक्षिप्तवर्णेऽडाद्यतिरिक्तत्वेन संकोचे ऽडाद्यतिरिक्तवर्णकर्तृकव्यवधानशून्यस्य नस्येत्यर्थे ऽधिकपदार्थावगाहनाद्गौरवं स्यादतो विरोधे सति श्रौतेनाट्कुप्वाङ्नुम्व्यवाये इत्यनेन ङ्याप्प्रातिपदिकादित्यादौ षष्ठ्यर्थांशस्येवात्राव्यवहितत्वांशस्य बाध एव युक्तस्तथा सति अडादिव्यवहितस्य नस्येत्यर्थेन बोधे ऽल्पपदार्थावगाहनाल्लाघवम् । किञ्च वर्णस्याक्षिप्तत्वेन शाब्दबोधे भानस्यैव सन्दिग्धत्वेन तत्र संकोचस्य शाब्दिकशैलीविरुद्धत्वम् । किञ्च वर्णे तथा संकोचे रषाभ्यामिति सूत्रं व्यर्थं नचात्र सम्बन्धार्थं सूत्रमिति वाच्य-न्तावतापि योगविभागवैयर्थ्यस्य तादवस्थ्यात् शेखरोक्तप्रकारो न युक्तः यच्च भाष्योक्तमेकदेश्युक्ततया तिरस्कृतं शेखरकृता तत्पर्य्यालोच्यताम् । चुटुतुलशर्व्यवायेनेति वाक्यं चेद्वैयर्थ्योपपादकन्तदा गौरवन्तद्वेव न अस्य हि एतैः प्रत्येकं यथासम्भवमिलितैर्वा व्यवायेनेत्यर्थः एतैरेव व्यवायेनेत्यर्थो वा न प्रत्येकमिति पक्षः मृत्स्नेत्यादौ चवर्गादिद्वयव्यवधाने णत्वापत्ते-र्चं यथासम्भवमिलितैरिति पक्ष-स्तथासत्यादर्शनेत्यत्र फलभेद-स्सिद्धान्ते णत्वप्राप्तेरिदानीमप्राप्तेश्च नाप्येतैरेवेति पक्षः, आदर्शेनेत्यत्र फलभेदाभावेऽपि चुटु●हणस्य वैयर्थ्यापत्तेः चवर्गमात्रव्यवाये टवर्गमात्रव्यवाये उदाहरणस्यैवाभावात्, आर्द्धात् मूर्धः कृत्स्नः मृत्स्नेत्युदाहरणस्यैवलाभात् तस्मात् तुशर्व्यवायेनेत्येव वैयर्थ्योपपादकं एतावन्मात्रव्यवाये नेत्यर्थः पदव्यवायेनेत्यस्यानन्तरमस्य पाठेन नेत्यपि न वक्तव्यन्तथा च लाघवसत्वेन वैयर्थ्योपपादकत्वं युक्तमेवेति नैकदेश्युक्तत्वम् भाष्यचुटुतुलशर्व्यवायेनेत्युक्तिस्तु अडादिभिरेव व्यवाये णत्वमित्यर्थात् यत्र

न भवति तत्प्रदर्शनार्थेति अयमेव पक्षो युक्तः, इदानीं तृतीयः पक्षो विचार्य्यते नियमाकारस्तु आत्तरसमाम्नायिकैर्व्यवाये—चेदेतैरेवाडादिभिरिति ततश्च मातॄणामित्यादौ वर्णैकदेशेन व्यवायेऽप्यात्तरसमाम्नायिकैर्व्यवायाभावान्न नियमेन व्यावृत्तिः आर्द्रौदित्यादौ चात्तरसमाम्नायिकैर्व्यवायसत्वान्नियमेन व्यावृत्ति-रेवमादर्शेनेत्यादावप्यात्तरसमाम्नायिकैर्व्यवायादडादिभिरेव व्यवायाभावान्न णत्वं रामेणेत्यादावेतैरेव व्यवायाण्णत्वमुपपद्यत इति शेखरकृन्मतम्, यच्चेदं दृश्यतां नियमेनान्यस्य व्यावृत्तिर्भवति न तु स्वीयोद्देश्यतावच्छेदकधर्म्मावच्छिन्नस्य कस्यचित् यथा समासग्रहणनियमेन समासातिरिक्तस्य वाक्यस्यैव व्यावृत्तिर्न तु स्वीयोद्देश्यतावच्छेदकावच्छिन्नस्य कस्य चिदेवं धातोस्तन्निमित्तस्यैवेत्यनेन यादि प्रत्ययनिमित्तस्य धातुसम्बन्ध्येचो न व्यावृत्ति-रपित्वन्यस्यैवौयत औयत इत्यादे-रेवमनेनापि नियमेन स्वीयोद्देश्यतावच्छेदकं यदडादिव्यवहितनत्वं तदवच्छिन्नातिरिक्तस्यैवार्द्रौदित्यादेर्व्यावृत्तिस्स्यान्न तु तदवच्छिन्नस्यादर्शेनेत्यस्येति तत्र णत्वं स्यादेवेत्यादर्शेनेत्यादौ तु प्राप्तिरेवनेति शेखरोक्तं चिन्त्यमेवैतत्फलितमेव नियमस्थले व्यर्थशास्त्रीयोद्देश्यतावच्छेदकव्यापकं व्यर्थताप्रयोजकशास्त्रीयोद्देश्यतावच्छेदकव्याप्यं यद्रूपं तदवच्छिन्नातिरिक्तत्वेन व्यर्थताप्रयोजकशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने संकोचं कृत्वा स्वीयोद्देश्यतावच्छेदकावच्छिन्ने शास्त्रान्तरेणाप्राप्तं कार्यं विधत्ते नियमशास्त्रम् । समन्वयोन्यत्र स्पष्ट इति दिक् ॥

नामि ॥

अत्राङ्ग्रहणाभावे चर्म्मणामित्यादौ मकाराकारस्य दीर्घापत्तिः न चार्थवद्ग्रहणपरिभाषया ऽर्थवन्नामो ग्रहणेनानर्थकत्वान्न दोष इति वाच्यम् नमधातोः क्विप्यानुनासिकस्येति दीर्घे देवदत्तनामित्यादौ दीर्घापत्ते-रतो भिस इत्यत्राङ्ग्रहणाभावे ब्राह्मणभिस्सित्यत्र दोषदानपरभाष्येणात्र प्रकरणे ऽर्थवत्परिभाषाया अप्रवृत्तिबोधनाच्चान्यथाऽ

नर्थकस्य भिसोऽग्रहणेन भाष्यासङ्गत्यापत्ति-रत एव भाष्यात्प्रत्ययाप्रत्य-
ययोः प्रत्ययस्यैव ग्रहणमित्यस्याप्यभाव एवेति न तथाऽप्रत्ययस्याग्रह-
णाददोष इति शंका नपदान्ताट्टोरनामिति निर्द्देशादप्रत्ययस्य न ग्रहण-
मित्यपि न चाप्रत्ययेऽकारस्यनानेन दीर्घ इति कल्पनयापि निर्द्देशोपपत्तौ
हरिनामित्यादौ दोषतादवस्थ्यात् नन्वामीत्येवास्तु परत्वान्नुटि यदा-
गमन्यायेनाम्त्वमादाय दीर्घे रामाणामित्यादेस्सिद्धत्वात् नच कृता-
कृतप्रसङ्गित्वेन नित्यत्वाद्दीर्घे ह्रस्वान्तत्वाभावेन रामाणामित्यादौ
नुट् नस्यादिति वाच्यम् ह्रस्वात्परस्यामोनुडित्यस्यैवं सति वैयर्थ्येन
सामर्थ्याद्भूतपूर्वह्रस्वान्तत्वमादाय नुट उपपत्तेः नृणामित्यत्र नृचेति
दीर्घाभावे नुटश्चारितार्थ्याद्वैयर्थ्याभाव इति तु न वाच्यम् तावन्मात्र
प्रयोजनकत्वे नृनद्याप इत्यनेनैव सिद्धौ ह्रस्वग्रहणवैयर्थ्यस्य तावतापि-
सत्वात् तदुक्तं नह्येकमुदाहरणं योगारम्भं प्रयोजयतीति एकमुदाह-
रणं सामन्यरूपेण योगारम्भे प्रयोजकं न भवतीति तदर्थः विशेषरूपेण
निर्द्देशेऽपि तदुदाहरणोपपत्तिसम्भवात्सामान्यरूपेण निर्द्देशो-व्यर्थ
एवेति तदाशय इत्युक्तं शेखरे अत्रेत्थं विचार्य्यते ह्रस्वग्रहणे प्रतिपदो-
क्तत्वात् नृचेति दीर्घे यणि न्रामिति दीर्घाभावे नुटि नृणामिति रूप-
द्वयम् नृनद्याप इति करणे नित्यत्वप्रतिपदोक्तत्वयो-रुभयत्र साम्यात्
परत्वान्नुटि दीर्घे नॄणामिति दीर्घाभावे नृणामिति रूपद्वयमिति
फलभेदान्नृग्रहणेन ह्रस्वग्रहणस्य न वैयर्थ्यमिति चेदुच्यते नृनद्याप
इत्यस्याप्राप्तियोग्येऽचारितार्थ्येन कृते नुटि चारितार्थ्येन तक्रन्यायेन नुटं
बाधित्वा दीर्घे सर्वेषामित्यादौ सुटीव नुटोऽप्रवृत्तौ यणि न्रामिति
दीर्घाभावे नुटि नृणामिति न फलभेदः नुट् तु नोक्तन्यायेन दीर्घबाधकः
वैकल्पिकत्वेन दीर्घाभावे नुटश्चारितार्थ्यात् बाधे नृचेत्यस्य वैयर्थ्याप-
त्तेश्च नच प्राप्तविभाषास्थले अभावस्यैवापूर्वत्वेनविधेयत्वात्तेनैव
बाध्यबाधकभावविचारस्तथा सति ह्रस्वग्रहणे नुटोऽप्राप्तियोग्ये अ-
चारितार्थ्येन कृते नुटि चारितार्थ्येन तक्रन्यायेन बाधकेऽभावे जाते

नुटोऽप्राप्त्या यणि त्रामिति पक्षे दीर्घे नित्यत्वाज्जाते नुटोऽप्राप्त्या यणि त्रामिति रूपमेकं नृनद्याप इति कल्पे उक्तरीत्या तक्रन्यायेन दीर्घाभावे नुटोऽप्रवृत्तौ यणि त्रामिति वैकल्पिकत्वात् पक्षे दीर्घेऽपि नृत्वान्नुटि नृणामिति फलभेदो दुरुद्धर इति वाच्यम् नः ऋत् नृद्दिति पठित्वा नृसम्बन्धिह्रस्वऋकारात्परस्य नुडित्यर्थेन दीर्घे नुटोऽप्राप्त्या यणि त्रामित्यस्यैव सत्वेन फलभेदाभावात् अभावविधानपक्षेऽप्यभावस्य न नुड्बाधकत्वमभावविधानवैयर्थ्यापत्तेश्च, एतेन नृशब्दादाचारक्विबन्तात्कर्त्तरि क्विपि तुकि निष्पन्ननृच्छब्दादामि नृतामिति ह्रस्वग्रहणे तु नुटि नृत्रामिति फलभेद इत्यपास्तम् नृद्दिति करणेन तान्ते यदागमन्यायेनापि नृशब्दसंबन्धिह्रस्वऋकारान्तत्वस्यानयनाभावेन नृतामित्यादौ नुटोऽप्राप्तेः। नन्वेवमपि तिसृणामित्यादौ नतिसृति निषेधे ह्रस्वग्रहणचारितार्थ्यमिति चेन्न षट्चतुर्भ्यश्चेत्यत्र त्रेरित्यनुवृत्त्या त्रिशब्दात्परस्याप्यामो नुड्विधानेन तिसृणामित्यस्य सिद्धेः नच त्रिशब्दादाचारक्विबन्तात् कर्त्तरि क्विपि त्रितामित्यादौ नुडापत्तिः षट्चतुस्साहचर्य्येणातकारान्तस्यैव त्रिशब्दस्य ग्रहणेनादोषात् नच त्रिशब्दस्येकारेण समासे दीर्घे तत आमि त्री आमिति स्थिते ह्रस्वग्रहणे न भवति त्रिग्रहणे पूर्वान्तवद्भावेन स्यादिति फलभेद इति वाच्यम् पञ्चमीसमासमाश्रित्य ह्रस्वग्रहणेऽपि नुटः प्रवृत्तेः फलैक्यात् नच दीर्घेकारेण समासे फलभेदः पञ्चमीसमासाश्रयणेनैव त्रिग्रहणेऽपि तत्र नटोऽभावस्योपपादयितुं शक्यत्वात्। नच प्रियत्रीणामित्यादौ षट्चतुर्भ्यश्चेति बहुवचननिर्द्देशेनार्थपरनिर्द्देशात् षडाद्यर्थगतबहुत्वबोधकस्यामो नुडित्यर्थेन गौणे ऽप्रवृत्त्या नुडर्थं ह्रस्वग्रहणमस्त्विति वाच्यम् षट्चतुर्भ्यामिति निर्द्देशे गौरवेण लाघवार्थं बहुवचनस्य सत्वेन गौणेऽप्रवृत्तौ प्रमाणाभावात् समाहारद्वन्द्वेनैकवचने कर्तव्ये बहुवचनं गौणेऽप्रवृत्त्यर्थमित्यपि न तथा अस्थिदधीत्यादावपि बहुवचनस्यासंगत्या

पत्तेः नचाङ्गाधिकारे यदुच्यते गृह्यमाणविभक्तेस्तद्भवतीति भाष्याद्दोषे ऽप्रवृत्तिः गृह्यमाणविभक्तेरित्यस्य हि गृह्यमाणात् सूत्रे उच्चार्य्यमाणाद्विहितविभक्तेरित्यर्थः नन्वेतदर्थे षड्भ्योलुगित्यत्राप्यङ्गाधिकारसत्वेन षट्संज्ञकाद्विहितयोरेव जश्शसोर्लुकि परमपञ्चेत्यत्र लुग् न स्यात् नान्तसंख्यावाचकत्वस्य पञ्चमात्रे सत्वेन तस्यैव षट्त्वेन ततोविहितत्वाभावादिति चेन्न संख्याप्रकारकसंख्येयमुख्यविशेष्यकबोधजनकस्य षान्तस्य नान्तस्य च षट्संज्ञेत्यर्थेन परमपञ्चेत्यस्य कर्म्मधारयसमासेन परमाभिन्नपञ्चत्वसंख्याविशिष्टार्थकत्वेन तस्यैव षट्त्वेन ततोविहितस्य जशोलुग्विधाने बाधकाभावात् लोके संख्यावाचकत्वेन प्रसिद्धस्यैव षट्त्वमित्यत्र प्रमाणाभावात् भाष्येऽपि निरुक्तशङ्कायास्समाधानपरेण षट्प्रधान एष समास इति ग्रन्थेनोक्तार्थस्यैवध्वननादिति वाच्यम् नह्येकमुदाहरणमिति नामिसूत्रस्थभाष्यात् षट्संज्ञकादिभ्यः परस्याङ्गसंज्ञानिमित्तस्यामो नुडित्यर्थस्यैव सत्वेन गौणेऽपि नुटः प्रवृत्तेरतएव परमचतुर्णामित्यत्र नुट् षड्भ्योलुक् अड्डुतरादिभ्यः पञ्चभ्य इति सूत्रद्वयस्यैव लक्ष्यानुरोधात् षट्संज्ञकाद्विहितयोः डतराद्यन्ततदादिविहितयोरित्यर्थस्तेन प्रियपञ्चानः अतिकतरमित्यादौ न लुगदडौ न च पदां दतामित्यादावपि स्थानिगतह्रस्वान्तत्वं भूतपूर्वगत्याऽऽदाय नुट्प्रसंग इति वाच्यं मात्राकालिकत्वे सत्यच्त्वस्यैव ह्रस्वपदशक्यतावच्छेदकतया सामर्थ्यान्मात्राकालिकत्वांश एव भूतपूर्वगत्याश्रयणेनाच्त्वस्य विद्यमानस्यैव निमित्तत्वेन प्रकृते तदभावेनादोषात अत्रोच्यते एवं सति नोपधाया इत्यत्राप्यामीत्यस्यैव सम्बन्धे चर्मणामित्यादौ मकाराकारस्य दीर्घापत्त्या नामीति वक्तव्यमिति अत्रेदं विचार्य्यते संख्याप्रकारकसंख्येयनिष्ठविशेष्यताकबोधजनकस्य षट्संज्ञकत्वे दण्डिन इव त्रयः त्रिदण्डिनः पूषण इव त्रयः त्रिपूषणः पञ्च इव त्रयः त्रिपञ्चान इत्यादावुपमितसमासे उक्तसंख्याबोधकत्वस्य सत्वेन षट्संज्ञापत्त्या लुगापत्तिरतो लोके संख्या-

वाचकत्वेन प्रसिद्धस्य पञ्चादेरेव सा प्रियपञ्चान इत्यादौ लुगभावाय षड्भ्य इत्यस्य षडर्थगतसंख्याभिधायिनोर्जश्शसोर्लुगित्येवार्थो गृह्यमाणविभक्ते-स्तद्वतीत्यस्य गृह्यमाणार्थगतसंख्याभिधायि विभक्तेस्तद्वतीत्येवार्थ इति नोक्तोपमितसमासेष्वपि दोषः षट्प्रधान एव समास इति भाष्यस्याप्यत्रैव तात्पर्य्यं शेखरोक्तं च न युक्तमिति चेन्न तथापि दण्डिन इव कति कतिदण्डिन इत्यादौ लुगापत्तिः षडर्थगतसंख्याभिधायित्वस्य जशस्सत्वात् इष्टापत्तौ ममाप्युक्तस्थलेषु इष्टापत्तिरेव न च षड्भ्य इत्यस्यावृत्त्या षट्संज्ञकात्परस्येत्यप्यर्थं स्तथाच षडर्थगत संख्याभिधायिनोः षट्संज्ञकात्परयोरित्यर्थेन कतिदण्डिन इत्यादौ न दोषो जसः षट्संज्ञकात्परत्वाभावात् अत एव पञ्च ब्राह्मणा इत्यादावपि ब्राह्मणपदोत्तरविभक्तेर्न लुक् प्रियपञ्चानः पञ्चेत्यादौ प्रियपञ्चन् प्रकृतिकविभक्तेः षट्संज्ञकात्परत्वस्य पञ्चरूपषडर्थगतसंख्याभिधायित्वस्य च सत्त्वेऽपि प्रत्यासत्त्योभयत्रैकस्यैव षट्संज्ञकस्य ग्रहणे-नादोषादत्र तयो-र्भेदात् स्वार्थगतसंख्याभिधायित्व स्वाव्यवहितोत्तरत्वोभयसम्बन्धेन षट्संज्ञकविशिष्टयोर्लुगिति निष्कर्ष इति वाच्यम् ममापि संख्याविशिष्टस्य षट्संज्ञेत्येवार्थः वैशिष्ट्यञ्च स्वनिष्ठप्रकारतानिरूपितसंख्येयनिष्ठमुख्यविशेष्यताकबोधजनकत्व स्वपर्य्याप्त्यवच्छेदकतानिरूपितावच्छेद्यतावच्छक्यतानिरूपितशक्ततापर्य्याप्त्यधिकरणषान्तनान्तान्यतरशब्दनिष्ठचरमावयवतानिरूपकत्वोभयसम्बन्धेन विशेष्यतायां मुख्यत्वंच स्वप्रयोजकपदप्रयोज्यविशेष्यतानिरूपितप्रकारत्वासामानाधिकरण्यं तेन पञ्चब्राह्मणा इत्यत्र ब्राह्मण विशेषणत्वेऽपि न क्षतिः त्रिदण्डिन इत्यादौ च त्रित्वावच्छिन्नशक्यतानिरूपितशक्ततावान् नान्तः शब्दो नास्तीति न दोषः पञ्चेवषट्षट्पञ्चान इत्यादौ नैवेष्यते षट्संज्ञा तथापि ममापीति शेखरमते न दोषः न च शेखरमते परमपञ्चेत्यस्य षट्सज्ञायां स्वंरूपंशब्दस्येति सूत्रस्याशब्दसंज्ञेत्यस्य प्रत्याख्यानाय

संज्ञायाः स्वरूपबोधकत्वाभावः षान्तस्य संख्यावाचकस्य षट्संज्ञावि-
धानसामर्थ्येन ज्ञापितः संज्ञाशब्दस्य स्वरूपबोधकत्वे हि षडित्यादौ
षड्भ्योलुगित्यादीनां षान्तस्य संख्यावाचकस्य षट्संज्ञां विनैव षट्-
स्वरूपत्वादेव प्रवृत्त्या तस्य तत्संज्ञाविधानवैयर्थ्यं स्पष्टमेवेति भाष्य-
विरोधः षट्शब्दस्य स्वरूपबोधकत्वेऽपि परमपञ्चेत्यस्य षट्स्वरूप-
त्वाभावात्तस्य संज्ञार्थं संज्ञाविधानस्यावश्यकत्वेन वैयर्थ्याभावादिति
वाच्यम् पञ्चेत्यादौ लुगाद्यर्थं षट्संज्ञकेत्यर्थस्यावश्यकत्वेन सकृद्गु-
त्वरितन्यायेन षट्स्वरूपबोधकत्वासम्भवेन संज्ञाविधानस्यावश्यकत्वात्
पश्वपत्यादिशब्दस्येव संज्ञाया अपि लक्ष्यानुसारादेव स्वरूपबोधक-
त्वाभावोपपत्तेश्च ज्ञापकपरभाष्यस्यैकदेश्युक्तत्वेनादोषात् न च
गृह्यमाणाद्विहितविभक्तेरित्यर्थे उपसर्जनप्रतिषेधो वक्तव्यो ऽथवा
अङ्गाधिकारे पञ्चम्या यदुच्यते गृह्यमाणविभक्तेस्तद्भवतीति व्याख्योक्त्या
अङ्गाधिकार इति कल्पे उपसर्जनप्रतिषेधाभावेनातिसर्वायेत्यत्र स्मा
द्यादेशाभावाय सर्वनामविहितस्य ङेरित्यर्थेन परमसर्वस्मै इत्यस्या-
सिद्धिः कैयटमते सर्वनामार्थगतसंख्याभिधायीत्यर्थे न दोषो भवति
नच सर्वनामसंज्ञायां तदन्तविधिसत्त्वात् नागेशमतेऽपि न दोषः
परमसर्वेत्यस्यैव सर्वनामत्वादिति वाच्यमस्मिन् कल्पे तदन्तविध्यभा-
वात् कथमन्यथा अतिसर्वायेत्यत्र स्मैभावाभाव इति वाच्यं एतद्दो-
षेणैवैतत्कल्पस्यैकदेश्युक्तत्वात् अत एव भाष्ये अथवा महतीयं संज्ञेति
पक्षान्तरोपादानम् नच कैयटमतोपेक्षायां बीजाभाव इति वाच्यं
गृह्यमाणार्थगतसंख्याभिधायीत्यर्थस्य पञ्चम्यप्रतिपाद्यत्वात् नह्येकमु-
दाहरणमिति भाष्यविरोधाच्च शेखरमते च परमकतरमित्यादावद्डा-
देशाभाव एष्टव्य इत्यसमञ्जसम् यस्य कार्यमिष्टन्तस्य कर्मधारयेऽपि
तत् कार्यस्य समासप्रत्ययातिरिक्तस्येष्टत्वादित्यलम् ।

॥ उभशब्दो नित्यं द्विवचनान्त इति ॥

ननु द्विवचने परे सर्वनामसंज्ञाप्रयुक्तकार्याणामभावेन सर्वादिगणे

तस्य पाठे प्रयोजनाभावः नच सर्वनाम्नस्तृतीयाचेति सूत्रेणोभाभ्यां हेतुभ्यामुभयोर्हेत्वोरित्यादिसिद्धिरेव फलमिति वाच्यम् निमित्तपर्य्यायप्रयोगे सर्वासां प्रायदर्शनमिति वार्त्तिकेनैव गतार्थत्वात् तस्य सर्वनामसंज्ञासापेक्षत्वन्तु न भाष्ये हेताविति सूत्रे पाठात् नच स्वाङ्गशिटामित्यनेनसर्वनाम्नां विधीयमानमाद्युदात्तत्वं फलमिति वाच्यम् उभे भद्रे इत्यादावन्तोदात्तपाठेन गणे उभशब्दस्यान्तोदात्तत्वनिपातनेनाद्युदात्तत्वस्य बाधेनान्तोदात्तत्वस्यैवेष्टत्वात् नचास्यासर्वनामत्वे प्रथमाद्वितीययोरभावस्स्यात् निमित्तपर्य्यायप्रयोगे सर्वासां प्रायदर्शनमिति वार्त्तिकस्थ-प्रायग्रहणेनासर्वनाम्नः प्रथमाद्वितीये नस्त इति बोधनादिति वाच्यम् उभशब्दातिरिक्तसर्वनामभिन्नप्रातिपदिकात्प्रथमाद्वितीययोरभाव इति कल्पनेनादोषात् नचोभकावित्यत्राकजर्थ एव पाठोस्तु कप्रत्ययेनापि तत्सिद्धेः नचोभकाभ्यामित्यत्र सुबन्तात्तद्धितोत्पत्त्याऽकचि चितस्सप्रकृतेरित्यनेन चित्वप्रयुक्तमन्तोदात्तत्वं भ्यामश्चाकारस्य कप्रत्यये प्रत्ययत्वप्रयुक्तमन्तोदात्तत्वं कप्रत्ययाकारस्येति फलभेद इति वाच्यं तद्धितविधौ प्रातिपदिकाधिकारात् प्रातिपदिकस्यैव प्रकृतित्वं प्रत्ययविध्युद्देश्यतावच्छेदकाक्रान्तस्यैव प्रकृतित्वात् जायमानश्च तद्धितः स्वार्थे परिपूर्णमिति न्यायात्सुबन्तात्पर एवेत्यन्यदेतदिति प्रत्ययत्वचित्वाभ्यां ककाराकारस्यैवोदात्तत्वेन फलभेदाभावादिति चेन्मैवम् अकचि तन्मध्यपतितन्यायेनोभकशब्दस्योभशब्देन ग्रहणादुभशब्दस्यैव द्विवचनपरत्वेनायज् न भवति कप्रत्यये तु तदन्ते द्विवचनपरत्वेऽपि तस्य द्विवचनपरत्वाभावेनायच् स्यादित्युभयकाविति स्यादिष्यते चोभकाविति तदर्थं पाठस्यावश्यकत्वात् ननु संख्याया अवयवे तयबित्यवयवे विहितस्य तयपःस्थाने उभादुदात्तोनित्यमित्यनेनायजादेशस्य विधानेनोभकावित्यत्रावयवार्थाप्रतीत्या तयपोऽभावेनायचो न प्राप्तिरिति चेदत्रोच्यते उभये इत्यादौ तयादेशे

उभयप्रतिषेधः तयपो ग्रहणेन ग्रहणाज्जसि विभाषा-प्राप्नोतीति वार्तिकप्रत्याख्यानायायचः प्रत्ययान्तरत्वमुक्तं भाष्ये तथाचोभाववयवौ यस्येति वाक्यस्य सिद्धये उभादुदात्तोनित्यमिति सूत्रे महाविभाषा-सम्बन्धस्यावश्यकत्वेन विरोधादेतद्वाक्यार्थबोधे नित्यपदार्थान्वयस्या-विषयत्वेन नित्यमिति योगो विभज्यते उभशब्दादवयविन्यर्थे अय-ज्वा सचोदात्त इत्युभादुदात्त इत्यस्यार्थः उभशब्दात्स्वार्थे अयच् नित्य-मिति नित्यमित्यस्यार्थः तेनोभयपक्षविनीतनिद्रा इत्यादौ स्वार्थे अयच् यद्यपि योगविभागस्येष्टसिद्ध्यर्थत्वादुभौसाभ्यासस्येति लिङ्गाच्च वृत्ति-विषये एवायमयच् तथापि उभयोर्वास इत्यादौ वृत्तौ शयवासवासि-ष्वकालादित्यलुक्ययचोऽदर्शनात् द्विवचनपरत्वाभावे उभशब्दादयजि-त्यर्थकादुभयोऽन्यत्रेति वार्त्तिकाच्च वृत्तिविषय इत्यनुक्त्वा द्विवचनपर-त्वाभावेऽयजिति वक्तव्यम् अस्मिन् योगे महाविभाषाया असम्बन्धो-नित्यमित्यनेन विरोधात् इत्यञ्चोभकावित्यत्रायच्स्वार्थे नित्यं स्यादिति ननु एतस्यायचो ऽत्यन्तस्वार्थिकत्वेन सुबुत्पत्तेः पूर्वमेवोत्पत्त्या उभावित्यत्र द्विवचनोत्पत्तेः पूर्वं द्विवचनपरत्वाभावस्य सत्वादयच् दुर्वार इति चेन्न यत्र द्विवचनपरत्वाभावसम्भावना तत्रायजत्र च द्विवचनपरत्वस्यैव सम्भावनाया-स्सत्वेनायचोऽभावात् नच तथापि स एव दोषो यत इदानीं द्विवचनपरत्वाभावेनायचि द्विवचनोत्पत्ताव प्ययजन्तस्योभयशब्दस्य द्विवचनपरत्वं स्यादुभशब्दस्य तु द्विवचनपर-त्वाभावसम्भावनैव स्यादिति वाच्यम् यद्ययच् न स्यात्तदोभशब्दस्य द्विवचनपरत्वाभावस्स्यादिति सम्भावनाया एव निमित्तत्वेन प्रकृते-तस्या अभावेनादोषात् नचोभयत्रेत्यादौ यद्ययच् न स्यात्तदोभशब्द-स्यसर्व्वनामत्वाभावेन त्रलाद्यभावेन लुकोभावादुभशब्दस्य द्विवचन-परत्वमेव स्यान्न तु द्विवचनपरत्वाभावसम्भावनेत्ययच् नस्यादित्युभ-यत उभयत्रेत्यादावेवेति दृष्टान्तासिद्धिरिति वाच्यम्। यद्युभशब्दाद-यच् स्यात्तदा अयजन्तस्योभयशब्दस्य द्विवचनपरत्वाभावः स्यादिति

सम्भावनाया अपि निमित्तत्वेन प्रकृते तादृशसम्भावनायाः सत्त्वेनादोषात् अतएव यत्र उभशब्दस्य उभयशब्दस्येत्युक्तम् शेखरे नचोभावित्यादौ परादिवद्भावेन द्विवचनत्वेऽप्युभशब्दस्यैवाभावेनोभशब्दस्य द्विवचनपरत्वाभावसम्भावनास्त्येवेति चेन्न वृद्ध्यादेशात्पूर्वं द्विवचनपरत्वसम्भावनाया-स्सत्त्वेन द्विवचनपरत्वसम्भावनाभावस्यैव निमित्तत्वेन वा-दोषात् नचोभयोर्मणिरित्यादौ अवयविन्ययचि निरवकाशत्वात् स्वार्थिकं बाधित्वा पूर्वं जाते पश्चात्स्वार्थिकमयच्स्यादिति वाच्यम् योगविभागस्येष्टसिद्ध्यर्थत्वेन लिट्यभ्यासस्योभयेषामिति निर्द्देशेन च क्वचित्तस्याप्रवृत्त्येष्टसिद्धेः रूपप्रत्यये उभरूपमित्यादावपि क्वाचित्कत्वादेवाप्रवृत्तिरत एव रूपप्रत्यये स्वार्थिकत्वेन द्वित्ववाचकत्वरूपद्विवचनत्वस्य सत्त्वेनोभशब्दस्य सर्वादिगणे पाठप्रत्याख्यानकल्पे ऽयचो ऽप्रवृत्त्या ऽऽरम्भपक्षे ऽयचः प्राप्त्या फलभेदो न अस्मादेव भाष्यादुभशब्दाद्रूपवादेरनभिधानम्वा अथोभकावित्यादौ कप्रत्यये ऽयचो न प्राप्ति-र्यद्ययच् न स्यात्तदोभशब्दात् कप्रत्यये द्विवचनपरत्वसम्भावनास्यादित्येतस्या अभावरूपनिमित्तस्य सत्त्वे ऽपि यद्ययच्स्यात्तर्ह्ययजन्तस्य द्विवचनपरत्वं स्यादिति सम्भावनाभावरूपद्वितीयनिमित्तस्याभावात् तथाहि यद्ययच्स्यात्तर्ह्ययजन्तस्योभयशब्दस्य सर्वादिगणे पाठेन कप्रत्ययं बाधित्वा ऽकचि तन्मध्यपतितन्यायेनोभयकस्यायजन्तत्वेन तस्य च द्विवचनपरत्वसम्भावनस्यैव सत्त्वं न तदभावस्येति शेखरे एतदेवोक्तमयच्यकच् तु न वाच्यइत्यनेनेति चेन्न अकचोनिमित्तमयच् तस्य निमित्तभूतो यो यद्ययच् न स्यात्तदोभशब्दस्य द्विवचनपरत्वंस्यादिति सम्भावनाया अभावः तस्य प्रयोजकः प्रकृते कप्रत्यय एव तस्याभावेहि द्विवचनपरत्वमेवसम्भाव्येतातोऽकजुपजीव्यः कप्रत्यय स्तस्याकजा बाधो न स्यादुपजीव्यविरोधस्यान्याय्यत्वात् ततश्च यद्ययचस्यात्तदा कप्रत्ययं बाधित्वा ऽकच्स्यादिति सम्भावना नस्यात् किन्तु कप्रत्यय एव स्यात्ततश्च द्विवचनपरत्वस-

म्भावनाभावः स्यादिति द्वितीयनिमित्तस्यापि सत्वेनायच्दुर्वारः नचा-
कच अपवादत्वादुपजीव्यस्यापि कप्रत्ययस्य बाधक इति वाच्यम् सर्वक
इत्यादौ चारितार्थ्यात् एतदेवोक्तं शेखरे उपजीव्यत्वेन कस्यैव प्राप्तेर-
पवादस्त्वन्यत्र चरितार्थ इत्यनेन । नच प्रथमसम्भावनाया अयचं
प्रति निमित्तत्वे न मानमुभयत्रेत्याद्यर्थमावश्यकेन द्वितीयसम्भावनेनै-
वेष्टसिद्धे रिति न कप्रत्ययस्योपजीव्यत्वं प्रथमसम्भावनासंपादकत्वेनैव
हि तस्योपजीव्यत्वादित्यपवादस्याकच एव प्रवृत्ते-स्तस्य च तन्मध्य-
पतितन्यायेनोभयशब्दत्वात्तस्य च द्विवचनपरत्वसम्भावनाया एव
सत्वेन नायजिति वाच्यम् एवमपि कप्रत्ययात्पूर्वमयचोऽभावे ऽपि
कप्रत्यये जाते ऽयचो दुर्वारत्वादिति दिक् । स्वार्थिकाः प्रत्ययाः
प्रकृतितोऽ विशिष्टाः प्रकृतिग्रहणेन गृह्यन्त इत्ययमुभशब्दादुत्पन्नः
कप्रत्ययः स्वार्थिकत्वादुभशब्दार्थ एवेति सोऽपि द्वित्वविशिष्ट-
वाचकः प्रकृतिभूतोभशब्दग्रहणेन-ग्राहकेण द्विवचनशब्देन गृह्यते
बोध्यते द्विवचनपरत्वाभाव इत्यत्र च द्विवचनपदं द्वित्वविशिष्टबो-
धकपरमेव नतु द्विवचनसज्ञकपर-मतएवोभयोरुभावुभोभावित्येव
ततश्चोभकावित्यादौ कप्रत्ययस्यापि द्विवचनत्वाद्द्विवचनपरत्वस्यैव
सत्वेन नायजिति प्रत्याख्यात उभशब्दपाठो भाष्ये परन्त्विदं
भाष्यं प्रौढिवादमात्र मन्यथा त्रतसिलादेरपि स्वार्थिकत्वेन द्विव-
चनत्वादुभयत्रेत्यादावप्ययच् न स्यात् नच द्वित्वविशिष्टाधिकरण-
त्वाद्यर्थकसप्तम्यन्ताद्उभशब्दस्यस्वार्थे तौ विहिताविति द्वित्वविशि-
ष्टमात्रबोधकत्वरूपद्विवचनत्वाभाव इति वाच्यम् उभकावित्यादौ
कप्रत्ययस्यापि कुत्साबोधकत्वेन द्वित्वविशिष्टमात्रबोधकत्वाभावस्यो-
भयत्र साम्यादिति प्राचीनाः नवीनास्तु उभयत्रेत्यादावधिकरणत्वादेः
प्राधान्येन द्वित्वनिष्ठप्रकारतानिरूपितसंख्येयनिष्ठमुख्यविशेष्यताकबो-
धजनकत्वं नास्त्यधिकरणत्वनिष्ठविशेष्यतानिरूपितप्रकारतासामाना-
धिकरण्येन तदसामानाधिकरण्यरूपमुख्यत्वस्य संख्येयनिष्ठविशेष्यता-

यामभावादुभकावित्यादौ च कुत्साया संख्येये विशेषणत्वात्संख्येयनिष्ठविशेष्यतायां मुख्यत्वाबाधात् प्रत्याख्यानं सम्यगेवेत्याहुः ननु नवीनमते अधिकरणत्वशक्तिमान् क्रियाकारकभावश्च सप्तम्यर्थः आद्यस्याभेदेन प्रकृत्यर्थेऽन्वयस्तत्प्रतियोगिकसम्बन्धतया चान्त्यस्य भानन्तथा च विशेष्यता न सप्तम्यर्थनिष्ठविशेष्यतानिरूपितप्रकारतासमानाधिकरणेति द्विवचनत्वमेव त्रलादेर्वच तिष्ठतीत्याद्यर्थनिष्ठविशेष्यतामादाय प्रकारतासामानाधिकरण्यं वाच्यम् उभकावित्यादावप्यस्त्यादिक्रियामादाय संख्येयनिष्ठविशेष्यतायाम्मुख्यत्वाभावस्य तुल्यत्वात् उभकावित्यादौ कप्रत्ययप्रकृतिभूतस्योभशब्दस्य द्वित्वसंख्यानिष्ठप्रकारतानिरूपितसंख्येयनिष्ठविशेष्यताविशिष्टत्वरूपं द्विवचनत्वमस्ति वैशिष्ट्यञ्च स्वप्रयोजकत्व स्वसमानाधिकरणप्रकारतानिरूपितविशेष्यत्वाप्रयोजकत्वोभयसम्बन्धेन प्रकृत्यर्थे विहितस्य कप्रत्ययस्यापि तादृशार्थकत्वेनोक्तद्विवचनत्वमस्तीति चेत् त्रल्प्रत्ययादेरपि तत्तुल्यं तत्र यथा तादृशप्रकारतानिरूपितविशेष्यताप्रयोजकत्वं क्रियापदस्य नतु कप्रत्ययस्य तथाऽत्रापि क्रियापदस्यैव तत्र तु त्रल्प्रत्ययस्येति प्राचीनोक्तमेवयुक्तमिति चेदत्रोच्यते सप्तम्यर्थस्य क्रियाकारकभावस्य संसर्गतया भासमानस्य विशेष्यत्वाभावेऽपि प्रतियोगिनिरूपितं प्राधान्यमस्त्येव तत्प्रयोजकत्वं सप्तम्यास्तदन्तार्थे विहितस्य त्रलादेश्च ततश्च द्वितीयसम्बन्धस्थाने स्वसमानाधिकरणाप्रधानतानिरूपितप्रधानत्वाप्रयोजकत्वस्य निवेशेन प्रकृते प्रयोजकत्वस्यैव सत्वेन न द्विवचनत्वमुभकावित्यादौ चोभप्रतियोगिकसम्बन्धार्थकत्वं न कप्रत्ययप्रकृतेरतएव न कप्रत्ययस्येति न तस्य स्वसमानाधिकरणाप्रधानानिरूपितप्रधानताप्रयोजकत्वमिति द्विवचनत्वं कप्रत्ययस्येति प्रत्याख्यानं युक्तमेवेतिबोध्यम् ।

परेतुविभक्त्यादेशेभ्यः परत्वात् पूर्वमेव जरसित्य-सङ्गतमिति ।

अत्र दीक्षितेनेनादेशादादेशात्प्रागेव परत्वाज्जाऽस्यदन्तत्वाभावादिनादेशाद्यप्राप्त्या निर्जरसा निर्जरसे इत्याद्युक्तम् शेखरकृता च पूर्वविप्रतिषेधेन विभक्त्यादेशे प्रथमं जाते सन्निपातपरिभाषया, कुत्रचिदजादिपरत्वाभावेन च जरसादेशाप्राप्त्या निर्जरेण निर्जरैः निर्जरायेत्याद्येवसाध्वित्युक्तम् अत्र प्रमाणं जराया इति सूत्रस्थं भाष्यं तत्राहि अजरांसीत्यत्र नपुंसकस्यझलचित्यनेन नुम् जराया इत्यनेन जरस् अनयोः प्राप्तौ विप्रतिषेधेन जरसित्युक्तम् तत्र यदि परत्वात् श्यादेशात् पूर्वमेव जरस्स्यात् तर्हि तस्मिन् काले सर्वनामस्थानपरत्वाभावेन नुमोऽप्राप्तौ तयोर्युगपत्प्राप्त्यभावेन परस्परलब्धावकाशयोर्युगपत्प्राप्तौ परमित्यर्थकविप्रतिषेधेपरमित्यस्याप्राप्त्या विप्रतिषेधेन जरसित्यसङ्गतं स्यादतः पूर्वविप्रतिषेधेन जरसादेशात् पूर्वं श्यादेशे शिसर्वनामस्थानमिति सर्वनामस्थानत्वेऽन्तरङ्गत्वाज्जाते नुम्जरसोर्युगपत्प्राप्तौ विप्रतिषेधेपरमित्यनेन जरसित्युपपन्नं भवति अथ नेदं भाष्यं विरुद्धं प्राचाम् तथाहि नेदं भाष्यं नुमः पूर्वं जरसित्येतत्तात्पर्य्यकमपि तु श्यादेशात्पूर्वावस्थायामेव जरसादेशशीभावयोः प्राप्तौ परत्वाज्जरस् भवति नित्यत्वाच्छीभावः कथन्नेत्याशङ्किते जरसादेशस्यापि नित्यत्वादुभयोस्साम्येन परत्वाज्जरसिति समाहिते कथं जरसोऽनित्यत्वं शीभावे कृते नुमः प्रवृत्त्या निर्दिश्यमानस्य नुमा व्यवधानाज्जरसादेशस्याप्राप्त्या कृताकृतप्रसङ्गित्वरूपं नित्यत्वं न जरस इति नित्यत्वाच्छीभाव एव युक्त इति शंकायां इदमुत्तरं न नुमः शीभावे कृते प्रवृत्तिस्तत्र हि नुम्जरसोः प्राप्तौ विप्रतिषेधेन जरस् एवेति जरसादेशस्यापि नित्यत्वात्परत्वाज्जरसिति युक्तमेवेत्येवं विचारपरमिति चेत् टाङसीति सूत्रस्थं कैयटोक्तं प्रमाणम् तत्र हि भाष्यकारः सन्निपातपरिभाषया जरसादेशमनभ्युपगम्य प्रतिजरेण अतिजरादिति भाष्यं

न त्वतिजरसिनातिजरसादिति गौरवमुद्भावितवानित्युक्तम् जरसादेशस्यैव परत्वादिष्टत्वे पूर्वं जरसादेशे इनाद्यप्राप्त्या वैकल्पिकत्वात्तदभावपक्षे जरसादेशाप्राप्त्या सन्निपातपरिभाषया जरसादेशमनभ्युपयन्नित्युक्तेरसङ्गत्यापत्तिः अथेदमपि न प्रमाणं तथाहि वैकल्पिकत्वाद्विभक्त्यादेशात्पूर्वं मतिजर आ इति स्थिते जरसोऽभावे इनादेशे अतिजर इनेति स्थिते अतिजर आ इति लक्ष्याद्रूपान्तरं प्रापिते निर्जरसाविति लक्ष्यान्तर इवात्रापि जरसादेशप्राप्तेरव्याहतत्वेन सन्निपातपरिभाषया तदभावकथनं नासमञ्जसमिति ननु शिश्वयतुरित्यादौ विभाषाश्वेरित्यस्य वैकल्पिकत्वादभावे द्वित्वं तदनन्तरं तस्मिन्नेव रूपान्तरं प्रापिते लक्ष्ये विभाषाश्वेरिति संप्रसारणापत्तिरिति चेन्न तत्र श्विवृद्धेर्लिड्वृद्धेश्चाश्रयणेन प्राप्तस्य संप्रसारणस्याभावोपक्रमात्तादृशस्यैव तत्रैव भावानौचित्यादत्राऽऽरूपाचमाश्रित्य प्राप्तस्याभावोपक्रमे इरूपाचमाश्रित्य प्राप्तस्य भावे बाधकाभावात् वृत्तिकारेणोक्तमतिजरसिनातिजरसादिति केचिदिच्छन्ति यथा तु भाष्यं तथा नैतदिष्यत इति लक्ष्यत इति एतदपि पूर्वमिनाद्यादेशप्रवृत्तावेव सङ्गच्छते परत्वाज्जरसि तु इनादेशादेरप्रवृत्त्याऽतिजरसिनातिजरसादिति रूपासिद्ध्याऽसङ्गतं स्यात् वस्तुतस्तु यथा तु भाष्यमित्यादिना स्वयमेव सन्निपातपरिभाषाविरोधेन जरसादेशाप्रवृत्त्यैव जरसादेशस्य परत्वात् पूर्वमिनादेशादेरप्रवृत्त्यातिजरसिनेत्यादेरयुक्तत्वबोधनाच्च विभक्त्यादेशस्य पूर्वं प्रवृत्तौ प्रमाणं वृत्तिग्रन्थोऽपि तदयुक्तत्वस्यापि वक्तुं शक्यत्वाच्च अमि लुकोऽपवादमम्भावं बाधित्वा परत्वाज्जरस् ततः सन्निपातपरिभाषया न लुगजरसमिति दीक्षितोक्तमप्ययुक्तं पूर्वविप्रतिषेधाज्जरसादेशं प्रबाध्यापवादत्वाच्च लुकं प्रबाध्यामादेशे सन्निपातपरिभाषया जरसादेशाप्राप्तेरजरमित्येवेति शेखरोक्तमपि निर्मूलं पूर्वविप्रतिषेधे प्रमाणाभावस्योपपादितत्वात् अथ जराया इति सूत्रस्थं भाष्यमेवोक्तार्थे प्रमाणं तथाहि तत्र पूर्वपक्षिणा अतिजरसं पश्येत्यत्र लुक्कस्मा-

ष्विति पृष्टे परेण प्रथमैकवचनेऽप्यतिजरसंतिष्ठतीत्यत्रापि कुतो न लुक्
शङ्क्यते इति पृष्टे पूर्वपठितेन प्रथमैकवचने ऽम्भावोत्तरमेव जरस् पूर्व-
मच्परत्वाभावात् तत्र जरसि कृते सन्निपातपरिभाषया न लुगिति
द्वितीयैकवचनात् प्रथमैकवचने विशेष उक्तो यद्वा अम्भावे कृते
सन्निपातपरिभाषया न जरसिति पाठभेदेन विशेष उक्तः अत्रान्त्यपाठ
एव युक्तः नतु पूर्वपाठः प्रथमैकवचने लुकोऽभावप्रयोजकस्य सन्निपात-
परिभाषारूपस्य ज्ञानसत्त्वेन प्रष्टव्यंप्रति तस्य बोधितत्वेन च द्वितीयै-
कवचने शंकोत्पत्त्यसम्भवात् तथैवात्रापि तद्वारणस्य स्पष्टत्वात् अन्त्य-
पाठे च जरसोऽभावस्य सन्निपातपरिभाषया प्रथमैकवचने उक्तत्वेऽपि
कार्यान्तरेऽपि सा प्रवर्तते एवेति नियमाभावादनित्यत्वेनाप्रवृत्तेरपि-
सम्भवात् द्वितीयैकवचने लुक्कस्मान्नेति शंकोत्पत्तिसम्भवात् ततः
परेण यद्येवमतिजरसमतिजरसैरित्यत्र न प्राप्नोति जरसिति द्वितीयै-
कवचनादौ शंकिते सिद्धान्तिना इष्टमेवैतत्संगृहीतम् अतिजरमति-
जरैरिति भवितव्यमिति । एवमिति सन्निपातपरिभाषया जरस्न
भवति चेदित्यर्थः सिद्धान्तिना जरसोऽभावस्येष्टापत्तिकरणेनैव लुक्-
कस्मान्नेति शंका समाहिता ज्ञानमित्यत्रैवात्रापि अमालुकोबाध इति
अत्रामोऽमादेशस्य जातत्वे एवादन्तत्वमाश्रित्य जातस्यामादेशस्या-
दन्तत्वविघातकजरसादेशं प्रत्यनिमित्तत्वं सन्निपातपरिषया बोधयितुं
शक्यते नान्यथेति स्पष्टमेवानेन भाष्येण जरसादेशात्पूर्वं पूर्वविप्रति-
षेधेन विभक्त्यादेश इति लभ्यते अथात्रापि इदं विचार्यताम् प्रथमै-
कवचने जरसोऽभावार्थापि सन्निपातपरिभाषाया अनुसन्धाने द्वितीयै-
कवचने तथैव लुकोऽपि वारणस्य बालैरपि सु ज्ञेयत्वेन लुक्शङ्काया
निर्मूलत्वमेव तस्मात् पूर्वपाठ एव विशेषोपपादने युक्तोन्त्यपाठस्ये-
दानीन्तन भाष्यपुस्तकेऽदर्शनाच्च कथं पूर्वपाठो युक्त इति चेदुच्यते
अम्भावोत्तरमेव जरसित्येतत्पर्यन्तमेव विशेषोपपादकम् अमिकृते
तस्य लुकं प्रत्यपवादत्वाज्ज्ञानमित्यत्रेव लुकोऽप्राप्तिरिति तद्भाव इति

प्रथमैकवचने शङ्का न कृता तत्र कृते इत्यादिना च द्वितीयैकवचने समाधानमुच्यते द्वितीयैकवचनममं निमित्तीकृत्यामादेशात्परत्वाज्जातस्य जरसादेशस्यामविनाशकलुकं प्रत्ययनिमित्तत्वान्न लुगिति तदर्थः ततः पूर्वपक्षिणा यदि सन्निपातपरिभाषास्ति तर्हि प्रथमैकवचने जरसपि न प्राप्नोति अकारं निमित्तीकृत्य जातस्यामादेशस्याकारविघातकजरसादेशं प्रत्ययनिमित्तत्वादिति यद्येवमित्यादिनोक्ते सिद्धान्तिना इष्टमेवैतत्संगृहीतमित्यादिना प्रथमैकवचने जरसादेशाभावस्येष्टापत्तिः कृता, एतद्भाष्यस्य द्वितीयैकवचनपरत्वकथनं शेखरकृतान्त्वयुक्तमेव प्रमाणाभावात् एवञ्च नैतद्भाष्याद्विभक्त्यादेशस्य पूर्वविप्रतिषेधेन जरसादेशापेक्षया प्राबल्यं लभ्यत इति प्राचीनोक्तं द्वितीयैकवचनेऽतिजरसमित्येव युक्तं न तु शेखरोक्तमतिजरमिति विवेचनीयम् ॥

रषाभ्यां नोणःसमानपदे ।

एकपदे यत्र निमित्तनिमित्तिनौ स्तः तत्र रेफषकाराभ्यां परस्य नस्य णत्वमित्यर्थः निमित्तस्य निमित्तिनश्च पदाघटकस्याभावेन पदे इत्यनेनैव सामर्थ्यान्निमित्तनिमित्तिनोरेकपदघटकत्व इत्यर्थस्य लाभेनैकार्थबोधकं समानग्रहणं व्यर्थसत् समानमेव यत्पदमित्यर्थबोधनद्वाराऽखण्डपदबोधकं तेन रामनामेत्यादौ समासरूपसमानपदघटकत्वेऽपि तयोर्न णत्वमखण्डपदत्वाभावात् नन्वखण्डपदत्वं पदाघटितपदत्वं तच्च रामनामेति समुदाये न, पदत्वसत्त्वेऽपि पदाघटितत्वाभावादिति चेन्न मातृभोगीण इत्यादौ मातृपदघटितत्वेन पदाघटितत्वाभावेन णत्वानापत्तेः नच निमित्तिमत्पदाघटितत्वन्तत्वं मातृपदस्य निमित्तिमत्त्वाभावेन भोगीनित्यस्य केवलप्रत्ययस्य वा पदत्वाभावेन च मातृभोगीनेति समुदाये विशिष्टाभावसत्वेन णत्वोपपत्ते रिति वाच्यं । शोभनं पर्व यस्य तेन सुपर्वणेत्यादौ निमित्तिमत्पदं पर्वन्निति तद्घटितत्वेन णत्वानापत्तेरिति चेन्न निमित्तानधिकरणनिमित्तिमत्पदाघटितत्वस्य सुवचत्वात् पर्वन्नित्यस्य निमित्तानधिकरणत्वाभावेनादोषात्

नच गन्धर्वस्य गान इत्यर्थे गानमित्यादौ गतिकारकोपपदानामित्यनेन सुबुत्पत्तेः प्रागेव समासे गानेत्यस्य पदत्वाभावेन समुदाये विशिष्टा-भावसत्वेन णत्वापत्तिरिति वाच्यम् पदशब्देन पदत्वयोग्यस्यार्थवत एव ग्रहणेनार्थवत्वस्य तत्र सत्वेनाभावान्तलक्षणस्य तत्समुदाये ऽभावेन णत्वापत्तेरयोगात् ननु ऋवर्णात्परस्यापि नस्य णत्वमित्यर्थज्ञापकत्वं णत्वाभावाय क्षुभ्नादिषु पठितस्य नृनमनशब्दस्य, अन्यथा रेफषकारात्प-रत्वस्याभावेन णत्वाभावोपपत्तौ पाठस्यवैयर्थ्यापत्तेरित्यस्य भाष्योक्तस्या-सङ्गत्यापत्तिर्निमित्तानधिकरणं निमित्तमत् पदं नमनेति तद्घटितत्वेन समानपदत्वाभावेन ज्ञापितेऽपि स्वांशे चारितार्थ्याभावादिति चेन्न नृनमनेति समुदायस्य संज्ञाभूतस्य पदघटितत्वाभावेनाखण्डपदत्वात् । अथ सर्वैनरेणेति तृतीयान्तपदे ऽस्ति सर्वैति नरेति च पदन्तत्र किमपि निमित्तानधिकरणं निमित्तमदिति निमित्तानधिकरणनिमित्तमत्पदा-घटितत्वेन विभक्तिनकारस्येव नरनकारस्यापि णत्वापत्तिरितिचेदत्रो-च्यते रेफषकारान्यतरविशिष्टस्य नस्य णत्वमित्यर्थः वैशिष्ट्यञ्च स्वोत्त-रत्व स्वाघटितपदाघटकत्वोभयसम्बन्धेन नरघटकनकारे रेफवैशिष्ट्य-वास्ति स्वोत्तरत्व सत्वेऽपि द्वितीयसम्बन्धाभावादिति न णत्वं विभ-क्तिनकारे नरघटकरेफवैशिष्ट्यमस्ति यतः स्वोत्तरत्वमप्यस्ति स्वाघटित-पदाघटकत्वञ्चास्तीति भवति तस्य णत्वम् नारायणशब्दे संज्ञाश-ब्दत्वेन समानपदत्वमुपपाद्यम् ॥

कोशे शब्दा अर्थपरा एव ।

ननु पद्दन्नोमासिति सूत्रे प्रभृतिग्रहणस्य प्रकारार्थत्वे प्रमाणं पदं-घ्रिश्चरणोऽस्त्रियां स्वान्तं हृन्मानसं मन इत्यमरकोशे सौ परे पच्छ-ब्दस्य हृच्छब्दस्य च प्रयोगः आद्यर्थत्वे हि शसादावेव पदादिशब्दस्य साधुत्वबोधनेन सौ तयोरसाधुत्वापत्तेः प्रकारार्थत्वे च प्रकारस्सा-दृश्यमितिशस्सदृशे परे इत्यर्थेन सूत्रेण शसादृश्यस्य स्वादावपि सत्वेन तस्मिन्नपि परे साधुत्वोपपत्तिरिति दीक्षितस्य नागेशस्य चाश-

यस्तदनुपपन्नं पदधातोः हृधातोश्च क्विपि पत् पदौ पदः हृत् हृदौ हृद इति रूपाणां साधुत्वस्य सर्वसम्मतस्योपपत्तये चरणवाचकस्य पच्छब्दस्य हृदयवाचकस्य हृच्छब्दस्यैव शसादावेव साधुत्वमित्यस्य वक्तव्यतया कोशस्यपदानामनुकरणत्वेन शब्दपरतया पादाद्यवाचकत्वेन सूत्राविषयतया स्वादावपि साधुत्वानुपपत्तेरभावेन ज्ञापकत्वासम्भवात् प्रकृतिवदनुकरणमित्यनेनानुकार्य्यगतचरणवाचकत्वादेरतिदेशात्सूत्रविषयतेति चेत्तस्यातिदेशस्य वैकल्पिकत्वेनाप्युपपत्तेर्ज्ञापकत्वासम्भवादिति चेन्न कोशे·शब्दानामर्थपरत्वात् ननु तर्हि विष्णुर्नारायणः कृष्ण इत्यादिवाक्याद्बोधानापत्तिस्तस्यैव शक्तिग्राहकत्वेनैतद्वाक्यार्थबोधात्प्राक् शक्तिग्रहाभावेन सहकारिकारणविरहात् वाक्यार्थबोधोत्तरं शक्तिग्रहः शक्तिग्रहानन्तरञ्च वाक्यार्थबोध इत्यन्योन्याश्रयादिति चेन्न विष्णुपदमर्थबोधकं पदत्वात्घट पदवदित्यनुमानेन सामान्यतश्शक्तिग्रहसम्भवात् नच सामान्यतश्शक्तिग्रहेऽपि विष्णुपदार्थोभिन्नोनारायणपदार्थ इत्यादिक्रमेण बोधोऽनुपपन्न एवाशक्यस्य विष्णुपदत्वादेश्शाब्दबोधे भानासम्भवात् अनुमितिस्त्वर्थत्वावच्छिन्नस्यैव तस्यैव पदत्वव्यापकत्वाद्विष्णुपदार्थत्वावच्छिन्नस्यातथात्वेनानुमित्यविषयत्वात् यत्र यत्र स्वरूपसम्बन्धेन पदत्वन्तत्र तत्र शक्तिसम्बन्धेनार्थ इत्याकारकव्याप्तेरेव सत्वादिति वाच्यं सामान्य वह्निधूमयोरेव व्याप्यव्यापकभावेपि योग्यताबलात्पर्व्वतोवह्निमानित्यादौ पर्वतीयवह्नेरेव भानवदर्थपदत्वयोरेव व्याप्यव्यापकभावेऽपि विष्णुपदमर्थवत् पदत्वादित्यनुमानेऽपीतरबाधादिना विष्णुपदार्थस्यैव भानात् ननु विष्णुपदार्थत्वादेरनुमितौ शक्यविशेषणतया भानेऽपि शक्योपलक्षणतया तत्पदजन्यबोधे बुद्धिस्थत्वस्यैव शाब्दबोधे भानानुपपत्तिरेवेति चेन्न शक्यतावच्छेदकज्ञानात्प्रागुपलक्षणीभूतस्यापि भानोपगमा-दत एवागृहीतशक्तिकं प्रति घटमानयेत्युक्ते कोऽस्ति घटपदार्थो य आनेतव्य इति प्रश्नोभवति मम तु शक्यतावच्छेदकाज्ञानेऽपि घटपदार्थत्वादिना बोधाद्विशेषरूपावच्छिन्ने प्रश्न

उपपद्यते । नन्वेवमपि विष्णुपदार्थाभिन्नोनारायणपदार्थ एवं क्रमेणैव कोशजन्यबोधे विष्णुत्वादिविशेषरूपावच्छिन्ननिरूपितशक्तिग्रह एवेति चेन्न पठितानां पर्य्यायशब्दानामेकं पदं व्यवहारादिना यदि विशेषरूपेण गृहीतशक्तिकं तदैव कोशाद्बोधो नान्यथा तत्पदादुपस्थितविशेषधर्म्मावच्छिन्नस्य विष्णुपदार्थत्वादिनोपस्थितविष्णुपदार्थान्वितनारायणपदार्थत्वाद्यवच्छिन्नेऽभेदेनान्वयबोधे वाक्याज्जाते पश्चादनुमानेन सर्वेषां पदानां विशेषधर्म्मावच्छिन्ने शक्तिग्रहसम्भवा-दनुमानञ्च नारायणपदं विष्णुत्वावच्छिन्नवाचकं विष्णुत्वावच्छिन्नाभिन्नबोधकत्वे सति विशेषधर्म्मावच्छिन्नाबोधकत्वात् यत् पदं विशेषधर्म्मावच्छिन्नाबोधकं सत् यद्धर्म्मावच्छिन्नाभिन्नबोधकं तत् तद्धर्म्मावच्छिन्नशक्तिमत् घटपदार्थत्वेन बोधक घटपदवत् कोशस्थवाक्यजन्यबोधानन्तरं मानस एव विशेषधर्म्मावच्छिन्नबोधकत्वग्रह इति वा बोध्यम् यस्य च सर्वं पदं विशेषरूपेण गृहीतशक्तिकन्तस्यैकरूपेणैव सर्वेभ्यः पदेभ्य उपस्थित्या घटोघट इति वाक्यवत् कोशस्थवाक्यं न शाब्दबोधजनकम् नच कस्य विद्विष्णुपदं कस्यचिन्नारायणपदं विशेषधर्म्मावच्छिन्ने गृहीतशक्तिकं कस्य चिदन्यदेवेति पुरुषभेदेन सर्वाण्येव पदानि विशेषधर्म्मावच्छिन्नबोधकानि सामान्यधर्म्मावच्छिन्नबोधकानि चेति वक्तव्यन्तदनुपपन्नं सकृदुच्चरितन्यायादिति वाच्यम् एकस्मात्पदादेकस्य पुरुषस्यैकदैव बोध इत्यर्थ एव तन्न्यायस्य तात्पर्य्यात् पुरुषभेदेनोभयबोधकत्वेऽपि क्षतिविरहात् अघ्न्ये देवि सरस्वति ईडे इत्यादि मन्त्रस्योपन्यासस्त्वस्मिन् प्रकरणे विफल एव तस्य कोशत्वाभावेनार्थपरत्वस्य सर्वसम्मतत्वात् नच कोशस्थशब्दानामर्थपरत्वे एकदन्त हेडम्ब-लम्बोदर-गजानना इत्यादौ विरूपाणामपि समानार्थानामित्यनेनैकशेषापत्तिरिति वाच्यम् एकदन्तादिपदानामेकदन्तपदार्थत्वादिविभिन्नधर्म्मावच्छिन्नबोधकत्वेनैकधर्म्मावच्छिन्नबोधकत्वरूपसमानार्थत्वविरहात् एकधर्म्मिबोधकत्वमात्रेण तु समानार्थकत्वे गुणवद्द्रव्यपदयोरप्येकशेषप्रसङ्गात् शब्दस्वरूप-

बोधनपूर्वकार्थबोधने कोशस्य तात्पर्य्याच्चात एव यत्तदेतेभ्य इत्यत्र त्यदादीनि सर्वैर्नित्यमित्येकशेषेण तत्रापि स्वरूपबोधने तात्पर्य्यात् वस्तुतस्तु शब्दस्वरूपपरतया त्यदादित्वस्यैवाभावात् परन्तु कोशे शाब्दानां शब्दस्वरूपपरत्वमेव विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवा इत्यादावेकार्थका इत्यस्याध्याहारेणैते शब्दा एकार्थका इति सामान्यतो वाक्यार्थबोधोत्तरं यत्किञ्चित्पदे विशेषरूपावच्छिन्ने शक्तिग्रहवतः पुरुषस्य मानसस्सर्वपदशक्तिग्रहः शब्दपरत्वेन समानार्थकत्वाभावादेकदन्तेत्यादावेकशेषश्च न ननु तर्हि चरणवाचकपदादिशब्दानां शसादावेव साधुत्वमिति बोधनेऽपि स्वरूपवाचकपदादीनामेतत्सूत्राविषयतया स्वादावपि साधुत्वस्य सिद्धतया ज्ञापकत्वानुपपत्तिरिति चेन्न यत्किञ्चिद्विभक्तिवचनलिङ्गनियतसाधुत्वकानां शब्दानां तत्तल्लिङ्गवचनविभक्तीनामुपन्यासपुरस्सरं तत्तच्छब्दानामुपादानस्य कोशकृच्छैलीविषयत्वम् । लाजाः पुंसि च भूम्न्येव दाराः पुंसीत्यादौ यथा तथैवेदानीं पदादिशब्दानां शसादावेव साधुत्वे पत् हृच्छस्प्रभृतिषु इत्येव वक्तव्ये पदङ्घ्रिश्चरणोऽस्त्रियामित्युक्तेर्ज्ञापकत्वोपपत्तेरित्यलम् ।

॥ धातोः किं हाहानिति ॥

गन्धर्ववाचकोऽव्युत्पन्नो हाहाशब्दः सूत्रे धातुग्रहणाभावे आदन्तत्वेनास्य शब्दस्य य आकारस्तस्यापि लोपस्स्यात् तत्सत्त्वे तु धातुत्वाभावान्न दोष इति भावः यदि तु हा इति शोकव्यञ्जकं शब्दं जहाति त्यजतीत्यर्थको हाक्धातुप्रकृतिकक्विबन्तो हाशब्दस्तदा लोप इष्ट एव धातोरित्यस्य फलन्तु आकारेण सहितः सास्सतशशसि सानित्यादौ बोध्यम् वस्तुतस्तु अत्रापि लोप इष्ट एव तथा हि स्कः श्नः इत्यादौ लोपसिद्धये आतो नाप इति वार्त्तिककृतोक्तम् आवन्तभिन्नस्य लोप इति तदर्थः भाष्यकृता च आत इति योगविभागेन क्त्वः श्नः इत्यत्र लोपं संसाध्यातोनाप इति वार्त्तिकम्प्रत्याख्यातमेवञ्च हाशब्दे लोपस्य वार्त्तिकमते इष्टस्य प्रत्याख्यानेऽपि आत इति योगेनेष्टत्वमे-

वान्यथाऽऽरम्भप्रत्याख्यानयोः फलभेदापत्तेः एवञ्च वार्त्तिकतत्प्रत्याख्यानपरभाष्याभ्यां फलैक्याय धातुग्रहणमावन्तभिन्नपरमेव तथाच सूत्रवार्त्तिकभाष्यकाराणां मतेषु फलैक्यं संपन्नम् सूत्रे धातोरित्यस्य धातुमात्रपरत्वे तन्मते सानित्यत्र लोपो नेष्यते इत्येववक्तव्यं तच्चान-ञ्च वार्त्तिककृतोभाष्यकृतश्च नास्ति अत एव वार्तिककृता आतोनाप इत्युक्तमातइतियोगविभागेन भाष्यकृता च तत्प्रत्याख्यातमन्यथा तत्रैव फलभेदात् तथाकरणे तयोः प्रवृत्तिर्नस्यात् तथाच महर्ष्योस्तयोर-ज्ञानित्वकल्पनमनुचितं स्यात् नच वार्त्तिके अनाप्पदमावन्तभिन्न-धातुपरमित्येवोच्यतां सूत्रे धातुपदञ्च स्वार्थपरमेवास्तु सानित्यत्र लोपः सर्वेषाम्मते इष्ट एवास्त्वित्येव कुतोन फलभेदस्यास्मिन्नप्यर्थे अभावात् नच सानित्यत्र फलभेदाभावेऽपि त्वः इन इत्यत्र धातु-त्वाभावेन लोपो न स्यात् आत इति योगविभागेन भाष्यमते लोपे तु सूत्रवार्तिकमते अप्राप्त्या फलभेदो दुर्वारस्स्यादिति वाच्यम् तत्रा-पि स्वस्मिन्नपि स्वसदृशाचरणकर्तृत्वसम्भवेनाचारक्विबन्तात्कर्तृक्विप-स्सत्वेन सर्वेषां मते लोपस्य प्राप्तेरव्याहतत्वात् नचावन्तमालाशब्दप्र-कृतिकाचारक्विबन्तात् कर्तृक्विबन्तमालाशब्दे सूत्रभाष्यमते प्राप्तेर्वार्ति-कमते चाप्राप्तेः फलभेदो दुर्वार इति वाच्यम् तादृशक्विपोऽनभिधा-नस्य कल्पनादिति वाच्यम् प्रथमयोरिति सूत्रस्थभाष्यविरोधात् तत्र-हि अतोगुणे इति पररूप-मकस्सवर्णे प्रथमयोः पूर्वसवर्णे इति दीर्घ-मात्रस्य वाध्यसामान्यचिन्तया वाधकमिति पक्षे रामानित्यादिसिद्धये वहुवचने झल्येदिति सूत्रे वहुवचने इति योगं विभज्य तत्र अतो-दीर्घ इति सुपि चेत्यतस्सुपीति चानुवर्त्त्य वहुवचने सुपि अदन्ताङ्ग-स्य दीर्घं विधायाग्नीनामित्यादौ सावकाशं नुटं रामाणामित्यादौ पर-त्वाद्बाधित्वा दीर्घे कृते नुटोऽप्राप्तिमाशङ्क्य नुड्विधायके आज्जसेरसुग-त्यत आद्ग्रहणमनुवर्त्त्यादन्तादपि नुटोविधानेन समाधाय कीलालपा-मित्यादावालोपं परत्वाद्बाधित्वाऽऽदन्तत्वमपत्तोनुट्स्यादित्याशंक्या-

तोधातोरिति नुट्‌विधायकेऽनुवर्त्त्य वाक्यभेदेन नुटोबाधकमातोलोपं विधाय समाहितम् भवदुक्तरीत्याऽधात्ववयवाकारस्य लोपाभावे तु पूर्वोक्त-सा-शब्दा-दाम्नि लोपाभावेनादन्तान्नुटि सानां सिद्धान्तभूते यथास्थितपक्षे ह्रस्वनद्यापः परत्वाभावेन नुटोऽप्राप्त्या दीर्घं सामितिफलभेदेन तद्भाष्यविरोधः स्पष्ट एव तस्मात्सूत्रे धातुपदमावन्तभिन्नपरमेव सानित्यत्र लोप इष्यत एव नतु वार्त्तिके अनापपदमावन्तभिन्नधातुपरं सानित्यादौ लोपोनेष्यते इति युक्तम् । ननु सूत्रस्थधातुपदस्यावन्तभिन्नपरत्वे ङ्याप्प्रातिपदिकादिति सूत्रस्थभाष्यविरोध—स्तत्र हि रमेत्यादौ पूर्वान्तवद्भावेन प्रातिपदिकत्वादेव सिद्धे आब्ग्रहणस्य दामेत्यादौ डापि फलन्दत्तं तत्र टिलोपेनैकादेशाभावादिति तद्भावः टायां त्वायामिति भाष्यप्रयोगे टापोदर्शनेन तत्प्रकृतिभूत-ष्टा त्वा शब्दः प्रत्ययानुकरणरूप आवन्तभिन्न इत्यवश्यं वक्तव्यस्तस्य च टापि भसंज्ञाप्यस्ति तद्धिताधिकारे पाठेन स्वादिकप्रत्ययावध्यन्तर्गतत्वात् टाप, इत्यावन्तभिन्नाकारान्तत्वेनातोधातोरित्याकारलोपस्यावश्यं भावात् पूर्वान्तत्वेन प्रातिपदिकत्वस्य वक्तुमशक्यतया स्वाद्युत्पत्त्यर्थं टाप्यप्याब्ग्रहणस्य सार्थक्यसम्भवेन ङाप्पर्य्यन्तानुधावनस्य महर्षेर्वैयर्थ्यापत्तेरिति चेत्सत्यं वार्त्तिकेन फलेक्यायातोधातोरित्यस्य स्त्रीबोधकपदाघटकाकार एव तात्पर्य्यं तथा च प्रकृतिभूतत्वाशब्दस्यावन्तभिन्नत्वेऽपि टाबुत्पत्त्यर्थं स्त्रीबोधकत्वस्यावश्यकतया तदाकारस्य लोपाप्राप्तेः नन्वेवमेनसहिता स्त्री सा इत्यत्रादन्तत्वाभावेन टापोऽभावेऽपि स्त्रीबोधकत्वेनातोधातोरित्यस्याप्राप्त्याऽऽदन्तात्परत्वेनामो-नुटि सानामिति यथास्थितन्यासे ह्रस्वनद्यापः परत्वाभावेन नुटोऽप्राप्त्या सामिति फलभेदात्प्रथमयोरिति सूत्रस्थभाष्यविरोध एवेति चेन्न रमाणामित्यादावावन्तस्यलेऽप्यादन्तत्वादेव नुटस्सिद्धावाब्ग्रहणस्य स्त्रीबोधकादादन्ताच्चेदावन्तादेवेति नियमार्थत्वेनास्मिन्नपि पक्षे नुटोऽप्राप्त्या फलभेदाभावात् आब्ग्रहणान्नकर्त्ते

ऋमिति शेखरस्तु चिन्त्य एव नन्वेतत्साशब्दे सूत्रमते लोपाप्राप्त्या वार्त्तिकमते च प्राप्त्या फलभेद एवेति चेन्न अनाप इत्यस्यापि स्त्रीबोधकभिन्नस्येत्यर्थेन सूत्रवार्त्तिकयोरेकार्थकत्वात् ननु राम आमिति स्थिते नुटः परत्वाद्दीर्घे आवन्तरमाणामित्यादौ लोपाप्राप्तिविषये चरितार्थमादन्तत्वनिमित्तकं नुटं प्रबाध्य कीलालपामित्यत्रवातो धातोरिति लोपेन रामामिति स्यादिति चेन्न श्रीपायेत्यत्रेवात्वमुपजीव्य जायमानैकादेशरूपाकारस्यात्वविघातकमातो धातोरित्येतत्प्रत्यनिमित्तत्वेन लोपाप्राप्तेः नन्वष्टानामित्यत्र षट्चतुर्भ्यश्च इति नुट्यष्टन आ विभक्तावित्यात्वे अष्टानामिति स्थिते यदागमन्यायेन नाम आम्त्वादादन्तात्परत्वाद्ध्रस्वनद्यापइति नुटि न द्वयश्रवणापत्तिरिति चेन्न ह्रस्वनदीसाहचर्य्येणाकृतनुट्कस्यैवाम आदन्तादित्यनेन नुट् विधानात् ननु तेषामित्यादौ त्यदाद्यत्वे अग्नीनामित्यादौ सावकाशं नुटमावन्तादामि सावकाशं सुटश्च परत्वाद्बाधित्वा बहुवचन इत्यनेन दीर्घे ता आमिति स्थिते सुटि अदन्तत्वाभावादेत्वाप्राप्त्या तासामिति स्यान्न तेषामिति चेन्न बाध्यसामान्यचिन्तापेक्षया नुट इव दीर्घस्यापि सुटा तक्रन्यायेन बाधात् यदि दीर्घो न स्यात्तदा सुटि कृते एत्वं स्यादिति सम्भावनया पूर्वं दीर्घाप्राप्ते रुपसंजनिष्यमाणनिमित्तोऽप्यपवाद उपसंजातनिमित्तमप्युत्सर्गं बाधत इति न्यायादिति दिक्।

समुदायस्य सखिरूपत्वाभावादसखीत्यादि।

दीक्षितमतेऽसखीत्यस्य सखिशब्देन नञस्सम्बन्धात् सखिभिन्नशब्दावयवाविवर्णोवर्णौ घिसंज्ञाविति वर्णसंज्ञापत्तेऽर्थः कृतं सख्येति वाक्ये कृतं सखीति समुदायस्य सखिभिन्नत्वेन तदवयवेकारस्य घिसंज्ञा तु न पर्य्युदासन्यायेन प्रातिपदिकत्वेन सखिसदृशस्यैव सखिभिन्नस्य ग्रहणेन कृतं सखीत्यस्यासखिशब्देनाग्रहणात् वर्णसंज्ञापत्ते आकडारीयत्वाल्लघुघिसंज्ञयोस्समावेशानापत्त्या सिद्धान्तभूते तदन्तसंज्ञापत्ते तु सखिभिन्नाविवर्णोवर्णान्तौ घिसंज्ञावित्यर्थः पक्षद्वयेऽपि सुसखिनेत्यादौ

घित्वं युक्तमेव समुदायस्य सुसखीत्यस्य सखिशब्दभिन्नत्वात् ननु घट पटौ न घट इति प्रतीतेरभावात् स्वघटितसमुदायत्वावच्छेदेन स्ववृत्तिधर्म्मावच्छिन्नप्रतियोगिताकभेदस्याभावेन सखिघटितसमुदाये सुसखिशब्दे सखिशब्दभिन्नत्वाभावात् सुसखिशब्दस्य घित्वमयुक्तमिति चेदत्रोच्यते स्वाङ्गसमुदायो न स्वाङ्गमिति भाष्यात् स्वघटितसमुदाये स्वभेदोऽस्त्येवेत्येव वैयाकरणैरभ्युपेयम् किञ्च घटाकाशोभयत्वावच्छेदेनाकाशे द्वित्वस्य सत्वेऽप्याकाशत्वावच्छेदेन द्वित्वावच्छिन्नप्रतियोगिताकभेदतात्पर्य्येणाकाशो न द्वाविति प्रयोगो यथा तथा सखित्वावच्छेदेन सखित्वादे-स्सखिघटितसमुदाये सत्वेऽपि सुसखित्वावच्छेदेन सखिशब्दभिन्नत्वस्य सत्वे बाधकाभावः किञ्च सुसखित्वरूपानुपूर्व्याः सखिघटितसमुदायत्वरूपत्वाभावेन स्वघटितसमुदायत्वावच्छेदेन स्वभिन्नत्वाभावेऽपि तादृशानुपूर्व्यवच्छेदेन सखिभिन्नत्वस्य निराबाधत्वमेव किञ्च भेदविधेयस्थले एव निरवच्छिन्नानुयोगिताकभेदस्यास्वीकार उद्देश्यतावच्छेदकावच्छेदेनैव विधेयान्वयनियमात् प्रकृते भेदस्य विधेयत्वाभावेन निरवच्छिन्नानुयोगिताकभेदप्रतीतौ बाधकाभावेनादोषात् शेखरकृता च नशक्व्यप्रसात् अत्वसन्तस्य चाधातोरित्यादौ प्रसात् शब्दावयवभिन्ननकारान्तपदस्य धात्ववयवभिन्नोयोऽस्तदन्तस्येत्यर्थ इवात्रापि सखिशब्दावयवभिन्नेकारान्तस्येत्येव सखिशब्दस्य तदवयवे लक्षणां स्वीकृत्यार्थोऽभ्युपेयते अवयवे।द्देश्यककार्य्ये समुदायोयत्र पर्य्युदस्यते तत्र समुदायबोधकपदानां स्वावयवपरत्वमिति नियमस्वीकारात् तथा च सुसखिशब्दावयवेकारस्य सखिशब्दावयवभिन्नत्वाभावा च सुसखिशब्दस्य घिसंज्ञेत्युच्यते। नच सख्यवयवभेदस्येकारे नान्वयस्तदन्तविधिनेदन्त इत्यर्थ इकारस्य पदार्थैकदेशत्वादिति वाच्यम् उतश्च प्रत्ययादसयोंगपूर्वादित्यत्र तदन्तविधिना लब्धस्योदन्तस्यैकदेशे उकारे असयोंगपूर्वत्वस्येव ङमोह्रस्वादचीत्यत्र ङमि ह्रस्वात्परत्वस्येव पदार्थैकदेशे-

ऽप्यन्वयस्य स्वीकारात् तदन्तविधिश्च शेषपदार्थविशेषणीकृत्यबोध्य: लक्षणयैतादृशार्थं प्रमाणाऽय्यॅस्येति चेति सूत्रस्थं भाष्यम् तत्र हि इव-र्णस्य ईकारे परे लोपे किमुदाहरणमतिसखेरागच्छति सखीमतिक्रान्तो-ऽतिसखि: सखिशब्दात्सख्यशिश्वीति भाषायामित्यनेन ङीषि अतिना समासे उपसर्जनह्रस्वे अतिसखिस्तत्र ङीष ईकारे परे सख्यवयवेका-रस्य लोपाभावे दीर्घैकादेशे सखीशब्दस्य पूर्वान्तवद्भावेन सखिशब्दत्वं उपसर्जनह्रस्वत्वे आनुमानिकस्यानिवद्भावेन सखिशब्दत्वं नच तस्य लाक्षणिकत्वात्सखिशब्देनाग्रहणमिति वाच्यम् अतिदेशविषये प्रतिप-दोक्तपरिभाषाया अप्रवृत्तेरन्यथाऽतिदेशस्य वैयर्थ्यापत्ते-स्ततश्च घिसंज्ञा न स्याल्लोपे तु पूर्वान्तवद्भावाभावात् लाक्षणिकत्वात् कृतह्रस्वेकारान्त-सखिशब्दस्य सखिशब्देनाग्रहणात् घिसंज्ञासिद्धेरित्युक्तम्। प्राचान्तु लोपाभा-वेऽपि अतिसखीति समुदायस्य सखिभिन्नत्वेन घिसंज्ञाया दुर्वारतया भाष्यासङ्गति: स्पष्टैव नवीनमते लोपे उक्तरीत्या इकारस्य सख्यवयव-भिन्नत्वात्तदन्तस्य घित्वं तदभाव उक्तरीत्या तस्य सख्यवयवत्वेन तद-न्तस्य घित्वाभावश्च स्पष्ट एवेति न भाष्यविरोध: नच नवीनमतेऽपीदं भाष्यमसङ्गतमेव लोपेऽपि प्रातिपदिकग्रहणपरिभाषया सखिशब्द-त्वस्य ईकारान्ते आनुमानिकस्यान्यादेशभावेन च ह्रस्वान्ते सत्त्वेने-कारस्य सखिशब्दावयवत्वस्यैव सत्त्वेन घित्वाप्राप्तेरिति वाच्यम् । सखिशब्दस्य सख्यवयवपरत्वेन प्रातिपदिकमात्रवृत्तिविषयताप्रयोजक-त्वाभावेन परिभाषाया अप्राप्ते: नच नवीनमतेऽपि ख्यत्यादिति सूत्रस्थं भाष्यमसङ्गत—त्तर्हि किमर्थं विकृतनिर्द्देश: नसखिपतिभ्या-मित्येवोच्येत अतिसखेरित्यत्र माभूदित्युक्तम् तत्र सखायमतिक्रान्त इत्यर्थे घिसंज्ञा—नापत्ति—रिकारस्य सख्यवयवत्वात् सखीमतिक्रान्त इत्यर्थे विभक्तौ लिङ्गविशिष्टाग्रहणमिति निषेधात्प्रातिपदिकग्रहण इत्यस्या अप्रवृत्त्या श्रूयमाणस्य सखिशब्दस्य लाक्षणिकत्वेन च सखिशब्दा-त्परत्वाभावेन दोषाभावादिति वाच्यम् लक्षणप्रतिपदोक्तपरिभाषया

अनाश्रयणेनैतद्भाष्यस्य सत्वात् नचैवं सति नवीनमते भाष्यस्य न्यूनत्वापत्तिः प्राचीनमते तु अद्यन्त एव सखिशब्दस्तस्य प्रतिपदोक्तत्वान्न न्यूनत्वदोष इति वाच्यं तन्मतेऽपि अतिसखिशब्दान्ङसोविहितत्वेन सखिशब्दाद्विहितत्वाभावेन विहितविशेषणानाश्रयणेनैवैतद्भाष्यस्य सत्वमित्यस्य वक्तव्यत्वेनोभयमते न्यूनतायास्साम्यात् वस्तुतस्तु सखिपतिभ्यामित्येव कस्मान्नोक्तं ख्यत्यादिति विकृतनिर्द्देशः किमर्थं इत्यर्थके प्रकृत भाष्ये सखिपतिभ्यामित्युपलक्षणं खितिभ्यामित्यस्य, यथा श्रुते लाघवाभावात् तथाच विहितविशेषणे सख्युः पत्युरित्यत्राप्युत्वानापत्त्या विहितविशेषणानाश्रयणस्योचितत्वात् प्रतिपदोक्तपरिभाषानाश्रयणस्य निर्य्युक्तिकत्वात् दिग्योगलक्षणपञ्चम्यपेक्षया ल्यब्लोपपञ्चम्याश्रयणेगौरवाच्च प्राचीनमते एवेदं भाष्यं समर्थ्यंसम् ॥

प्रत्ययलोपे प्रत्ययलक्षणम् ।

आद्यप्रत्ययग्रहणाभावे लोपे सति प्रत्ययनिमित्तकं कार्य्यं भवतीत्यर्थे अपिपूर्वकादीङ्धातोः क्विपि समासे औ विभक्तौ भागुरिमते विधानमित्यत्रेवोपसर्गाकारलोपे अनेकाच्त्वाभावेन यणोऽप्राप्तावियङि पियौ पिय इति सिद्ध्यति इदानीमकारस्य लोपसत्वाल्लोपे सति औविभक्तिरूप–प्रत्ययनिमित्तक एरनेकाजिति यण् स्यात् प्रत्ययग्रहणे सति प्रत्ययलोपाभावान्न भवति ननन्देत्यादावितोलोपे लिड्निमित्तक इजादेश्च गुरुमतोरित्याम्चस्यात् । प्रत्ययलोपाभावान्न भवति नच कृतेऽपि प्रत्ययग्रहणे पियावित्यादौ दोष एव क्विपो लोपसत्वादितिवाच्यम् प्रत्यासत्त्या लुप्तप्रत्ययनिमित्तककार्य्यस्यैवानेनातिदेशेनादोषात् प्रत्ययग्रहणाभावेऽपि लोपप्रतियोगिप्रत्ययनिमित्तकमेव कार्य्यं प्रत्यासत्त्युक्तौ तु प्रत्ययग्रहणस्य वैयर्थ्यमेवेति बोध्यम् ॥ प्रत्ययलोप इति सति सप्तमी तेन पच भवतीत्यादौ तिङतिङ्इति निघाते कर्त्तव्ये प्रत्ययलक्षणेन पदत्वं दधीयति मधूयतीत्यादौ प्रत्ययलक्षणेन सुबन्तत्वमादाय सुप आत्मन इति क्यच् वेभिदीतीत्यादौ प्रत्ययलक्षणेन यङन्तैवेतीट्

सिद्ध्यति औपश्लेषिकसप्तम्यां तु प्रत्ययलोपाव्यवहितपूर्वस्य प्रत्ययनिमित्तककार्य्यमित्यर्थापत्तावुक्तेषु लक्ष्येषु प्रत्ययलक्षणं न स्यात्। ननु प्रत्ययस्येत्यनुवृत्त्या सिद्धे आद्यप्रत्ययग्रहणं व्यर्थमेवेति चेन्न सामर्थ्यात् कृत्स्नप्रत्ययलोप इत्यर्थबोधनद्वारा प्रत्ययावयवलोपे प्रत्ययलक्षणाभावार्थत्वात् नच प्रत्ययत्वस्य समुदायपर्य्याप्तत्वेन प्रत्ययावयवलोपे प्रत्ययलोपस्यैवाभावेन सूत्राप्रवृत्त्या ज्ञापने फलाभाव इति वाच्यं यावद्विना न चारितार्थ्यं-न्तावज्ज्ञाप्यमिति न्यायेन प्रत्ययावयवे प्रत्ययत्वव्यवहारस्याप्यनेनैव ज्ञापनात् अन्यज्ज्ञापनादेवादेशप्रत्यययोरित्यत्र प्रत्ययपदस्य प्रत्ययावयवे लक्षणाश्रयणं न प्रत्ययावयवस्यापि प्रत्ययत्वात् नच लक्षणां प्रत्ययावयवे प्रत्ययत्वव्यवहारं च विनाप्यवयवावयविभावसम्बन्धेन प्रत्ययस्य सकारेऽन्वयाददोष इति वाच्यम् एकसम्बन्धेनैकस्मिन्द्वन्द्वघटकसर्वपदार्थानामन्वयाभावे द्वन्द्वस्यासाधुत्वापत्तेः इदुदुपधस्य चाप्रत्ययस्येति सूत्रे चाप्रत्ययघटकप्रत्ययपदस्य प्रत्ययावयवे न लक्षणा अवयवेऽपि प्रत्ययत्वस्यैव सत्वात् नच लक्षणां विनापि प्रत्ययस्य विसर्गे वैयधिकरण्यान्वयेन प्रसज्यप्रतिषेधाश्रयणेन च प्रत्ययावयवविसर्गस्य न षत्वमित्यर्थेनादोष इति वाच्यम्। असमर्थसमासवाक्यभेदकल्पनागौरवात् आद्यज्ञापनफलमाघ्नीयेत्यादावनुनासिकलोपाभावः अन्यथा आङ्पूर्वाद्धन्धातोर्विधिलिङि इटो ऽति सीयुटि लिङस्सलोप इति सकारलोपे गमहनेत्युपधालोपे होहन्तेरिति कुत्वे निष्पन्ने आघ्नीयेत्यत्र प्रत्ययावयवसकाररूप-प्रत्ययलोपे तन्निमित्तकस्यानुदात्तोपदेशेत्यनुनासिकलोपस्य प्रत्ययलोपसूत्रेणापत्तिः ज्ञापने तु प्रकृते कृत्स्नप्रत्ययस्य लोपाभावेन प्रत्ययलक्षणसूत्राप्राप्तौ झलादित्वाभावेन नलोपो न। एवं समिधमिच्छति समिध्यति क्विप्लोपयलोपे टाविभक्तौ समिधेत्यादौ प्रत्ययलक्षणेनाकारमादायेनादेशोऽपि न अवयवस्यैव लोपात् अथ कृत्स्नप्रत्ययनिवेशेऽपि सुदृषत् प्रासाद इत्यादावसन्तत्वं प्रत्ययलक्षणेनानीयात्वसन्तस्येति दीर्घामा भूदित्येतदर्थं प्रत्ययत्वव्याप्यधर्म्मस्यैव लुप्तप्रत्ययगतस्याभि-

देशोऽनेनेत्यस्यावश्यं वक्तव्यतया आर्ङ्गीयेत्यादौ लुप्तोयस्सकाररूपः
प्रत्ययस्तद्वृत्तिफलत्वं न प्रत्ययत्वव्याप्यमिति तस्यातिदेशाभावेनावयव-
लोपे न अपि तु कृत्स्नप्रत्ययलोप एवेति ज्ञापनस्य न फलमिति चेन्न
प्रत्ययमात्रवृत्तिविषयताप्रयोजकय्यँत्पदन्तत्प्रतिपाद्यतावच्छेदकधर्म्मस्यैव
प्रत्ययासाधारणधर्म्मपदेन विवक्षितत्वात् प्रत्ययावयवे प्रत्ययत्वव्यव-
हारे ज्ञापिते प्रकृते फलपदप्रयोज्यविषयतायाः प्रत्ययाद्यवयवसकाररूप
प्रत्ययनिष्ठायाः प्रत्ययत्वव्याप्यत्वात्ततः सुदृषदित्यादौ तु नात्वसन्तेति
सूत्रघटकास्पदप्रयोज्या विषयता प्रत्ययत्वव्याप्या मेधा इत्यादावप्र-
त्ययास्पदेऽपि तस्यास्सत्वात् अत एव मित्रशीर्चिनेडित्यादावल्विध्यर्थं
प्रत्ययलक्षणसूत्रमिति वार्त्तिकमते हलादित्वस्यानेनातिदेशः सिद्धो-
ऽन्यथा शास इदं हलोः तृणह इमेत्यत्रत्यहल्पदस्य प्रत्ययमात्रबोधक-
त्वेऽपि हलादित्वस्य प्रत्ययत्वव्याप्यत्वाभावादतिदेशोन स्यात् नच
हलादौ क्ङित्प्रत्यये इत्याद्यर्थेन हलादिक्ङित्प्रत्ययत्वादि, प्रत्ययत्व-
व्याप्यन्तस्यातिदेशेनादोष इति वाच्यम् तस्यैकपदप्रतिपाद्यत्वाभावेना-
तिदेशालभ्यत्वात् एकपदप्रतिपाद्यधर्म्मस्यैवातिदेश इत्यस्यातिदेशस्व-
भावसिद्धत्वात् नच प्रत्ययावयवे प्रत्ययत्वारोपे राममित्यादावपि मकार
मात्रस्य सुप्प्रत्ययत्वारोपे सुपिचेति दीर्घापत्तिरिति वाच्यम् प्रत्ययत्वारो-
पेऽपि सुप्त्वस्यानारोपात् प्रत्ययादित्वप्रयुक्तं कार्य्यं प्रत्ययावयवमात्रस्य
स्यादिति तु न आदिग्रहणसामर्थ्येन कृत्स्नप्रत्ययादेरेव ग्रहणेनादोषात्
ननु येनविधिरिति सूत्र भाष्ये अचिश्नु धात्वितिसूत्रे तदादिविध्यभावे
अचिप्रत्यये परे इत्यर्थे श्रियौ भ्रुवावित्यत्रैव स्यान्न तु श्रियः भ्रुव इत्यादा-
वित्युक्तन्तद्विरुद्धोतास्प्रत्ययाकारस्यापि प्रत्ययत्वादिति चेन्न अत्र प्रत्य-
यग्रहणाभावेनाङ्गस्येति षष्ठ्यर्थान्वयानुरोधेन निमित्तपदाध्याहारेणाच्-
रूपे-ऽङ्गसंज्ञानिमित्ते इत्यर्थस्यैव सत्वेन प्रत्ययावयवे प्रत्ययत्वारोपे-
ऽप्यङ्गसंज्ञानिमित्तत्वाभावादङ्गसंज्ञासूत्रे प्रत्ययविधिग्रहणेन विधेय-
ताश्रयीभूतप्रत्ययस्यैवाङ्गसंज्ञानिमित्तत्वात् नचप्रत्ययावयवे प्रत्ययत्व-

व्यवहारे प्रत्ययस्थात्कात्पूर्वस्येति सूत्रे स्थग्रहणस्य वैयर्थ्यं प्रत्ययस्थस्यापि प्रत्ययत्वादिति वाच्यम् इष्टापत्तेः प्रत्ययावयवे प्रत्ययत्वव्यवहाराभावेऽपि ककाररूपवर्णमात्रस्य प्रत्ययस्याभावेन सामर्थ्यादेव प्रत्ययस्थककारलाभेन स्थग्रहणवैयर्थ्यस्यैव सत्वात् केति संघातग्रहणन्तु न तत्र तथा सति अर्थवद्ग्रहणपरिभाषयाऽर्थवत एव ग्रहणापत्तौ कारिकेत्यादावित्वानापत्तेः नन्विदं सूत्रम्मास्तु दधि मध्वित्यादौ स्थानिवत्सूत्रेण लोपरूपादेशस्य सुप्त्वातिदेशेन पदत्वसिद्धेरिति चेदत्र वार्त्तिककारा अतृणेट् मित्रशीरित्यादावल्विध्यर्थं प्रत्ययलक्षणसूत्रमित्याहुस्तथाहि तृहधातोर्लङि तिपीकारलोपे हल्ङ्यादिलोपे श्नमोऽकारस्य प्रत्ययलक्षणेन हलादिपितमादाय तृणह इमित्यनेनेमागमे अतृणेडिति मित्राणि शास्तीति विग्रहे शास्तेः क्विपस्सर्व्वापहारे प्रत्ययलक्षणेन हलादिकितमादाय शास इदङ्हलोरित्युपधाया इत्वे मित्रशीरिति भवति स्थानिवद्भावेन हलादित्वन्तु न अनल्विधाविति तन्निषेधात् हलादित्वं चात्र प्रत्ययस्यासाधारणं यथा तथोक्तम् गवे हितं गोहितमित्यादावच्त्वस्य प्रत्ययासाधारणत्वाभावेन न प्रत्ययलक्षणम् चित्रायां जाता चित्रेत्यादौ च प्रत्ययलक्षणेनाण्वृद्धावप्यणोऽकारवृद्ध्यभावेन टिड्ढेति न ङीप् नचात्राकारपदेनाण्प्रत्ययाकारस्यैव बोधेन प्रत्ययत्वव्याप्यविषयताप्रयोजकत्वेन तत्प्रतिपाद्यतावच्छेदकात्वस्यापि निरुक्तप्रत्ययासाधारणत्वेन तद्बुद्धिरपि प्रत्ययलक्षणसूत्रेण स्यादिति ङीप् दुर्व्वार इति वाच्यम् । अण्वृद्धेरेवाभावात् प्रधानाप्रधानन्यायेन यत्र प्रत्ययासाधारणधर्म्मावच्छिन्नस्य प्राधान्येनाश्रयणन्तत्रैव प्रत्ययलक्षणसूत्रप्रवृत्तेः प्राधान्यञ्चावयवावयविभावसम्बन्धावच्छिन्नप्रकारतानाश्रयत्वमिति विजयायां विस्तरेण प्रतिपादितम् अत्र—चाणस्तादृशप्रकारताश्रयत्वस्यैव सत्वात् प्रत्ययस्यासाधारणेति तु तल्लक्षणमित्येव सिद्धे प्रत्ययग्रहणाल्लभ्यते प्रत्ययस्यासाधारणेति प्रधानस्यैवेत्यंशाभ्यां वर्णाश्रये नास्ति प्रत्ययलक्षणमिति फलितम् फलितेऽपि निषेधे षणत्वव्या-

च्यधर्म्मावच्छिन्नस्य प्राधान्येनाश्रयणमेव वर्णाश्रयपदेन विवक्षितं प्रधा-
नाप्रधानन्याया—त्तेनातृणेड्मित्रशीरित्यादौ न निषेधः भाष्यकारस्तु
स्थानिवत्सूत्रेण सिद्धिं कृत्वेदं सूत्रं नियमार्थमित्युवाच मित्रशीरित्या-
दावल्विद्ध्यर्थन्तु न शास इदित्येकोयोगः शास उपधाया इत्वं क्ङि-
तिपरे इति तस्यार्थः अङीत्यपरोयोगः शास उपधाया इदङि परे
इत्यपरस्यार्थः पूर्वेणैवसिद्धे अजादौ क्ङिति चेदङ्येवेति नियमादाङ-
तिरिक्ताजादौ दोषाभावेन हल्ग्रहणाकरणेन क्त्वस्य स्थानिवद्भावेनैव
लाभाच्च एवमतृणेडित्यादावपि तृणह इम इति सूत्रे हल्ग्रहणं नानु-
वर्त्तते नाभ्यस्तस्याचीत्यतोऽचिनेत्यनुवर्त्याजादौ नेत्यर्थेनाजादौ दो-
षाभावेन पित्वस्य स्थानिवद्भावेन लाभाच्च प्रत्ययलोपसूत्रं विनैवेष्ट-
सिद्धेः ननु कीदृशोनियमः कृत्स्नप्रत्ययलोपे लुप्तप्रत्ययवृत्तिप्रत्यया
साधरणधर्म्मावच्छिन्ननिमित्तककार्य्यमेव नान्यदित्याकारकः व्रीहीनव-
हन्तीत्यादाववघात एव नान्यत् नखविदलनादिकमिति वत् तर्हि
राजाश्वेत्यादौ दीर्घादिकन्न स्यात् कृत्स्नप्रत्ययलोप एव लुप्तप्रत्ययवृ-
त्तिप्रत्ययासाधरणधर्म्मावच्छिन्ननिमित्तकं कार्य्यं नान्यत्रेत्याकारको वा
समासे एव प्रातिपदिकसंज्ञा नान्यत्रेति वदिति चेत्तर्हि राम इत्यादा-
वपि दधीत्यत्र लुप्तप्रत्ययवृत्तिप्रत्ययासाधारणधर्म्मः सुप्त्वं तदवच्छि-
न्ननिमित्तताकं पदत्वं न स्यात् नान्यत्रेत्यनेनैतद्विधेयस्यैवान्यत्र निषेध
इत्यर्थस्यातिप्रसङ्गभङ्गायावश्यकत्वेन स्थानिवद्भावरूपविधेयान्तरस्य
प्रत्ययलोपे निषेधाभावेन सुदृषत्प्रासादइत्यादौ स्थानिवद्भावेन दीर्घस्या-
पत्तेस्तस्य नियमफलत्वस्य भाष्योक्तस्य भङ्गापत्तेश्च किञ्च नियमस्थले
व्यर्थशास्त्रीयोद्देश्यतावच्छेदकव्यापकय्यँ द्व्यर्थताप्रयोजकशास्त्रीयोद्देश्य-
तावच्छेदकव्याप्यं तद्धर्मावच्छिन्नातिरिक्तत्वेन व्यर्थताप्रयोजकशास्त्री-
योद्देश्यतावच्छेदकावच्छिन्ने संकोचोभवति यथा समासग्रहणनियमेन स-
मासत्वव्यापकमर्थवत्त्वव्याप्यंयत् पूर्वभागपदघटितसमुदायत्वं तदव-
च्छिन्नातिरिक्तत्वेनार्थवत्त्वावच्छिन्ने संकोच स्तथा कृत्स्नप्रत्ययलोपत्वव्या-

पकमादेशत्वव्याप्यं किय्यँदवच्छिन्नातिरिक्तत्वेनादेशे संकोचस्स्यादिति
चेदत्रोच्यते यथा समासे एव न तद्भिन्ने—पूर्वभागपदघटितसमुदाये
नियमस्य सजातीयविषयत्वात् तथा कृत्स्नप्रत्ययलोपे एव न तद्भिन्ने
प्रत्ययलोपे—अवयवरूपप्रत्ययलोपे इतियावदिति तेन राम इत्यादौ
पदत्वस्य नानापत्तिः परन्तु नेदं युक्तं सुदृषदित्यादौ स्थानिवत्त्वस्या-
वारणात् इदन्तु तत्त्वं यथा व्रीहीनवहन्तीत्यादाववघात एवेत्यनेन
व्रीहिगतं नखविदलनमेव निषिध्यते न सेचनदर्शनादिकं नियमस्य
सजातीयविषयत्वात्तथा कृत्स्नप्रत्ययलोपे लुप्तप्रत्ययवृत्तिप्रत्ययासा-
धारणधर्म्मावच्छिन्ननिमित्तताकमेवकार्य्यं नान्यदित्यनेनापि लुप्तप्रत्ययस-
म्बन्ध्येव तद्भिन्नं कार्य्यं निषिध्यते न दीर्घादिकं नियमस्य सजातीय-
विपषत्वादेवेति सदृषदित्यादौ दीर्घो न स्थानीवद्भावेनेति न तत्र
फलत्वप्रदर्शनपरभाष्यविरोधोऽपि किञ्च स्वीयोद्देश्यतावच्छेदकं कृत्स्न-
प्रत्ययलोपत्वं तद्व्यापकं वैयर्थ्यप्रयोजकस्थानिवत्सूत्रीयोद्देश्यतावच्छे-
दकादेशत्वस्य व्याप्यं प्रत्ययलोपत्वं तदवच्छिन्नातिरिक्तत्वेनादेशत्वा-
वच्छिन्ने संकोचात्प्रत्ययलोपे स्थानिवद्भावस्य न प्राप्तिरिति सुदृषदि-
त्यत्र न स्थानिवद्भावः नापि प्रत्ययलक्षणं प्रत्ययासाधारणधर्म्माभा-
वात् । नच सुदृषदिति न नियमफलमत्वन्तसाहचर्य्येण दीर्घविधौ श्रूय-
माणासन्तस्यैव ग्रहणेन दीर्घाप्रवृत्तेरिति वाच्यम् भवन्तमाचष्टे भावय
तीत्यादौ णिजन्तात् क्विपि णिलोपटिलोपयोर्भावित्यादावत्वन्तस्य
स्थानिवद्भावेनैव सत्वेन साहचर्य्यस्यासम्भवात् नच तत्र णिलोपस्य
स्थानिवत्त्वेन दीर्घाप्रवृत्त्या श्रूयमाणात्वन्तस्थल एव दीर्घप्रवृत्त्या तत्सा-
हचर्य्याश्रयणं युक्तमेवेति वाच्यं दीर्घविधौ स्थानिवत्वनिषेधात् निषे-
धविधौ सापादिकस्यापि दीर्घस्य ग्रहणमिति शेखरकृता सिद्धान्तित-
त्वात् किञ्च साहचर्य्याश्रयणं वाक्यार्थबोधात्प्राक् तस्मिन् क्षणेऽत्र
दीर्घो भवति न भवतीति लक्षणैकचक्षुषामनिर्णयेन लक्ष्यनिर्णयापेक्षया-
साहचर्य्याश्रयणस्यायुक्तत्वाच्च अधान्तग्रहणं न कर्त्तव्यमत्वसोरिति

षष्ठ्यन्तं पठनीयं तदन्तविधिनाऽत्वसन्तस्येत्यर्थलाभस्तथा च धातुभि-
न्नोयोऽसन्तस्तदवयवोयोऽसुपदीर्यनिर्दिश्यमानस्तस्योपधाया दीर्घ इ-
र्थस्यैव लाघवानुगृहीतस्योचितत्वेन स्थानिवद्भावेन सुहृषदयेऽसवुद्धा-
वपि तदुपधाया अभावेन दीर्घाप्राप्तिः स्थानिवद्भावादिना हि यस्य
बुद्धिरुपजायते तन्निमित्तकस्यैव कार्य्यस्य प्रवृत्तिर्न तु तदुपधानिमित्त-
कस्य तावत्पर्य्यन्तमतिदेशस्य व्यापाराभावादिति न नियमफलमिति
चेदत्रोच्यते सुहृषदित्यत्रैवासन्तत्वं स्थानिवद्भावेनादायास्मायामेधि-
त्यादिना विनिप्रत्ययापत्तिः मेधामाचष्टे इत्यर्थे णिचि टिलोपे क्विपि
णिलोपे धान्तस्यापि मेधाशब्दस्य लाभेन तत्साहचर्य्येण श्रूयमाणस्यै-
वासोग्रहणमिति प्रकृते न दोष इत्यस्य वक्तुमशक्यत्वात् प्रथिमान
माचष्टे णिचि क्विपि टिलोपे णिलोपे प्रथिमिति तस्य समीपमुपप्रथि-
ममित्यत्राव्ययीभावे स्थानिवद्भावेनानन्तत्वमादायानश्चेति टच् वाग्-
मिनमाचष्टे णिचि क्विपि टिलोपे णिलोपे च वहुशब्देन वहुव्रीहौ स्था-
निवद्भावेनेन्नन्तत्वमादाय इनस्त्रियामित्यनेन कप् च न तसिप्रत्यया-
न्तसर्वतसित्यस्यानुकरणे॰सर्वतस् तस्मादाचष्टे णिचि टिलोपे क्विपि
णिलोपे सौ परेऽत्वसन्तस्य चेति दीर्घः स विद्यते अस्येत्यर्थे अस्मा-
यामेधेत्यादिना विनि प्रत्ययश्च न स्थानिवत्सूत्रोद्देश्यतावच्छेदकादे-
शत्वावच्छिन्ने प्रत्ययलोपातिरिक्तत्वेन सङ्कोचात् अत्र प्रत्ययावयवे प्रत्य-
यत्वव्यवहारेण प्रत्ययलोपस्यैव सत्वात् स्थानिवत्सूत्राप्राप्तेः कृत्स्नप्र-
त्ययलोपाभावात् अन्त्यादेः प्रत्ययासाधारणधर्म्मत्वाभावाच्च प्रत्य-
यलोपसूत्रस्य–चाप्राप्तेः ॥ यदि च कृत्स्नप्रत्ययवृत्तिप्रत्ययासाधारणध-
र्म्मनिमित्तककार्य्यमेव नतु लुप्तप्रत्ययनिमित्तकन्तद्भिन्नं कार्य्यमिति निय-
मस्वरूपन्तदा कृत्स्नप्रत्ययलोपातिरिक्तेषु पूर्वप्रयोगेषु स्थानिवद्भावप्र-
वृत्तौ बाधकाभावेन टजादीनां सिद्धिरेव फलं कृत्स्नप्रत्ययस्य निवेशे
नियमफलन्तु शिखिनमाचष्टे णिचि टिलोपे क्विपि णिलोपे शिख्
वहुशब्देन वहुव्रीहौ स्थानिवद्भावेनेन्नन्तत्वमादायेनस्त्रियामिति कप् न

नापि प्रत्ययलक्षणेन प्रत्ययासाधारणधर्म्माश्रयणाभावात्, वर्णिङनमाचष्टे णिचि टिलोपक्विप्णिलोपेषु कृतेषु बहुशब्देन बहुव्रीहावपि पूर्वोक्तरीत्या न कप् नन्ववयवलोपे माभूदित्यस्याश्रीयेति फलं शेखरोक्तं न युक्तं फलत्वस्य प्रत्ययासाधारणत्वाभावेन कार्त्स्न्येनिवेशाभावेऽपि प्रत्ययलक्षणस्याप्राप्तेरिति चेन्न प्रत्ययावयवे प्रत्ययत्वव्यवहारे तत्र फलपदम् प्रत्ययमात्रवृत्तिविषयताप्रयोजकमेव तत्पदप्रतिपाद्यतावच्छेदकस्य फलत्वमिति भवति तत् प्रत्ययासाधारणं प्रत्ययमात्रवृत्तिविषयताप्रयोजकपदप्रतिपाद्यतावच्छेदकत्वस्यैव प्रत्ययासाधारणत्वस्योक्तत्वात् इति दिक् ।

यूस्त्र्याख्यौ नदी ।

यूपदेन दीर्घयोरेवेकारोकारयोर्ग्रहणमन्यथा ङितिह्रस्वश्चेति सूत्रे ह्रस्वयोरेवानयोरनुवृत्तौ ह्रस्वग्रहणस्य वैयर्थ्यापत्तेर्दीर्घादिति निर्देशाद्वा इति रूपासिद्धिस्तु न छन्दोवत्सूत्राणि भवन्तीत्युक्ते-र्वा छन्दसीति पूर्वसवर्णदीर्घेण तत्सिद्धेः स्त्रियमेवाचक्षाते स्त्र्याख्यौ ख्याधातोर्म्मूलविभुजादित्वात् कप्रत्ययः स्त्रियामित्युक्त्यैव स्त्रीवाचकावित्यर्थलाभसम्भवेनाख्याग्रहणसामर्थ्यादेवकारार्थान्तर्भावेण वृत्तिबोधनद्वारा नित्यस्त्रीलिङ्गावित्यर्थलाभस्तेन ग्रामंनयतीति ग्रामणीरित्यत्र नदीत्वञ्च ग्रामनयनकर्तृत्वेन स्त्रीबोधकत्वेऽपि तेनैव रूपेण पुम्बोधकत्वस्यापि सत्वेन नित्यस्त्रीत्वाभावात् ननु किमिदं नित्यस्त्रीत्वमितिचेदत्र वृत्तिकारः आध्यै प्रध्यै ब्राह्मण्यै इति भाष्ये प्रयोगो दृश्यते तत्र प्रकृष्टा धीर्य्यस्या इति बहुव्रीहिस्तु न नद्यृतश्चेत्यनेन नद्यन्तोत्तरपदकत्वान्नित्यं कबापत्तेः किन्तु प्रकृष्टं ध्यायतीति प्रधीस्तत्र नदीत्वाय पदान्तरं विनापि स्त्रीबोधकत्वन्नित्यस्त्रीत्वं प्रकृष्टध्यानकर्तृत्वस्य स्त्रियाः सम्भवेन प्रधीरित्येतन्मात्रोच्चारणेऽपि स्त्रीबोधकत्वेन नदीत्वं ग्रामणीशब्दस्य तु ग्रामनयनकर्तृत्वस्य शक्तत्वाद्व्यराहितत्वाच्च पुन्धर्म्मेतया स्त्र्यादिशब्दसमभिव्याहारमन्तरा स्त्रीबोधकत्वाभावेन नदीत्वा-

भावः नच स्त्रीविषयावेव यौ यू नित्यमिति भाष्यविरोधस्तेन हि एवकारश्रवणात् लिङ्गान्तराबोधकस्यैव स्त्रीबोधकस्य नित्यस्त्रीत्वं लभ्यते इति वाच्यम् एवकारस्य नित्यमित्यनेनान्वयस्तथा च यौ यू नित्यमेव स्त्रीविषयौ नित्यमेवेत्यस्य सर्वदैवेत्यर्थः पदान्तरं विनापीति यावदित्येतस्मादपि भाष्यात् पदान्तरं विनापि स्त्रीबोधकत्वमित्यस्यैव लाभादित्याह तत्र यदुत्तरमेवकारस्तदर्थ एव तदर्थस्यान्वयनियमेन भाष्यान्तरैस्तादृशार्थालाभात् स्त्रीविषयावेवेत्यस्य स्त्रीत्वेतरलिङ्गाबोधकावित्यस्यैव शब्दमर्यादया लाभेन स्त्रीत्वबोधकत्वे सति स्त्रीत्वेतरलिङ्गाबोधकत्वं नित्यस्त्रीत्वं नच प्रध्यै ब्राह्मण्यै इति भाष्यविरोधः प्रकृष्टध्यानकर्तृत्वेन पुम्बोधकस्यापि प्रधीशब्दस्य सत्त्वेन नदीत्वानापत्त्याऽऽटोऽभावापत्तेरिति वाच्यं बहुव्रीहेरेव तत्र सत्त्वात् कबापत्तिस्तु न ऋदन्तसाहचर्य्येण वृत्तिप्राक्कालिकनदीत्वस्यैव ग्रहणेन कपोऽप्राप्तेर्धीशब्दस्य समासात्प्राक् नेयङुवङिति निषेधेन नदीत्वाभावात् धीशब्दार्थध्यानक्रियारूपधात्वर्थ एव प्रकर्षस्यान्वयेन प्रशब्दस्यगतित्वाद्वाण् नन्वानुपूर्व्यैक्येन शब्दैक्यात् ङ्यन्तकुमारीशब्दस्याचारक्विप्क्यङ्निष्पन्न–पुंबोधककुमारीशब्दसमानाकारकत्वेनैक्यात् ङ्यन्तकुमारीशब्दस्य स्त्रीबोकत्वेपि स्त्रीत्वेतरपुंस्त्वरूपलिङ्गबोधकत्वस्यापि सत्त्वेन नित्यस्त्रीत्वानापत्ति–रुच्चारणभेदेन शब्दभेदात् क्यङादिनिष्पन्नकुमारीशब्दोभिन्न एवेति तस्य पुंबोधकत्वेऽपि ङ्यन्तकुमारीशब्दस्य पुंबोधकत्वाभावान्न नदीत्वानुपपत्तिरिति तु न युक्तम् प्रधीः स्त्रीत्यादावपि प्रधीः पुमानित्यत्रत्य प्रधीशब्दभिन्नतया पुंबोधकत्वाभावेन नदीत्वापत्तेरिति चेदत्रोच्यते धर्म्मविशिष्टत्वं नित्यस्त्रीत्वं वैशिष्ट्यञ्च स्वावच्छिन्नविशेष्यतानिरूपितस्त्रीत्वनिष्ठप्रकारताकबोधजनकत्वेन तात्पर्य्यविषयत्व, स्वावच्छिन्नविशेष्यतानिरूपितस्त्रीत्वेतरलिङ्गनिष्ठप्रकारताकबोधाजनकत्वोभयसम्बन्धेन ङ्यन्तकुमारीशब्दे प्रथमधर्म्मविशिष्टत्वरूपधर्मवैशिष्ट्यसत्त्वान्नित्यस्त्रीत्वं तद्धर्मावच्छिन्नविशे-

ष्यतानिरूपितस्त्रीत्वनिष्ठप्रकारताकबोधजनकत्वस्य तद्धर्म्मावच्छिन्नविशेष्यतानिरूपितपुंस्त्वादिनिष्ठप्रकारताकबोधाजनकत्वस्य च सत्वात् यद्यपि तस्यैव शब्दस्य कुमारी पुरुष इत्यादौ पुंस्त्वबोधकत्वमप्यस्ति तथापि कुमारीकर्म्मकाचरणसदृशाचरणादिकर्त्तृत्वावच्छिन्ने पुंस्त्वस्यान्वयो न प्रथमवयोविशिष्टत्वावच्छिन्न इति न दोषः अथ सेनां नयतीति सेनानीरित्यादौ सेनात्वधर्म्मवैशिष्ट्यस्य सेनानीशब्दे सत्वान्नित्यस्त्रीत्वापत्तिस्सेनात्वावच्छिन्ने स्त्रीत्वबोधकत्वस्य तदवच्छिन्ने पुंस्त्वाद्यबोधकत्वस्य च सेनानीशब्दे सत्वात् नच सम्बन्धघटकविशेष्यतायां मुख्यत्वनिवेशेन सेनात्वावच्छिन्नविशेष्यतायां नयननिष्ठविशेष्यतानिरूपितकर्म्मत्वसम्बन्धावच्छिन्नप्रकारतासामानाधिकरण्यात्प्रकारत्वासामानाधिकरण्यरूपमुख्यत्वाभावेनादोष इति वाच्यं कुमारीत्यादावपि तत्कुमारीसम्बन्धितात्पर्य्यकसर्वनामशब्दजन्योपस्थितीयप्रकारतासामानाधिकरण्यसत्वान्नित्यस्त्रीत्वानापत्तः कुमारीबन्धुरिति समासे विशेष्यताया मुख्यत्वाभावान्नदीत्वानापत्त्या नदीबन्धुनीति स्वरानापत्तेश्च नच धर्म्मवैशिष्ट्यनियामकसम्बन्धः स्वावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपकोपस्थित्यजनकत्वरूपस्तृतीयोऽपि निवेश्यते प्रकृते सेनात्वावच्छिन्नप्रकारतानिरूपितनयननिष्ठविशेष्यताकोपस्थितिजनकत्वान्न दोष इति वाच्यम् क्यजन्तकुमारीशब्देऽपि नित्यस्त्रीत्वानापत्त्या नदीत्वानापत्ते-स्तत्र हि कुमारीकर्म्मकेच्छाकर्त्तृत्वावच्छिन्ने पुम्बोधकत्वेऽपि प्रथमवयोविशिष्टत्वरूपधर्म्ममादायैव नित्यस्त्रीत्वं वक्तव्यन्तद्धर्म्मावच्छिन्नप्रकारतानिरूपितेच्छानिष्ठविशेष्यताकोपस्थितिजनकत्वस्यैव सत्वादितिचेदत्रोच्यते वृत्तेः प्राक् कुमारीशब्दे उक्तसम्बन्धत्रयेण धर्म्मवैशिष्ट्यसत्वेन यथोद्देशपक्षमाश्रित्य जातं नदीत्वमादायैव क्यजादिवृत्तावपि नदीत्वप्रयुक्तमाडादिकार्य्योपपत्तिः नच कार्य्यकालपक्षे कार्य्यप्रवृत्तिसमये संज्ञाया अपेक्षणाद्वृत्तावेव कार्य्यस्य कर्त्तव्यतया तत्रैव नदीसंज्ञायाः कर्त्तव्यत्वेन तत्र नित्यस्त्रीत्वघटकप्र-

तीयसम्बन्धाभावेन नदीत्वानापत्तिस्तथाप्यवशिष्यत एव तदर्थं तृतीयसम्बन्धानिवेशश्चेत्सेनानीशब्दे दोष-स्तदर्थन्तृतीयसम्बन्धस्थाने स्वावच्छिन्ननिरूपितशक्तिपर्य्याप्त्यधिकरणत्वं निवेश्यते वृत्तौ कुमारीशब्दे कुमारीकर्म्मकेच्छाकर्तृत्वावच्छिन्ननिरूपितशक्तेरिव प्रथमवयोविशिष्टत्वावच्छिन्ननिरूपितशक्तिपर्य्याप्तेरपि सत्वाद्धर्म्मवैशिष्ट्योपपत्तिः सेनात्वावच्छिन्नशक्तिपर्य्याप्तिश्च न सेनानीशब्द इति न तस्य नित्यस्त्रीत्वं सेनाशब्दस्य तु नित्यस्त्रीत्वमिष्यत एवेति सर्वं समञ्जसम् स्वावच्छिन्नेत्यादेश्च स्वपर्य्याप्त्यवच्छेदकतानिरूपितावच्छेद्यतावच्छक्यतानिरूपितशक्ततापर्य्याप्त्यधिकरणत्वमर्थं इति न सेनानीशब्दे विशिष्टशक्तिमादाय दोषः प्रथमलिङ्गग्रहणञ्चेतिवार्त्तिकस्यावयवस्त्रीविषयत्वात् सिद्धमिति भाष्यस्य चैतादृशनित्यस्त्रीत्वे एव तात्पर्य्यम् धर्म्मविशिष्टत्वं नित्यस्त्रीत्वं वैशिष्ट्यञ्च स्वावच्छिन्नविशेष्यतानिरूपितस्त्रीत्वनिष्ठप्रकारताकबोधजनकत्वेनतात्पर्य्यविषयत्व स्वावच्छिन्नविशेष्यतानिरूपितस्त्रीत्वेतरलिङ्गनिष्ठप्रकारताकबोधाजनकत्व स्वपर्य्याप्त्यवच्छेदकतानिरूपितावच्छेद्यतावच्छक्यतानिरूपित शक्ततापर्य्याप्त्यधिकरणत्वैतत्त्रितयसम्बन्धेनाद्यस्य व्यावर्त्त्यं जिह्रेतीति ह्रीरिति लज्जात्वमादाय न तत्र दोषः द्वितीयस्य प्रकृष्टं ध्यायतीति प्रधीरिति तृतीयस्य सेनानीरिति निष्कर्षः ।

ह्रस्वोनपुंसके प्रातिपदिकस्य ।

ननु ह्रस्वोनपुंसके इत्येव सिद्धे प्रातिपदिकग्रहणं व्यर्थं नच नपुंसके इत्यस्य नपुंसकत्वविशिष्टबोधकस्येत्येवार्थ--स्तथा च वारिणी इति विभक्त्यन्तस्यापि नपुंसकत्वविशिष्टबोधकत्वाद्ध्रस्वत्वापत्तिः प्रातिपदिकग्रहणे तु प्रातिपदिकत्वाभावान्न दोष इति वाच्यम् । दीर्घशीविधानसामर्थ्येन ह्रस्व वारण सम्भवात् नच ह्रस्वविधाने शिसर्वनामस्थानमिति सर्वनामस्थानत्वापत्त्या ज्ञाने इत्यादौ नपुंसकस्य झलच इति नुमापत्त्या दीर्घ ग्रहणस्य वैयर्थ्याभावः इति वाच्यम् ।

दीर्घविधानेऽपि ह्रस्वे कृते तद्बोधकत्वाद्दवस्थात् अथ लाक्षणिकत्वात्तदा न दोष इति चेत्तर्हि नपुंसकत्वविशिष्टवाचकस्य ह्रस्व इत्यर्थाद्विभ-क्त्यन्तस्य वारिणी इत्यस्य वाचकत्वाभावाच्च दोषः न च नपुंसकत्व-विशिष्टवाचकस्यापि पुंस्त्वविशिष्टबोधनेच्छयोच्चरितस्योभयलिङ्गस्य प्रै-शब्दस्य ह्रस्वत्वापत्तिः स्वशक्यत्व, स्वजन्यबोधविषयत्वेन तात्पर्य्यविषयत्वोभयसम्बन्धेन स्वविशिष्ट-नपुंसकत्वविशिष्टे विद्य-मानस्य ह्रस्व इत्यर्थेनातिव्याप्त्यव्याप्तिपरिहारसम्भवादिति चेदत्र शेख-रकारेण प्रातिपदिकग्रहणं सत्वप्रधान प्रातिपदिकग्रहणार्थं तेन काण्डे इत्यस्य पूर्वान्तवद्भावेन प्रातिपदिकत्वस्य नपुंसकत्वविशिष्टबोधकत्वस्य च सत्वेऽपि न ह्रस्वत्वं सत्वप्रधानत्वाभावादित्युक्तम् । अत्रेदं विचा-र्य्यते किमिदं सत्वप्रधानत्वं ननु सत्वं द्रव्यं तत्प्रधानं यस्येति व्युत्पत्त्या सत्वनिष्ठविशेष्यताकबोधजनकत्वम् काण्डे इत्यत्र प्रत्ययार्थाधिकरण-त्वस्यैव विशेष्यतया काण्डरूपद्रव्यस्य तत्प्रति विशेषणत्वेनादोषः नच काण्डत्वनिष्ठप्रकारतानिरूपितविशेष्यताया अपि द्रव्ये सत्वेन दोष एवेति वाच्यम् मुख्यविशेष्यताया निवेशनादोषात् काण्डनिष्ठविशेष्य-ताया अधिकरणत्वनिष्ठविशेष्यतानिरूपितप्रकारतासामानाधिकरण्य-स्यैव सत्वेन प्रकारत्वासामानाधिकरण्यरूपमुख्यत्वाभावात् ननु विभ-क्तिद्योतकत्वेन द्योत्यार्थस्य प्रकृत्यर्थे विशेषणतयैव भानं अधिकरणत्व-शक्तिमान् क्रियाकारकभावश्च सप्तम्यर्थस्तत्राधिकरणत्वशक्तिमतश्च प्रकृत्यर्थेऽभेदेनान्वयः क्रियाकारकभावश्च प्रकृत्यर्थसंसर्गतया भासते-अधिकरणत्वशक्तिमदभिन्नकाण्डविशिष्टा क्रियेति बोध इति शेखरकृ-तस्सिद्धान्त-स्तथा च काण्डनिष्ठा मुख्यैव विशेष्यता नच तावतापि क्रियानिष्ठविशेष्यतानिरूपितप्रकारताया-स्तत्र सत्वेनामुख्यत्वमेवेति वाच्यम् इतरपदप्रयोज्यविशेष्यतामादाय दोषनिस्तारस्य श्रीपमस्ती-त्यादावप्यस्तिक्रियामादाय दोषापत्त्यावक्तुमशक्यत्वात् तादृशविशेष्य-ताव्यावृत्ति-स्तु द्रव्यविशिष्टस्य प्रातिपदिकस्य ह्रस्वः वैशिष्ट्यञ्च

स्वनिष्ठविशेष्यताप्रयोजकत्व, स्वनिष्ठप्रकारतानिरूपितविशेष्यत्वाप्रयोजकत्वोभयसम्बन्धेनेत्यर्थेनेत्यवगन्तव्यमेवञ्च काण्डे इत्यादौ दोष एवेति चेदत्रोच्यते यद्यपि संसर्गतया भासमाने विशेष्यता न भवत्यपि तु संसर्गतैव तथापि प्रतियोगिनं प्रति प्राधान्यमस्ति तम्प्रति प्रतियोगिनश्चाप्राधान्यं संसर्गनिष्ठप्रधानताप्रयोजिका च सप्तम्येव राज्ञः पुरुष इत्यादौ स्वत्वादेस्संसर्गस्य षष्ठीवाचिकेति भाष्येणान्वयाभिधानवादाश्रयणात् प्रकृते च सप्तम्याः काण्डे इत्यत्रैवान्तर्भावात् क्रियाकारकभावसंसर्गनिष्ठप्रधानताप्रयोजकत्वं काण्डे इत्यस्यैव स्वनिष्ठप्रधानताख्यविषयताप्रयोजकत्व, स्वनिष्ठाप्रधानतानिरूपितप्रधानताख्यविषयत्वाप्रयोजकत्वोभयसम्बन्धेन द्रव्यविशिष्टप्रातिपदिकस्य ह्रस्व इत्यर्थः प्रकृते च काण्डनिष्ठाप्रधानतानिरूपितक्रियाकारकभावसंसर्गनिष्ठप्रधानताप्रयोजकत्वेन काण्डे इत्यस्य ह्रस्वोन नन्वेवमपि काण्डे तिष्ठत इत्यादावाख्यातार्थे काण्डप्रतियोगिकाभेदस्याकाङ्क्षाभास्यतया तन्निष्ठप्रधानताप्रयोजकत्वस्य काण्डे इति प्रथमान्तस्याभावेन प्रथमार्थसंख्यायाश्चाभेदेन विशेषणस्यलेऽविवक्षितत्वेन विशेषणतयैव प्रकृत्यर्थे भानेन वा पूर्वान्तवद्भावेन प्रातिपदिकत्वेन च ह्रस्वोदुर्वार इति चेन्न अभिहिते प्रथमेति वार्त्तिकात् प्रथमाया अपि अन्याभिहितकर्तृत्वशक्तिमान् क्रियाकारकभावश्चार्थोबोध्यः पूर्ववत् कटं भीष्मं कुरु अत्र कटोऽपि कर्म्म भीष्मादयोऽपि कर्म्मेति भाष्यात् कारकाणां क्रियायामन्वय इति भाष्योक्तनियमाच्चाभेदेन विशेषणस्यापि क्रियाकारकभावसम्बन्धेन क्रियायामेव शाब्दोऽन्वयोऽभेदान्वयश्चाख्यातार्थेदिना पार्ष्ठिकोमानस-स्तथा सति काण्डे इत्यस्य क्रियाकारकभावसंसर्गनिष्ठप्रधानताप्रयोजकत्वेनाख्यातार्थेऽभेदान्वयेऽप्यभेदस्य विशेषणविवक्षयर्थस्यैवोक्तरीत्या संसर्गतया भानेन तन्निष्ठप्रधानताप्रयोजकत्वेन च ह्रस्वाप्राप्तेः अत्र केचिदयं प्रयासोविफलः पर्य्यन्यवल्लक्षणाप्रवृत्त्या पूर्वं ह्रस्वत्वेनैकादेशे विकारकृतलक्ष्यभेदस्योदवोढामिति भाष्या

द्वनाश्रयणेन तल्लक्ष्यत्वात्पुनर्ह्रस्वाप्रवृत्तेरित्याहु-स्तच्च सत्वप्रधानप्रातिदिकस्य ह्रस्व इत्यर्थेन काण्ड इत्यत्र ह्रस्ववारणपरभाष्यात् तदेकदेशमात्रविकारस्यैव लक्ष्याभेदप्रयोजकत्वादत्र तदेकदेशाकारप्रत्ययेकारोभयविकारेणोक्तन्यायाविषयत्वात् अत एव श्रीपमीर्यस्य कुलस्य तत् श्रीपिकुलमित्यादौ ह्रस्वः ।

नुमचिरेति नुट्यात्वे प्रराणामिति माधवः ।
वस्तु तस्तु सन्निपातपरिभाषया नुट्यात्वन्न
नामीति दीर्घस्तु आरम्भसामर्थ्यात्परि-
भाषां बाधते इत्युक्तं प्ररोणाम् ॥

माधवाशयस्त्वयं ह्रस्वनद्यापः इति सूत्रीये स्वप्रवृत्त्युत्तरं प्रवृत्तिमताशास्त्रेण यन्नाप्यन्तत्साधित्याकारकेऽभ्यनुज्ञावाक्ये शास्त्रपदार्थे स्वनिमित्तसन्निपातविघातकातिरिक्तत्वेन संकोचे सन्निपातपरिभाषया बोधिते राम आमिति स्थिते नुटि नामीतिदीर्घेन स्यात्तस्य नुड्निमित्तह्रस्वत्वविघातकत्वात्तथा च नामीति शास्त्रस्य वैयर्थ्यान्नामिति शास्त्रभिन्नं यत्स्वनिमित्तसन्निपातविघातकत्तदतिरिक्तत्वेनाभ्यनुज्ञावाक्यघटकशास्त्रपदार्थे संकोचे गौरवात्सन्निपातपरिभाषाप्रयुक्तः संकोचोनेत्येव नामीति सूत्रसामर्थ्यात् कल्प्यते तथाच रामाणामित्यादौ नुटि कृते नामीति दीर्घस्य सिद्धिस्तद्वत् प्रि आमिति स्थिते नुटि रायोहलीत्यात्वनिर्बाधमेवेति प्रराणामित्येव साधु नन्वेवं ह्रस्वोनपुंसके प्रातिपदिकस्येति सूत्रीयाभ्यनुज्ञावाक्यघटकशास्त्रपदार्थेऽपि सन्निपातपरिभाषया स्वनिनिमित्तसन्निपातविघातकातिरिक्तत्वेन संकोचे इकोऽचि •विभक्तावित्यस्य वैयर्थ्य-मनैमित्तिकत्वाद्ध्रस्वेकृते नुमःप्रवृत्तेर्नुमा च प्रातिपदिकाजन्तयोर्विशेष्यविशेषणभावरूपसन्निपातस्य ह्रस्वनिमित्तस्य विघातात् तत्सामर्थ्यादुक्तरीत्या लाघवानुरोधेन सन्निपातपरिभाषाकृतसंकोचाभाव एव कल्प्येत ततश्च ग्रामणिनी वारिणी इत्यादावीकोऽचिविभक्तावीति नुमिव ग्रामणि

कुलमित्यादौ तुक् स्यादिति चेन्न नपुंसकप्रातिपदिकयामणिरूपसमुदायसापेक्षह्रस्वस्य ह्रस्वमात्रापेक्षतुगपेक्षया बहिरङ्गत्वेनासिद्धत्वादिति वस्तुतस्तु नाजानन्तर्य्ये इति निषेधात् नलोपस्सुपीति सूत्रे कृति तुग्ग्रहणाच्च षत्वतुकोरसिद्ध इति सूत्रे तुग्ग्रहणाच्च ह्रस्वस्य पितीति तुकि कर्त्तव्ये बहिरङ्गपरिभाषाया अप्रवृत्तेरावश्यकत्वात् नयतीति नि कुलमित्यादौ समाननिमित्तकत्वेन तया तुकोवारणासम्भवाच्च सन्निपातपरिभाषयैव ग्रामणि कुलमित्यादौ तुकोवारणीयतया लाघवानुरोधमनादृत्यैवैकोऽचि विभक्ताविव्येतद्विवं स्वनिमित्तसन्निपातविघातकर्त्यं तदतिरिक्तेन यञ्ज्ञाप्यन्तत्साधित्वाकारकस्यैवाभ्यनुज्ञावाक्यस्यैकोऽचि विभक्ताविव्येतद्वैयर्थ्यसहितसन्निपातपरिभाषासहकारेण कल्पना कार्य्या तद्वन्नुट्शास्त्रीयाभ्यनुज्ञावाक्यमपि नामिसूत्रवैयर्थ्यसहितसन्निपातपरिभाषासहकारेण नामीत्येतद्विचस्वनिमित्तसन्निपातविघातकर्त्यं तदतिरिक्तेन स्वप्रवृत्त्युत्तरप्रवृत्तिमताशास्त्रेण यज्ज्ञाप्यन्तत्साधित्वाकारकमेवकल्प्यं ततश्च रामाणामित्यादौ नुटि नामीति दीर्घस्तुस्यात् प्रणीणामित्यत्र सन्निपातपरिभाषाविरोद्धायोहलीत्यात्वन्नस्यादितिप्रणीणामित्येव साध्विति बोध्यम्। ग्रामणि पुत्र इत्यादावुत्तरपदनिमित्तके ह्रस्वे बहिरङ्गपरिभाषया तुकोवारणपरं ङमोह्रस्वादचि ङमुण्नित्यमिति सूत्रस्थं भाष्यन्तु एकदेशिन एवेति, दिक्।

लिट् धुगित्यादौ धातुत्वात्पूर्वसूत्रेणाप्राप्तं प्रातिपदिकत्वं कृत्तद्धितेति सूत्रेण कृदन्तत्वात् विधीयते।

अत्रेदं विचार्य्यते क्रियावाचकस्यभ्वादेर्धातुसंज्ञा क्रियते क्रियावाचकत्वञ्च क्रियानिरूपितशक्तिपर्य्याप्त्यधिकरणत्वं क्विबन्तलिहित्यस्य यः शिष्यते स लुप्यमानार्थाभिधायीति न्यायेनास्वादनक्रियाकर्तृनिरूपितशक्तिमत्त्वेऽप्यास्वादनक्रियानिरूपितशक्तेरपि सत्वेन धातुत्वमुपपन्न, नन्वेवं यच्छब्दनिष्पन्नयाशब्देऽपि प्रापणक्रियानिरूपितशक्तताक्वच्छेदकयात्वस्य सत्वेन शक्तेरपि सत्वेन प्रत्युच्चारणं शब्दभेदेन

सर्व्वयाव्यक्तीनां धातुत्वाय भ्वादिगणपठितवृत्त्यानुपूर्व्वीमत्त्वस्यैव भ्वादित्वमित्यस्य वक्तव्यत्वेन भ्वादित्वस्यापि सत्वेन च धातुत्वापत्तिरिति चेन्न क्रियाविषयकबोधजनकत्वेनतात्पर्य्यविषयत्वस्यैव क्रियावाचकपदार्थत्वेन प्रकृते तदभावेनादोषात्, नचैवमपि लिट्धुगित्यादावपि क्रियाकर्त्तृतात्पर्य्यकत्वेन क्रियाबोधजनकत्वेन तात्पर्य्यविषयत्वाभावाद्धातुत्वानापत्तिरिति वाच्यं कर्त्तृविशेषणतया क्रियायामपि तात्पर्य्यसत्वेनादोषात्, नच ईधातोः क्विपि ईरिति तस्य आशब्देन समासे येत्यादौ विशेषणतया क्रियाबोधकत्वेन तात्पर्य्यसत्वाद्धातुत्वापत्तिरिति क्रियाविशेष्यकबोधजनकत्वेन तात्पर्य्यविषयस्यैव धातुत्वेन कर्तृविशेषणतया क्रियाबोधकक्विबन्तलिडादौ धातुत्वानापत्तिरिति वाच्यम् । क्रियानिरूपितशक्तिविशिष्टत्वस्यैव क्रियावाचकत्वेन विवक्षितत्वात्, वैशिष्ट्यञ्च स्वज्ञानाधीनबोधजनकत्वेन तात्पर्य्यविषयत्वस्वपर्य्याप्त्यधिकरणत्वोभयसम्बन्धेन लिडित्यादौ आस्वादनक्रियानिरूपितशक्तिं विशिष्टाम्बाशक्तिमादाय लक्षणसमन्वयोयत—स्वशक्तिपर्य्याप्तिर्लिहित्यादौ तज्ज्ञानाधीनाबोधजनकत्वेन तात्पर्य्यविषयत्वमपि तत्र विशिष्टशक्तिघटकस्यावयवशक्तिघटाधीनतया विशिष्टशक्तिज्ञानजन्यबोधस्याप्यवयवशक्तिज्ञानाधीनत्वात्, ततः येत्यादौ तु क्रियानिरूपितं शक्तिद्वयमेकैकारपर्य्याप्ता ततस्यानिकयकारमात्रपर्य्याप्ता वा अपरा च या पर्य्याप्ता आद्यायां या शब्दे पर्य्याप्तिर्नास्ति द्वितीयाया गमनकर्तृसम्बन्ध्याद्यशक्तिबोधजनकज्ञानविषयत्वं नास्तीति न धातुत्वं यच्छब्दनिष्पन्नयाशब्दे तु क्रियानिरूपितशक्तेः पर्य्याप्तिसत्वेऽपि प्रकृतबोधोपयोगित्वाभावेन न धातुत्वमिति दिक् ।

दादेर्धातोर्घः ।

शेखरकृता दादिपदस्यौपदेशिकदादित्वविशिष्टे लक्षणा कृता प्रमाणञ्च तत्र प्रकृतसूत्रस्थं भाष्यं दत्त-न्तथाहि धुगित्यादौ ढत्वमाशं

क्यापवादत्वाद्घत्वमित्युक्त्वा होढोऽदादे-रित्येको योगः धातोर्घ
इत्यपरो योगः कृतः पूर्वयोगाच्चरहितस्य दादेरित्यस्य धातोरित्यु-
त्तरयोगे ऽनुवृत्तिः कृता दाद्यवयवभिन्नस्य हस्य ढ इति पूर्वस्यार्थः
धुगित्यादौ दाद्यवयवत्वेन ढत्वाप्राप्त्या दादिधात्ववयवस्य हस्य
घ इत्यर्थकेनानुवृत्तदादिसहितधातोरित्यपरयोगेन घत्वसिद्धिरिति पक्षा-
न्तरेण समाधानं कृतम् भाष्यकृता च अत्र दादेरित्यनुवृत्तेश्च फलं
दाद्यवयवभिन्नहत्वस्य व्याप्यतया तद्धर्म्मावच्छिन्नोद्देश्यताकढत्वेन
धात्ववयवहत्वरूपव्यापकधर्म्मावच्छिन्नोद्देश्यताकघत्वस्य बाधादेवा-
दादौ घत्वाप्राप्ते-स्तदर्थं सदौपदेशिकदादित्वविशिष्टस्य लक्षणया
बोधकम् । अर्थाधिकारानुरोधाच्च पूर्वत्र होढोऽदादेरिति निषेधसम-
र्पकेऽपि दादिपदमौपदेशिकदादित्ववत्परमेव तेनौपदेशिकदादि-
त्वविशिष्टावयवभिन्नस्य हस्य ढ इति पूर्वस्यार्थ-स्तथाच दामलिडि-
त्यत्रेच्छाक्यजन्तनामधातावौपदेशिकदादित्वाभावेन ढत्वं घत्वाभा-
वश्च सिद्धोऽधोगित्यत्रौपदेशिकदाद्यवयवत्वाद्घत्वं ढत्वाभावश्च
सिद्धः दादेरिति वर्त्तत एतदुत्तरमागमसमभिव्याहारे आगमविशिष्ट-
स्यैव धातुत्वात्तस्य च दादित्वाभावादधोगित्यत्र घत्वं न प्राप्नोतीत्या-
शयेन दादेरित्युच्यते कथमधोगित्याशङ्क्य धात्ववयवो यो दादिरिति
वैयधिकरण्यान्वयेन समाहितं भाष्ये तच्च सम्भवति सामानाधिकरण्ये
वैयधिकरण्यस्यान्याय्यत्वाद्वैयधिकरण्यस्यायुक्तत्वशङ्कया गर्द्धवित्याद्य-
र्थमुत्तरसूत्रे धातोरित्यस्य तथान्वयस्यावश्यकत्वादत्राप्यर्थाधिकारानु-
रोधात्तथैवान्वय इत्युक्तन्तद्विरुद्धेत दादिपदस्यौपदेशिकदादित्वार्थ-
कत्वेऽधोगित्यत्रापि तत्सत्त्वेन शङ्काया वैयधिकरण्यान्वयरूपसमाधान-
स्य-चानवसरपराहतत्वादिति तु न वाच्यम् । दादिपदस्यौपदेशि-
कदादित्वार्थकत्वमजानत एकदेशिन उक्तत्वेनाविरोधात् उत्तरार्थमा-
वश्यकत्वं वैयधिकरण्यान्वयस्य वदता भाष्यकारेणाप्यत्रानावश्यकत्वं
ध्वनितं तस्माच्च दादिपदस्यौपदेशिकदादित्वार्थकत्वं ध्वनितमिति

शेखरयन्त्यार्थः, अत्रेदं विचार्य्यते। पूर्वं बाध्यबाधकभावमाश्रित्य समाधानं कृतमथवेत्यादिना बाध्यबाधकभावमन्तरेणैव सूत्रस्वरूपभेदेन तयोर्व्विषयविभागेन समाधानमुच्यते ततश्च बाध्यबाधकभावमन्तरा लिडित्यादौ दादिग्रहणेनैव घत्वं वारणीयत्वान्यथेति दादिग्रहणं सार्थकमेव नतु व्यर्थं किञ्च पूर्वयोगे निषेध्यसमर्प्यकदादिपदस्यौपदेशिकदादित्वविशिष्टार्थकत्वे दामलिडित्यादौ नामधातौ होढोऽदादेरित्यस्यैव घत्वं बाधित्वा प्रवृत्या धातोरित्यस्याप्रवृत्त्यौपदेशिकदादित्वे लक्षणायामप्युत्तरसूत्रे दादिग्रहणं व्यर्थमेवैवं दादेरित्यस्यौपदेशिकदादित्वविशिष्टबोधकत्वे धातोरित्यस्य वैयर्थ्यं प्रातिपदिकस्योपदेशाभावात्, प्रत्ययादीनां दादित्वाभावात्तदवयवस्य हस्याभावाच्च किञ्च दादिपदस्य तदर्थकत्वे घोदादेरित्युच्यते कथमधोगिति भाष्यासङ्गतिरौपदेशिकदादित्वस्याडागमे कृतेऽप्यधोगित्यस्य सत्वात् नच तस्यैकदेशयुक्तत्वं प्रमाणाभावात् नचोत्तरार्थमावश्यकत्वकथनसूचितादिहानावश्यकत्वादेवैकदेशयुक्तत्वमिति वाच्यम्। नह्येकत्रावश्यकस्यान्यत्रानावश्यकत्वनियमो बहुषु स्थलेष्वेकस्यावश्यकत्वदर्शनात् तस्मात् धातोरवयवो यो दादिस्तस्य हस्य घ इत्येवार्थस्तेनाधोगित्यत्र घत्वसिद्धिर्नामधातौ दामलिगित्येव धात्ववयवदादित्वस्य सत्वेन घत्वप्रवृत्तेर्हस्य दाद्यवयवत्वेन ढत्वाप्रवृत्तेश्च दामलिहिति श्रूयमाणं कथमुपपद्यत इति चेद्दामोपपदाल्लिहेः क्विपि बोध्यं नच दाद्यवयवत्वाच्च ढत्वप्राप्तिरिति वाच्यम्, अर्थाधिकारानुरोधाद्विधेयेऽपि धात्ववयवस्यैव दादेर्ग्रहणेना दोषादुपदेश इत्यर्थस्तु न युक्तः सूत्रभाष्यवार्त्तिककारैरनुक्तत्वादितिदिक्॥

भाविनः सुटोनिवृत्त्यर्थं ससुट्कनिर्देशः।

युष्माकमित्यादौ युष्मद् आमिति स्थिते शेषेलोप इत्यनेनान्त्यलोपे कृतेऽदन्तात्परत्वेन सुटः प्राप्तिरन्त्यलोपश्चाकमादेशाद्युत्तरत्वात्तु ततः प्राक् तदामीमाम आदेशाभावेन युष्मदस्मदोरनादेश

इत्यस्य प्रवृत्त्याऽऽत्वनिमित्तेतरत्वरूपशेषत्वस्याऽमोऽभावादाकमादेशश्च सुट्प्रवृत्त्युत्तरन्तदैव सामत्वसम्पत्तेस्सुट्प्रवृत्तिश्चान्त्यलोपोत्तरमिति चक्रकापत्त्या सामोऽभावात्साम आकमित्यसङ्गतमित्यत आह भाविन इति स्थान्यादेशभावस्थले सर्वत्र स्थानिनः प्रसङ्ग एव आदेशो विधीयते नतु सतो निवृत्तिरसतो वोत्पत्तिश्शब्दानित्यत्वप्रसङ्गात् प्रकृते स्थानिनस्सामोऽस्त्यंशद्वयं सकार आम् च सकारसहितस्यैवामस्सामत्वात् तत्रामः प्रसङ्गस्साम्प्रतिकः सकारप्रसङ्गश्च भावी सर्वत्र वर्त्तमान एव स्थानिनः प्रसंगे आदेशोभवत्यत्र तु भाविन्यपि सकारप्रसङ्गे आकम् वर्त्तमानस्य सकारप्रसङ्गस्यासम्भवेन सूत्रस्यैव वैयर्थ्यापत्तेः आम एवाकमादेशे स्थानिवद्भावेन प्राप्तस्य सुटोऽभावायैव स्थान्यंशे सकारविशेषणमादेशस्थले स्थानिकोटिप्रविष्टाश्रवणस्य स्वभावसिद्धत्वादित्येव भाविनः सुट् इत्यादेराशयः मनोरमाकारेण तु आमंशे तन्त्रं स्वीकृत्याम आकमित्येकोऽर्थ-स्तेनाम्मात्रस्याकमितरस्य स्थानिवद्भावेनाम्त्वात्सुटि सकारसहिताम्रूपसाम्रूपस्य साकमित्यस्य साम आकमिति द्वितीयार्थेनाकमित्याशय उक्तोऽस्य मते अतित्वाकमित्यादौ प्रथमप्रवृत्त्यैव रूपसिद्धिः, शेखरकृता चोक्तरीत्या सकृत्प्रवृत्त्यैवोपपत्तौ तन्त्रेण प्रवृत्त्यन्तरकल्पनं व्यर्थमित्युपेक्षितोऽयं पक्षः, परन्त्वस्मिन् पक्षे साम आकमिति सूत्रत–शब्दमर्य्यादयाऽऽकमादेशासिद्धिरतित्वाकमित्यादौ भाविनोऽपि सुट्प्रसङ्गस्याभावेनाकमेऽसिद्धिश्चेत्यतः पक्षान्तरं तन्निवृत्तिश्चेत्यादिना शेखरकारेणोच्यते युष्मद् आमिति स्थिते आमि सामत्वमारोप्याकम्विधीयते कृतेचाकमि युष्माकमतित्वाकमित्यादौ स्थानिवद्भावेनाम्त्वमादाय न सुड्नुटौ साम्त्वेन स्थानित्वादाम्त्वस्यातिदेशासम्भवादिदमेवोक्तं स्थानिवद्भावेन साम्त्वमेव नत्वाम्त्वमितिग्रन्थेन परन्त्विदमनुपपन्नमस्योपपत्तिर्हि तदैव स्याद्यदा स्थानितावच्छेदकस्यैवातिदेश इति नियमः स्यात्तदेवनान्यथा रामायेत्यादौ यादेशे प्रत्ययत्वसुप्त्वादेरतिदेशानापत्ते-स्तस्य स्थानिता-

नवच्छेदकत्वात् ततश्च युष्माकमित्यादौ स्थानिवद्भावेनाम्त्वात्सुट्
कृतित्वाकमित्यादौ नुट् च दुर्वारौ तस्मादिदं तत्वम् सामित्यस्य
सुड्योग्यश्चामित्यर्थो मध्यमपदलोपिसमासत्वात् सुड्योग्यता च सुट्-
कारणतावच्छेदकधर्म्मवत्त्वमेव तच्चाकारान्तात्परत्वरूपमाकारान्ता-
त्परस्यामस्सुड्विधानात् तच्चेदानीचास्तीति तदारोप्यते ततश्च
युष्मद् आमिति दशायामेव सुड्योग्यश्चाम् स एवाम् तस्यारो-
पिताकारात्परत्वमादाय प्राप्तौ सुड्नुटौ तक्रन्यायेन बाधित्वाऽऽकमि
कृते न सुड्नुटौ भवतस्तक्रन्यायेन बाधकविषये बाध्याप्रवृत्तेरिदं सर्वं
ससुट्कनिर्देशादेव कल्प्यत इति नाति प्रसङ्ग इति ॥

स्त्रियामधिकारोऽयम् ।

ननु शास्त्रे स्त्रियाम् तस्माच्छसेनः पुंसि नपुंसकाच्चेत्यादौ
स्त्रीपुंनपुंसकशब्दानां शक्यतावच्छेदकानि स्त्रीत्वपुंस्त्वनपुंसकत्वा-
नि किंस्वरूपाणि यदि स्तनकेशवत्त्वं स्त्रीत्वं लोमवत्त्वं पुंस्त्वमुभया-
भाववत्वेसति अंशतस्तदुभयवत्त्वं नपुंसकत्वं तर्हि खट्वाद्यचेतनबोध-
कखट्वादिशब्दानामुक्तस्त्रीत्वादिबोधकत्वासम्भवेन खट्वा घटान् दधी-
त्यादौ टाप् नत्वं सुलुक् न स्यात्, यदि च सत्वादिगुणानामुपचयः
पुंस्त्वमपचयः स्त्रीत्वं तेषां-स्थितिरूपं नपुंसकत्वं सांख्यमते पुरुषाति-
रिक्तपदार्थमात्रस्य सत्वरजस्तमस्स्वरूपप्रकृतिपरिणामरूपतया त्रिगु-
णात्मकत्वेन सत्वादीनाञ्च स्वस्वेतरगुणापेक्षया वृद्धिह्राससाम्यरूपो-
पचयादीनाञ्चसम्भवेन चेतनाचेतनसकलपदार्थेषु सर्वलिङ्गसद्भावेन-
दोषाभावोऽत एव पदार्थमात्रे अयं पदार्थः, इयं व्यक्तिरिदं वस्त्वि-
त्यादि वाक्यैः सर्वलिङ्गप्रतीतिरित्युच्यते, तथापि पुरुषे ब्राह्मणी,
ब्राह्मण्यां ब्राह्मणः ब्राह्मणमित्यादिप्रयोगापत्ति-स्सर्वत्र सर्वलिङ्गस-
त्वेन तत्तल्लिङ्गविवक्षया तत्तल्लिङ्गबोधकत्वनिमित्तकतत्तत्कार्य्यप्रवृ-
त्तिसम्भवात् अत्रोच्यते अचेतननिष्ठप्रवृत्तिनिमित्तकशब्दानां सत्वादिगु-
णोपचयादिरूपणास्त्रीयलिङ्गबोधकत्वमेव चेतननिष्ठप्रवृत्तिनिमित्तक-

शब्दानां तु शास्त्रीयलिङ्गसहितलौकिकस्तनादिमत्त्वादिरूपलिङ्गबोधकत्वं दारशब्दस्य च शास्त्रीयलिङ्गबोधकत्वमेव कस्य शब्दस्य किंलिङ्गबोधकत्वमित्यत्र तु कोश एव प्रमाणं कस्य चिदेकलिङ्गबोधकत्वं कस्य चिल्लिङ्गद्वयबोधकत्वं कस्य चिल्लिङ्गत्रयबोधकत्वमित्यपि कोशादेवावगन्तव्यम्, तथाच ब्राह्मणे ब्राह्मणीशब्दवाच्यस्य शास्त्रीयस्त्रीत्वस्य सत्त्वेऽपि लौकिकस्त्रीत्वस्याभावेन, ब्राह्मण्यां ब्राह्मणशब्दवाच्यस्य शास्त्रीयपुंस्त्वस्य सत्त्वेऽपि लौकिकपुंस्त्वस्याभावेन शास्त्रीयलिङ्गसहितलौकिकलिङ्गस्याभावेन न ब्राह्मणे ब्राह्मणीशब्दस्य न वा ब्राह्मण्यां ब्राह्मणशब्दस्य प्रयोगः, ब्राह्मणशब्दस्य नपुंसकत्वलिङ्गबोधकत्वाभावेन लौकिकनपुंसकत्वलिङ्गवत्यपि ब्राह्मणे ब्राह्मणमिति न प्रयोगः, शास्त्रघटकस्त्रीपुंनपुंसकशब्दानाञ्च शास्त्रीयस्त्रीत्वादिलिङ्गबोधकतयाऽचेतनबोधकशब्देषु शास्त्रीयलिङ्गबोधकेषु शास्त्रीयतत्तल्लिङ्गबोधकत्वनिमित्तकटाबादिकार्य्यसिद्धिः, चेतननिष्ठप्रवृत्तिनिमित्तकेषु शब्देषु च शास्त्रीयतत्तल्लिङ्गसहितलौकिकतत्तल्लिङ्गबोधकेषु शास्त्रीयतत्तल्लिङ्गबोधकत्वमादाय शास्त्रीयं कार्य्यमत एव शास्त्रीयलिङ्गविशिष्टलौकिकलिङ्गबोधकत्वस्वीकारः लौकिकमात्रलिङ्गबोधकत्वे शास्त्रीयलिङ्गबोधकत्वनिमित्तककार्य्याणामभावापत्तेः, नच लौकिकलिङ्गबोधकत्वनिमित्तकत्वमेव शास्त्रीयकार्य्याणामस्तु चेतनबोधकशब्दे शास्त्रीयलिङ्गबोधकत्वस्य नोपयोग इति वाच्यम्, अचेतनबोधकशब्दे शास्त्रीयलिङ्गबोधकत्वनिमित्तककार्य्यानापत्तेः दारानित्यादौ नत्वानापत्तेश्च नच शास्त्रघटकस्त्र्यादिशब्दानामुभयलिङ्गबोधकत्वमस्तु चेतनबोधकानां लौकिकलिङ्गबोधकत्वमचेतनबोधकानां शास्त्रीयलिङ्गबोधकत्वमादाय शास्त्रीयकार्य्योत्पत्तेः चेतनबोधकानां शास्त्रीयलिङ्गबोधकत्वमप्रामाण्यमनुभवादिति वाच्यं, लिङ्गद्वयेऽनुगतरूपाभावेन तत्तद्धर्म्मावच्छिन्ने विभिन्न शक्तेरावश्यकतया सकृदुच्चारितस्त्र्यादिशब्दानामसकृदुच्चरितत्वाप-

विरोधादुभयबोधकत्वासम्भवेनावृत्तिकल्पने गौरवात् नचानन्तचेतनबोधकशब्दानां शास्त्रीयलिङ्गे शक्तिकल्पनापेक्षया शास्त्रघटककतिपयस्त्र्यादिशब्दानामावृत्तिकल्पने एव लाघवमिति वाच्यम्, नकारङीवादिकार्य्याणां चेतनाचेतनबोधकशब्दोत्तराणामनुगतनत्वादिधर्म्मावच्छिन्नतया ऽनुगतनत्वाद्यवच्छिन्नकार्य्यतानिरूपितकारणतावच्छेदकेनानुगतधर्म्मेणैव भवितव्यम्, तथाच शास्त्रीयलिङ्गबोधकतात्वावच्छिन्नैव कारणतेति युक्तन्ततश्च शास्त्रीयलिङ्गबोधकत्वमेव स्त्र्यादिशब्दानामितिनिर्णये तत्तत्कार्य्यानुरोधेन चेतनबोधकशब्दानामपि शास्त्रीयलिङ्गबोधकत्वमावश्यकमित्यावृत्तौ लाघवमकिञ्चित्करमन्यथा ऽनन्तब्रह्माण्डास्वीकारलाघवेन शून्यवादस्यापि प्रामाणिकत्वापत्तेः, अतएव योगजदृष्ट्या सर्वज्ञेनापि भाष्यकारादिना स्त्रियामित्यादावावृत्तिर्नकृता एवमप्यत्याग्रहश्चेदस्तु स्त्र्यादिशब्दघटितशास्त्राणामावृत्तिश्चेतनबोधकशब्दानां लौकिकमात्रलिङ्गबोधकत्वमस्तु ननु एकस्मिन् पदार्थे युगपत् सत्वादिगुणानामुपचयापचययोरसम्भवेन बह्वीर्द्देवता इन्द्रोदेवतेत्यादावेककाले एक पदार्थगतस्त्रीत्वपुंस्त्वबोधकदेवताबह्वीशब्दप्रयोगानुपपत्तिरिति चेन्न सत्वादिगुणानामुपचय इत्यादीनां त्रयाणां गुणानामुपचयादिरितिनार्थोऽपि तु तेषांमध्ये कस्य चिदेवेत्यर्थस्तथाचैकस्योपचयेऽपरस्यापचय इत्यस्य युगपत्सम्भवेनैकदालिङ्गद्वयबोधे बाधकाभावात्, अतएवैकस्मिन्नेव समये एकस्मिन्नेव पदार्थे पदार्थइति व्यक्तिरिति च प्रयुज्यते चेतनाचेतनोभयबोधकशब्दानां शास्त्रीयलिङ्गबोधकत्वमेवात एव पदार्थव्यक्तिवस्तु शब्दानामुभयत्र प्रयोगः तत्र प्रत्ययान्तदेवतादिशब्दानामपि शास्त्रीयलिङ्गबोधकत्वमेवातएवेन्द्रोदेवतेत्यादयः प्रयोगाः, नच सत्वादीनां गुणत्वात्तत्र महत्परिमाणरूपोपचयापचययोर्ह्रासवृद्धिरूपयोर्वा तयोरसम्भवो गुणे गुणानङ्गीकारादिति वाच्यं, सत्वरजस्तमसां गुणपदवाच्यत्वेपि वैशेषिकमतसिद्धगुणत्वाभावेनादोषात्, नचात्मनस्सत्वादिगुणानात्मकतया

तत्र शास्त्रीयलिङ्गासम्भवेन तद्बोधकशब्दानां लिङ्गनिमित्तककार्य्याभाव प्रसङ्ग इति वाच्यम्, शुद्धस्याद्वयरूपस्यात्मनः शब्दवाच्यत्वाभावात्, 'यतोवाचोनिवर्त्तन्ते ऽप्राप्य मनसा सहेति' श्रुतेरहंकारादिविशिष्टस्य तस्य शब्दवाच्यत्वं नानुपपन्नमहंकारस्य त्रैगुण्यात् शास्त्रीयलिङ्गस्य तत्राबाधात् नच तथाऽऽप्यात्मनि शुद्धे ऽभावात्तस्य केवलान्वयित्वमसङ्गतमिति वाच्यम्, अहंकारादिगतस्य तस्य तत्राध्यस्तत्वमात्रेण तदुक्तेस्सत्वात् ।

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रेप्रथमा ।

प्रातिपदिकार्थश्च लिङ्गञ्च परिमाणञ्च वचनञ्च प्रातिपदिकार्थलिङ्गपरिमाणवचनानि, तान्येव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रं, तस्मिन्; द्वन्द्वघटकसर्वपदार्थानां प्राधान्यात् द्वन्द्वसमभिव्याहृतपदार्थस्य सर्वेषु द्वन्द्वघटकपदार्थेष्वन्वये बाधकाभावेन मात्र शब्दार्थस्य सर्वत्रान्वयः अन्ययोगव्यवच्छेदश्च मात्रशब्दार्थ—स्तद्घटकभेदे च प्रतियोगितया पूर्वोच्चरितपदार्थस्य प्रातिपदिकार्थादेरन्वयः योगस्सम्बन्धः स च मात्रशब्दपूर्वशब्दार्थायेनसम्बन्धेनान्वयित्वेनविवक्षितस्स एव प्रकृते तथाभूतप्रातिपदिकार्थादेर्बोधकत्वसम्बन्धेन प्रातिपदिकेऽन्वयात्स एव सम्बन्धः व्यच्छेदोऽभावस्तस्य च यस्मिन् समभिव्याहृतपदार्थस्यान्वयस्तस्मिन्नेवान्वयस्स्वरूपसम्बन्धेन प्रकृते च प्रातिपदिकेऽन्वय—स्तथाच प्रातिपदिकार्थबोधकय्यँत् प्रातिपदिकार्थप्रतियोगिकभेदविशिष्टप्रतियोगिकबोधकत्वसम्बन्धभावविशिष्ट प्रातिपदिकन्तस्मात्, लिङ्गबोधकय्यँल्लिङ्गेतराबोधकं, वचनबोधकय्यँद्वचनेतराबोधकं प्रातिपदिकन्तस्मात्प्रथमेत्यर्थः, परिमाणेत्यस्य तु परिमाणमात्रबोधिका प्रातिपदिकात् प्रथमेत्यर्थः, आद्योदाहरणमुच्चैराद्यव्ययं नियतलिङ्ग घटादयश्च ते हि प्रातिपदिकार्थमात्रबोधकाः लिङ्गग्रहणस्यानियतलिङ्गास्तटादिशब्दा उदाहरणम्, ननु पञ्चकं प्रातिपदिकार्थ इति वैयाकरणसिद्धान्ताल्लिङ्गस्यापि प्रातिपदिकार्थत्वेन तटादिशब्देऽपि प्राति-

पदिकार्थे इत्येव प्रथमासिद्धेर्लिङ्गग्रहणं व्यर्थमिति चेन्न नियतो-
पस्थितिकस्यैवार्थस्य प्रातिपादिकार्थपदेन ग्रहणात् नियतलिङ्गस्यले
कदाचित्पुंस्त्वस्य कदाचित्स्त्रीत्वादेर्भानेन नियमेन कस्यापि लिङ्गस्य
भानाभावेनाप्रातिपदिकार्थत्वात् प्रातिपदिकार्थेतरलिङ्गबोधकत्वेन
प्रातिपदिकार्थे इत्यनेनासिद्धेः ननु लिङ्ग इत्यनेनापि तटादिशब्दे प्रथमा
न स्यात् लिङ्गेतरतटादिबोधकत्वेन लिङ्गमात्रबोधकत्वाभावादिति
चेन्न केवललिङ्गबोधकस्त्रीपुन्नपुंसकशब्देभ्यः नियतलिङ्गबोधकेभ्यश्च
प्रातिपदिकार्थमात्रबोधकत्वेन प्रातिपदिकार्थे इत्येवासिद्धे लिङ्गग्रहण-
सामर्थ्यात् लिङ्गवाक्ये मात्रपदेन प्रातिपदिकार्थेतरस्यैव व्यावृत्तिस्वी-
कारेण लिङ्गेतरांशः प्रातिपदिकार्थेतर-स्तद्बोधकात् लिङ्गबोधकाद्वि-
त्यर्थेनादोषात् प्रातिपदिकार्थापेक्षयालिङ्गमात्रंयत्राधिकं भासते तत्र
लिङ्गमात्रे प्रथमेति निष्कर्ष-स्तत्फलितमेव लिङ्गमात्राद्याधिक्य इत्युक्तं
मूले अथ नियतोपस्थितिक इत्यस्य कोऽर्थ उच्यते निपूर्वकयमधातो-
र्व्यापकत्वमर्थः क्तप्रत्ययार्थ आश्रय-स्तथाच व्यापकत्वाश्रयो व्यापको-
पस्थितिर्य्यस्य स नियतोपस्थितिकः व्यापकत्वस्य व्याप्यनिरूपितत्वेन
यत्किञ्चिन्निरूपितव्यापकत्वस्याव्यभिचरितत्वाच्च किन्निरूपितव्या-
पकत्वमिति जिज्ञासायां शेखरे उक्तं यस्मिन्नुच्चारिते प्रातिपदिके
यस्यार्थस्य नियमेनोपस्थिति-स्स नियतोपस्थितिक इति तथाच
यदुच्चारितप्रातिपदिकनिष्ठव्याप्यतानिरूपितव्यापकतावदुपस्थितिवि-
षयीयोऽर्थ-स्स तत्प्रातिपदिकार्थ-स्तन्मात्रबोधकात्तत्प्रातिपदिकात्प्रथ-
मेति पर्य्यवसितोऽर्थ-स्तथासति यत्तच्छब्दार्थयोरननुगतत्वेन यत्कि-
ञ्चिदेकशब्दविषयकत्वापत्तौ शास्त्रस्य सर्वलक्ष्यविषयकत्वानुपपत्तिर्य्य-
त्तच्छब्दार्थयोरप्रवेशे सर्व्वस्यैवार्थस्य यत्किञ्चित्प्रातिपदिकार्थत्वस्य स-
त्त्वेनातिप्रसंगात् प्रातिपदिकविशिष्टात्प्रातिपदिकात्प्रथमेति वक्तव्यम्,
वैशिष्ट्यञ्च स्वव्यापकोपस्थितिविषयीभूतार्थबोधकत्व स्वव्यापकोप-
स्थितिविषयीभूतार्थेतराबोधकत्व स्वतादात्म्यैतत्त्रितयसम्बन्धेन घटेत्या

विनियतलिङ्गे लिङ्गाव्ययादौ च घटत्वादीनां पुंस्त्वादिलिङ्गानामव्ययार्थस्य चोपस्थितीनां घटादिप्रातिपदिकं प्रति व्यापकत्वात्तत्प्रातिपदिकात् प्रथमा घटादिशब्दे उच्चारिते अव्ययेचोच्चारिते सर्वदैव हि घटघटत्वपुंस्त्वादीनामव्ययार्थस्य चोपस्थितेस्सत्वेन तस्याव्यापकत्वात् नच प्रातिपदिकव्यापकत्वमुपस्थितेर्दुर्घटम् प्रातिपदिकस्याकाशमधिकरणमुपस्थितेश्चात्मेति सामानाधिकरण्यस्यैवाभावादिति वाच्यं समवायेनाकाशाधिकरणकत्वेऽपि स्वविषयकश्रावणप्रत्यक्षसमवायित्वसम्बन्धेनात्मन्येव प्रातिपदिकस्यापि सत्वेन व्यापकत्वोपपत्तेः ननु शक्तिग्रहाभाववति श्रावणप्रत्यक्षसमवायित्वसम्बन्धेन प्रातिपदिकाधिकरणेऽप्यात्मन्युपस्थितेरभावेनाव्यापकत्वमेवेति चेन्न स्वनिष्ठशक्तिग्रहाहितोद्बुद्धसंस्कारसमवायित्व स्वश्रावणप्रत्यक्षसमवायित्वोभयसम्बन्धेन प्रातिपदिकाधिकरणत्वस्य स्वाधिकरणनिष्ठाभावप्रतियोगितानवच्छेदकधर्म्मवत्त्वरूपव्यापकत्वकुक्षौ प्रवेशेन निरुक्तात्मन्युक्तसम्बन्धद्वयेन प्रातिपदिकस्याप्यभावेन व्यभिचाराप्रसङ्गात् नन्वेवमपि नियतलिङ्ग इवानियतलिङ्गतटादिशब्देऽप्युक्तोभयसम्बन्धेन सति लिङ्गत्रयोपस्थितेरपि नियमेन सद्भावात्तत्रापि लिङ्गस्य प्रातिपदिकार्थत्वमेवोपस्थितिकारणस्योद्बुद्धसंस्कारस्य शब्दरूपसम्बन्धिज्ञानस्य च तत्र सत्वादितिचेन्नोपस्थितिपदस्य तत्र शाब्दबोधपरत्वात्पुंस्त्वादिबोधस्य च विसर्गाम्ङीप्समभिव्याहारनियततया ङीप्समभिव्याहृततटशब्दश्रवणे पुंस्त्वनपुंसकत्वबोधयोरम्समभिव्याहृततटशब्दश्रवणे नपुंसकत्वेतरलिङ्गबोधयोर्विसर्गसमभिव्याहृततटशब्दश्रवणे पुंस्त्वेतरलिङ्गबोधयोरभावेनानियतलिङ्गस्थले लिङ्गबोधस्याव्यापकत्वेनादोषात् नियतलिङ्गघटादिशब्दश्रवणे तु घटत्वादिबोधवल्लिङ्गबोधस्यापि सर्वत्र सत्वेन व्यापकत्वाद्यतः यद्यपि योग्यताकाङ्क्षातात्पर्य्यज्ञानभिन्नविषयकप्रत्यक्षसामग्रीविरहाद्यन्यतमस्यापि कारणस्याभावे उक्तोभयसम्बन्धेन विद्यमानेऽपि घटादौ प्रातिपदिके घटादिबोधस्याभावेनाव्या-

पकतया घटादेरपि प्रातिपदिकार्थत्वानापत्ति-स्तथापि स्वजन्यशाब्द-
बोधसामग्रीसमवायित्वं सम्बन्धेन प्रातिपदिकाधिकरणत्वस्य निवेशेना-
दोषात्तेन सम्बन्धेन प्रातिपदिकसत्त्वे पुंस्त्वविशिष्टघटबोधस्यावश्यं-
भावेन व्यापकत्वात्तेः अनियतलिङ्गस्थले च तत्तल्लिङ्गबोधजनिका
तत्तत्समभिव्याहारघटिता भिन्ना एवसामग्र्य-स्ततश्च तटशब्दश्रवणे
स्वजन्यो यदि पुंस्त्वावगाही बोधस्तर्हि तज्जनिका सामग्री विसर्ग
समभिव्याहारघटितैव, सा यत्रात्मनि वर्त्तते तत्र पुंस्त्वविषयकबोध-
सत्त्वेऽपि लिङ्गान्तरविषयकबोधाभाव एवं स्वजन्यस्त्रीत्वावगाही यदि
बोधस्तर्हि तज्जनिका ङीप्समभिव्याहारघटितैव एवमन्यत्रान्या
तद्वत्यात्मनि पुंस्त्वबोधाभाव इति न कस्यापि लिङ्गबोधस्य व्यापक-
त्वमित्यनियतलिङ्गस्थले लिङ्गस्याप्रातिपदिकार्थत्वोपपत्तिः नन्वेवमपि
तटशब्दो निरुक्तसम्बन्धेन यत्र वर्त्तते तत्र सर्वत्र तटविषयकबोधोऽ-
स्त्येव न तु तदभाव स्तथाच तद्बोधस्य तटशब्दव्यापकत्वमस्ति तद्वि-
षयत्वं तटत्वादेरिव तटगतलिङ्गस्याप्यस्तीति लिङ्गस्य प्रातिपदिका-
र्थत्व-न्तत्रापि दुर्वारम् किञ्च तादृशाधिकरणे बोधे नास्तिप्रमेयो
नास्तीति प्रतीतिविषयाभावस्यासत्त्वात्स्वाधिकरणवृत्त्यभावप्रतियोगि-
तानवच्छेदकं बोधत्वं प्रमेयत्वादि च तद्धर्मवत्त्वेनापि लिङ्गबोधस्य
व्यापकत्वाल्लिङ्गस्य प्रातिपदिकार्थत्वमेवेति चेदत्रोच्यते । स्वाधिकर-
णवृत्त्यभावीयप्रतियोगितानिरूपितनिरूपकत्वसम्बन्धावच्छिन्नावच्छेद-
कत्वाभाववती या विषयता तदाश्रयीभूतार्थबोधकत्वमेव सम्बन्ध-स्त-
थाच तटाधिकरणे निरूपकत्वसम्बन्धेन पुंस्त्वादिविषयताविशिष्टबो-
धाभावस्य सत्त्वेन पुंस्त्वादिनिष्ठविषयताया-स्तादृशावच्छेदकत्वस्यैव
सत्त्वेनानवच्छेदकविषयताघटितसम्बन्धाभावेन दोषाभावात् लिङ्ग-
बोधे बोधत्वप्रमेयत्वादिना व्यापकत्वस्याकिञ्चित्करत्वात् नियत-
लिङ्गस्थले च घटत्वादिविषयताया लिङ्गविषयतायाश्च घटाद्यधि-
करणवृत्त्यभावप्रतियोगितावच्छेदकताविरहेणादोषः स्वाधिकरणवृत्ति-

ताधाभावे स्वरूपसम्बन्धावच्छिन्नाधाराख्या तेनाकाशादिनिष्ठबोधाभावस्य कालिकेन घटपदाधिकरणे आत्मनि सत्त्वेऽपि नक्षतिः नित्येषु कालिकत्वायोगाच्च अभावश्च समवायसम्बन्धावच्छिन्नप्रतियोगिताको बोध्य-स्तेन सर्व्वोंगादिव्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकबोधाभावमादायापि न दोषः नच स्त्रीत्वनिष्ठविषयतानिरूपितत्वावच्छिन्ना या तटनिष्ठविषयतानिष्ठा निरूपकत्वसम्बन्धावच्छिन्नावच्छेदकता तन्निरूपितावच्छेद्यतावती या बोधनिष्ठा प्रतियोगिता तन्निरूपकस्त्रीत्वनिष्ठविषयतानिरूपिततटनिष्ठविषयताविशिष्टो बोधो नास्तीति प्रतीतिविषयीभूताऽभावः स्वजन्यबोधजनकविमर्गसमभिव्याहारज्ञानघटितसामग्रीसमवायित्वसम्बन्धेन तटाधिकरणे आत्मनि वर्त्तते तमादाय तटादिविषयताऽपि तादृशावच्छेदकतावत्त्येवेति न तटादेरपि प्रातिपदिकार्थत्वमिति वाच्यम् उभयावृत्तिधर्म्मावच्छिन्नावच्छेदकत्वाभावस्यैव निवेशनीयतया ऽन्यादृशावच्छेदकतायास्सत्त्वेऽप्यदोषात् न च हर्य्यादिनानार्थकशब्दे कस्यापि वासुदेवत्वादिप्रवृत्तिनिमित्तस्य तदाश्रयस्य वा प्रातिपदिकार्थत्वं न स्यात् तत्रार्थभेदेन बोधसामग्र्या अपि भिन्नतया वासुदेवत्वावच्छिन्नबोधजनकसामग्रीसमवायित्वसम्बन्धेन हर्य्याद्यधिकरणे आत्मनीन्द्रत्वावच्छिन्नबोधाभावस्येन्द्रत्वावच्छिन्नबोधजनकसामग्रीसमवायित्वसम्बन्धेन च हर्य्यधिकरणे वासुदेवत्वावच्छिन्नबोधाभावस्य च सत्त्वेन वासुदेवत्वेन्द्रत्वादिविषयतायामभावप्रतियोगितावच्छेदकताया एव सत्त्वादिति वाच्यं प्रातिपदिकनिष्ठशक्तिविशिष्टात्प्रातिपदिकादित्यर्थेनादोषात् वैशिष्ट्यं स्वाश्रयत्व, निरुक्तसम्बन्धेन स्वाधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकविषयताश्रयार्थबोधकत्व, तादृशार्थेतरार्थाबोधकत्वेतत्त्रितयसम्बन्धेन यदर्थतात्पर्य्यकहर्य्यादिपदे प्रथमा कर्त्तव्या तदर्थशक्तिवैशिष्ट्यमादाय-सूत्रार्थसमन्वयः तथासत्यन्यत्रान्यबोधाभावोऽकिञ्चित्करः इतरार्थाबोधकत्वमित्यस्येतरार्थबोधजनकत्वेन तात्पर्य्यविषयत्वाभाववत्त्वमर्थ स्ति-

नान्यार्थबोधकत्वस्य नानार्थके सत्त्वेऽपि न दोषः अथ तच्छब्दे शक्तैक्याच्छक्तिवैशिष्ट्यमादायाप्यनिस्तारः तत्र तत्तदर्थबोधकसामग्र्या भिन्नत्वेन स्वजन्यशाब्दबोधजनकसामग्रीसमवायित्वसम्बन्धेन तच्छक्त्यधिकरणेऽप्यात्मनि यदर्थबोधकसामग्रीनास्ति तदर्थबोधाभावप्रतियोगितावच्छेदकत्वस्यैव तत्तदर्थविषयतायाः सत्वात् नच शक्तिज्ञानवैशिष्ट्यनिवेशाददोषः तथाहि प्रादिपदिकनिष्ठशक्तिज्ञानविशिष्टात्प्रातिपदिकादित्यर्थः वैशिष्ट्यञ्च स्वविषयशक्त्याश्रयत्वसम्बन्धसहितपूर्वोक्तसम्बन्धद्वयेन, घटस्तत्पदशक्यः पटस्तत्पदशक्य इत्याद्याकारकं भिन्नमेव घटपटादिबोधजनकम् तत्पदशक्तिज्ञानं यदर्थतात्पर्य्यकतच्छब्दात्प्रथमा कर्तव्या तदर्थबोधजनकशक्तिज्ञानवैशिष्ट्यमादाय सूत्रार्थसमन्वयः कर्त्तव्यः घटस्तत्पदशक्यः पटस्तत्पदशक्य इति समूहालम्बनज्ञानमादाय दोषोनोद्धार्यः कस्यापि ज्ञानस्य वैशिष्ट्यसत्वे इष्टसिद्धेरितिवाच्यम् । घटस्तत्पदशक्य इतिशक्तिज्ञानाद्यत्र पटादिनिष्ठशक्तिज्ञानादिघटितसामग्रीसम्मेलनाद्घटपटविषयकसमूहालम्बनशाब्दबोधस्तज्जनकसामग्री पटनिष्ठशक्तिज्ञानादिघटितसामग्री तत्समवायित्वसम्बन्धेन घटस्तत्पदशक्य इति ज्ञानं केवलपटविषयकबोधजनकसामग्रीसमवायिनि घटस्तत्पदशक्य इति यद्यासमवायिन्यात्मनि वर्त्तते तत्र घटनिष्ठविषयताविशिष्टबोधाभावस्य सत्वेन तत्प्रतियोगितावच्छेदकत्वस्यैव घटविषयतायां सत्वेन दोषात् अत्रोच्यते प्रातिपदिकविशिष्टविषयतावत्त्वं प्रातिपदिकार्थत्वं वै० स्वप्रयोज्यत्व, स्वविशिष्टविषयताविशिष्टत्वोभयसम्बन्धेन, तत्र वै० स्वप्रयोज्यधर्म्मतानिरूपितत्व, स्वाप्रयोज्यसंसर्गतानिरूपितत्व, स्वजन्यबोधनिष्ठभेदप्रतियोगितानिरूपितनिरूपकत्वसम्बन्धावच्छिन्नावच्छेदकतावत्त्वैतत्त्रितयसम्बन्धेन, द्वितीयवै० । स्वभिन्नत्व, स्वनिरूपितावच्छेदकताख्यविषयताभिन्नत्वोभयसम्बन्धेन समन्वयो यथा नियतलिङ्गस्थले अनियतलिङ्गस्थले वा प्रवृत्तिनिमित्तावच्छिन्ने स्वपदशक्त्योपस्थितलिङ्गादीनामाकाङ्क्षाभास्यसंसर्गेणान्वयात् लि-

ङ्गनिष्ठा विषयता स्वप्रयोज्यधर्म्मितानिरूपिता स्वाप्रयोज्यसंसर्गता-
निरूपिता च भवति नतु प्रवृत्तिनिमित्तनिष्ठा नापि तदाश्रयनिष्ठा
परन्तु नियतलिङ्गस्थल एकस्यैव लिङ्गस्य स्वजन्यबोधे सर्वदैव भाना-
त्स्वजन्यबोधनिष्ठभेदप्रतियोगितावच्छेदकत्वं लिङ्गनिष्ठविषयतायामपि
नास्ति नानार्थस्थले तच्छब्दस्थले च तृतीयसम्बन्धस्य लिङ्गेतरनिष्ठविषय
तायां सत्वेऽप्याद्यसम्बन्धद्वयं नास्ति राजविशिष्टपुरुषादितात्पर्य्यकत-
च्छब्दस्थले राजादिनिष्ठविषयतायामाद्यन्तसम्बन्धयोस्सत्वेऽपि मध्यमो
नास्तीति सर्व्वासु तासु स्वविशिष्टविषयतात्वं नास्तीत्यतोऽन्तिमस-
म्बन्धद्वयेन स्वविशिष्टविषयताविशिष्टत्वं स्वप्रयोज्यत्वञ्चास्तीत्यत-
स्तद्विषयतावतां सर्वेषां प्रातिपदिकार्थत्वोपपत्तिरनियतलिङ्गस्थले च
स्वजन्यलिङ्गान्तरविषयकबोधमादाय तृतीयसम्बन्धस्यापि सत्वाल्लिङ्ग
निष्ठा विषयता स्वविशिष्टैवास्ति नतु स्वविशिष्टविषयताविशिष्टेति
न तत्र लिङ्गं प्रातिपदिकार्थः तत्र लिङ्गवृत्तिपुंस्त्वत्वादिविषयताया-
मन्तिमसम्बन्धसत्वेऽप्याद्यसम्बन्धद्वयाभावेन स्वविशिष्टविषयतातो-
भिन्नत्वात्तदाश्रयस्य लिङ्गत्वव्याप्यधर्म्मस्य प्रातिपदिकार्थत्ववारणाया-
न्तिमवैशिष्ट्ये द्वितीयः सम्बन्धः यदि च तस्य प्रातिपदिकार्थत्वेऽपि न
क्षतिरिति विभाव्यते तदा न देयः नियतलिङ्गस्थले स्वविशिष्टविषय-
ताया अप्रसिद्ध्या तद्घटितसम्बन्धाप्रसिद्धिरिति चेत्तत्सम्बन्धावच्छिन्न
प्रतियोगिताकस्वाभाववत्त्वमेव सम्बन्धो बोध्यः नन्वेवमदुहितरामि-
त्यादौ हल इति दीर्घवारणाय तद्भावितपक्षाश्रयणेन संप्रसारणपद-
प्रयोज्यविधेयताश्रयत्वविशिष्टे यण्स्थानिकेक्त्वावच्छिन्ने संप्रसारणप-
दशक्यत्वं वक्तव्यमिग्यणः इत्येतद्बोधात् प्राक्काले च वसोस्सम्प्रसा-
रणमित्यादिवाक्यार्थाभावेन विशिष्टस्याप्रसिद्धतया यण्स्थानिकेक्त्वा-
वच्छिन्ने संप्रसारणपदे विधेयताश्रये खण्डशक्तिस्वीकारेण सम्प्रसारण-
पदप्रयोज्यविधेयताश्रयत्वांशमोषेण वसोस्सम्प्रसारणमित्यादौ यण्-
स्थानिके कमात्रस्य बोधात् तत्रत्यसम्प्रसारणपदजन्यबोधनिष्ठभेदप्रति-

योगितावच्छेदकत्वस्यैव सम्प्रसारणपदनिष्ठविषयतायां सत्वेनोक्तस-म्बन्धद्वयस्य च सत्वेन स्वविशिष्टत्वमेव नतुस्वविशिष्टविषयताविशिष्ट-त्वमिति तदाश्रयादेः प्रातिपदिकार्थत्वानापत्तिरिति चेन्न संप्रसारण-विधौ तदंशस्याभावेन तस्याप्रातिपदिकार्थत्वेऽपि प्रातिपदिकार्थमात्र-बोधकत्वेन प्रथमोपपत्तेः संप्रसारणोद्देश्यकविधाप्रातिपदिकार्थस्य तदंशस्य भानेऽपि तत्र प्रथमेतरविभक्तेरेवसत्वनापत्त्यभावाच्च नचोवा-चेति पदे संप्रसारणमस्तीति वाक्यघटकसंप्रसारणपदेन यण्स्थानिक-त्वविशिष्टसंप्रसारणपदप्रयोज्यविधेयताश्रयस्य भानात् प्रातिपदिकार्थ-मात्रबोधकत्वाभावेन प्रथमा न स्यादिति वाच्यम् । तत्र यण्स्थानि-केकृत्वावच्छिन्नमात्रस्यैव भानेन प्रातिपदिकार्थमात्रबोधकत्वेन प्रथमो-पपत्तेः सम्प्रसारणपदांशस्याभानेऽपि क्षतिविरहाच्च नन्वेवमप्युदुहित-रामित्यादौ संप्रसारणं नास्तीत्यादौ तद्वाक्यस्य प्रामाण्योपपत्तये संप्रसा-रणपदाद्यंशभानस्यावश्यकत्वेन प्रातिपदिकार्थमात्रबोधकत्वाभावेन प्रथमानुपपत्तिर्वज्रलेपायत इति चेदत्रोच्यते । यण्स्थानिकेत्वावच्छिन्न-मात्रबोधे प्रथमोपपत्त्यनन्तरमभावप्रतीतेर्बाधप्रतिसंधानानन्तरं संप्रसा-रणपदाद्यंशभानेऽपि प्रथमाया अनिवृत्तेरापत्यभावः । सिंहोमाण-वक इत्यादौ सिंहमात्रबोधेन प्रथमोत्पत्तौ माणवकेऽन्वयबाधप्रति-सन्धानानन्तरं लक्षणयासदृशरूपार्थस्यानियतोपस्थितिकार्थस्यभानेऽपि प्रथमाया अनिवृत्तिवत्, तत्र लक्षणया बोधोऽत्रशक्त्यैव संप्रसारणाद्यं-शस्यापि भानमित्यन्यदेतत् नन्वेवमपि प्रमेय इत्यादौ प्रथमानुपपत्तिः सर्वेषां प्रमेयपदप्रातिपदिकार्थत्वेन तदितरस्याप्रसिद्धेरिति चेदत्रो-च्यते प्रातिपदिकविशिष्टात् प्रातिपदिकादित्यर्थ-स्वत्र वैशिष्ट्यं स्ववि-शिष्टविषयताप्रयोजकत्व स्वविशिष्टविषयताभिन्नविषयत्वाप्रयोज-कत्वोभयसम्बन्धेन विषयतायां वैशिष्ट्यन्तु पूर्वोक्तमेव प्रमेयपदवि-शिष्टा च विषयता प्रमेयपदप्रयोज्यैव सा च प्रमेत्वावच्छिन्ना प्रमेय-त्वत्वावच्छिन्ना च भविष्यति नतु घटत्वाद्यवच्छिन्ना घटत्वादि

निष्ठा वा प्रमेयत्वावच्छिन्ना किन्तु तत्र स्वविशिष्टविषयताभिन्नत्व मेव तदप्रयोजकत्वञ्च प्रमेयशब्द इति सर्वं सुप्रसिद्धमिति ननु मात्रग्रहणमास्तु प्रातिपदिकाच्चेत्प्रथमा तर्हि प्रातिपदिकार्थ एवेति नियमेनैव प्रातिपदिकार्थेतरकर्म्मत्वादिबोधे प्रथमाया अप्रवृत्तेरिति चेन्न कर्मणि द्वितीयेत्यस्य यथा कर्मण्येव नतु कर्म्मत्वाभाव इति नियमोऽत एवगान्दोग्धीत्यादावपादानत्वबोधेऽपि द्वितीया तथा प्रातिपदिकार्थ एव नतु प्रातिपदिकार्थाभाव इति नियमस्यैव सत्वेना-नर्थकनिपातस्य कृत्तद्धितसमासाश्चेति चकारबलेन प्रातिपदिकत्वेऽपि प्रातिपदिकार्थाभावेन प्रथमानापत्तिः मात्रग्रहणे तु प्रातिपदिकार्थमात्र एवेत्यर्थे प्रातिपदिकार्थेतरकर्म्मत्वाद्यबोधकादेवेत्यस्य लाभेन सर्व्वो-गर्वाद्वुपयोगन्यायेन कर्म्मत्वबोधकत्वयोग्यादित्यस्यापि लाभस्तथा-चावध्यवधिमतोस्साजात्यनियमेन कर्म्मत्वबोधकत्वयोग्यात्प्रातिपदि-काच्चेत् कर्म्मत्वाद्यबोधकात् कर्म्मत्वबोधकत्वयोग्यादेवेत्यर्थस्यैव पर्यवसितत्वेनानर्थकनिपातस्य नियमानाक्रान्ततया स्वादिसूत्रेण प्रथमासिद्धिरिति स्पष्टं शब्देन्दुशेखरे । नवीनैस्तु प्रवृत्तिनिमित्तं तदा-श्रयश्च प्रातिपदिकार्थ-स्तदुदाहरणमव्ययपुन्नपुंसकस्त्रीशब्दा एव घटादय स्तटादयश्च नियतानियतलिङ्गा लिङ्गाधिक्य इत्यस्योदाहर-णन्तत्र लिङ्गस्याप्रातिपदिकार्थत्वात् द्रोणः कुडवमित्यादयश्च परिमा-णग्रहणस्योदाहरणम् तत्र द्रोणत्वादिकं प्रवृत्तिनिमित्तम् लिङ्गवत्तद-वच्छिन्नेऽभेदेन परिमाणत्वेन परिमाणमपि भासते तच्च न प्राति पदिकार्थ इति परिमाणाधिक्ये प्रथमा परिमाणबोधिका प्रथमेति प्राचीनोक्तन्तु न युक्तं तिङ्समानाधिकरणे प्रथमेति वार्त्तिकविरोधात् द्रोणोव्रीहिमानयेत्यस्यापत्तेश्च द्रोणोव्रीहिरिति तु सिंहो माणवक इतिवत् परिमिते लक्षणया बोध्यम् ननु किन्नाम प्रवृत्तिनिमित्तम् न वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितीयप्रकारताश्रयत्वं घट इत्यादौ पुंस्त्वत्वादेरपि प्रवृत्तिनिमित्तत्वापत्ते-स्स्वमते लिङ्गस्यापि

वाच्यत्वात् अपि तु स्ववाच्यत्व—स्ववाच्यवृत्तिविशेष्यतानिरूपितो-
पस्थितीयप्रकारताश्रयत्व, स्वप्रयोज्य—धर्म्मितानिरूपितप्रकारतानव-
च्छेदकत्वैतत्त्रितयसंबन्धेन स्वविशिष्टत्वं स्वप्रवृत्तिनिमित्तत्वम् खण्ड-
शक्त्या स्वातन्त्र्येण लिङ्गसंख्याकारकाणां प्रातिपदिकादुपस्थितानां-
घटत्वाद्यवच्छिन्नेऽन्वयात्तेषु स्वप्रयोज्यघटत्वाद्यवच्छिन्नधर्म्मितानि-
रूपिता या प्रकारता तदवच्छेदकत्वमेव पुंस्त्वत्वादाविति तेषां व्यु-
दासः लिङ्गादीनां घटादीनाञ्चोपस्थितीयप्रकारताविरहाच्च प्रवृत्ति-
निमित्तत्वं घटो द्रव्यपदवाच्य इति घटत्वाद्युपलक्षितशक्तिज्ञाना-
धीनद्रव्यपदजन्योपस्थितीयप्रकारताश्रये घटत्वादौ द्रव्यपदप्रवृत्तिनि-
मित्तत्ववारणाय स्ववाच्यत्वेति । नन्वेवं स्वस्वामिभावसम्बन्धेन राज-
विशिष्टपुरुषबोधकस्य तत्पदस्य प्रवृत्तिनिमित्तत्वं राजत्वे न स्यात् पुरु-
षत्वावच्छिन्नधर्म्मितानिरूपितराजनिष्ठप्रकारतावच्छेदकत्वस्यैव त-
स्मिन् सत्वादिति राजत्वतदाश्रययोः प्रातिपदिकार्थत्वाभावेन तदा-
धिक्यात् प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये वा प्रथमा न स्यादिति
चेन्न धर्म्मिताघटितसम्बन्धस्थाने स्वविशिष्टप्रकारतानवच्छेदकत्वस्य
निवेशात् वैशिष्ट्यञ्च स्वप्रयोज्यधर्म्मितानिरूपितत्व स्वनिष्ठवृत्ति-
ज्ञानाधीनोपस्थितीयसंसर्गत्वाप्रयोज्यसंसर्गतानिरूपितत्वोभयसम्बन्धेन
प्रकृते राजपुरुषयोर्य्यस्सम्बन्ध स्वस्वामिभावात्मकस्तत्र तत्पदनिष्ठश-
क्तिज्ञानाधीनोपस्थितीयसंसर्गतायास्सत्वेन तत्प्रयोज्यैव संसर्गतेति
तन्निरूपितप्रकारत्वावच्छेदकत्वेऽपि राजत्वे दोषाभावात् लिङ्गघट-
योर्य्यस्सम्बन्ध—स्स घटपदशक्योनास्तीति तन्निष्ठसंसर्गता घटपदनिष्ठ-
वृत्तिज्ञानाधीनोपस्थितीयसंसर्गत्वाप्रयोज्यैवाकाङ्क्षाप्रयोज्या तन्निरूपि-
तलिङ्गनिष्ठप्रकारतावच्छेदकत्वात् पुंस्त्वत्वादौ न घटपदप्रवृत्तिनि-
मित्ततेति बोध्यम् नन्वत्रशब्दे अन्ययोगव्यवच्छेदाप्रसिद्ध्याऽन्ययोग-
व्यवच्छेदत्वावच्छिन्ने शक्त्यसम्भवादन्ययोगे व्यवच्छेदे च खण्डशः

शक्त्याऽन्ययोगप्रतियोगिकव्यवच्छेदत्वावच्छिन्नधर्म्मितानिरूपकसम्ब-
न्धस्याकाङ्क्षाभास्यतया तन्निष्ठा संसर्गता एवनिष्ठवृत्तिज्ञानाधी-
नोपस्थितीयसंसर्गत्वाप्रयोज्या तन्निरूपितप्रकारतावच्छेदकत्वमेवान्य-
योगत्वरीति तस्य प्रातिपदिकार्थत्वानापत्त्या तदाधिक्या-देव
शब्दात् प्रथमा न स्यादिति चेदत्रोच्यते एवशब्दादुपस्थितस्यान्य-
योगमात्रस्य व्यवच्छेदे अन्वये पुनरन्ययोगव्यवच्छेदाप्रसिद्धिरेवातः
पार्थ एव धनुर्द्धर इत्यादावेवशब्दार्थे ऽन्यत्वे प्रतियोगित्वसम्बन्धेन
पार्थादिपदार्थस्यान्वयं कृत्वा पार्थप्रतियोगिकान्यत्वविशिष्टप्रतियो-
गिकयोगत्वावच्छिन्नस्य प्रतियोगित्वनिरूपकत्वसम्बन्धेन व्यवच्छेदे-
ऽन्वयः कर्त्तव्य-स्तथाच पार्थान्यप्रतियोगिकतादात्म्यसम्बन्धाभावो-
धनुर्द्धरे प्रसिद्ध-स्तथाच व्यवच्छेदत्वावच्छिन्नधर्मितानिरूपिता प्रतियो-
गित्वनिरूपकत्वसम्बन्धावच्छिन्ना प्रकारता परंपरया पार्थत्वाद्यवच्छि-
न्नाऽपि प्रवृत्तिनिमित्तलक्षणे च धर्मितानिरूपितप्रकारतायां प्राति-
पदिकस्य स्वेतरप्रातिपदिकप्रतिपाद्यतावच्छेदकधर्म्मानवच्छिन्नत्वमपि
तृतीयः सम्बन्धो निवेश्यते ऽन्ययोगत्वावच्छिन्ना च प्रकारता पार्थ-
त्वावच्छिन्नत्वेन तथाभूता नास्तीति न दोष इति दिक् मात्रपदेन
प्रातिपदिकार्थेतरस्य प्रकारतयाऽबोधकत्वमेव बोध्यते तेन समवायादेः
प्रवृत्तिनिमित्तप्रतियोगिकस्य संसर्गतया बोधकत्वेऽपि प्रथमा सिद्धा
तथा रामइत्यादौ संख्याया आधिक्ये ऽपि प्रथमा प्रातिपदिकार्थेतरीय
संख्यातिरिक्त-स्यबोधकादित्यर्थो-ऽन्यथा द्व्येकयोर्द्विवचनैकवचने
बहुषु बहुवचनमिति सूत्राभ्यामेकवाक्यतया एकत्वद्वित्वबहुत्ववि-
शिष्टप्रातिपदिकार्थमात्रबोधकात्प्रातिपदिकादेकवचनद्विवचनबहुवच-
नानि स्युरिति बोधस्यैवसत्त्वेन सङ्ख्याविशिष्टबोधकत्व, सङ्ख्याबोधक-
त्वाभावयोर्विरोधात् सूत्रस्यैव वैयर्थ्यापात इति बोध्यम् ।

इदमपि सूत्रं क्रियायोग एव प्रवर्त्तत इति ।

ननु घटोऽस्तीत्यादौ तिङर्थकर्त्तर्य्येव घटपदार्थस्याभेदेनान्वयात्

क्रियायामनन्वयेन कथं प्रथमायाः साधुत्वं नच घटाभिन्नस्य कर्तुः क्रियायामन्वयेन घटस्याप्यन्वयोजात एवेति वाच्यं तथा सति देवदत्तः स्वस्य पुत्रं पश्यतीत्यादौ स्वपदार्थस्यापि तिवर्थाभिन्नतया क्रियान्वयेन स्वशब्दादपि प्रथमापत्तेरिति चेन्न क्रियानिष्ठविशेष्यतानिरूपितवृत्तित्वसम्बन्धावच्छिन्नप्रकारतासमानाधिकरणविशेष्यताविशिष्टात् प्रातिपदिकात् कारकविभक्तिरित्यर्थेनादोषात् वैशिष्ट्यञ्च स्वनिरूपिताभेदसम्बन्धावच्छिन्नप्रकारताश्रयबोधकत्व स्वसमानाधिकरणभेदसम्बन्धावच्छिन्नप्रकारत्वाप्रयोजकत्वोभयसम्बन्धेन स्वस्य पुत्रमित्यादौ भेदसम्बन्धावच्छिन्नप्रकारताप्रयोजकत्वान्न प्रथमा नीलः सुन्दरो घटोऽस्तीत्यादौ च सर्वत्र प्रथमासिद्धा तथैव सुन्दरं पण्डितं पुत्रं पश्यतीत्यादौ द्वितीयादिः स्वस्य पुत्रं पश्यन्तं पश्येत्यादौ च स्वपदाच्च द्वितीया क्रियापदेन धात्वर्थमात्रं गृह्यते तेन द्वितीयान्तार्थस्यफलेऽन्वयेऽपि न क्षतिः ॥

कर्त्तुरीप्सिततमं कर्म्म ॥

आप्नोतेस्सन्नन्तात् कर्म्मणि क्त-स्तदन्तात्तमप् आप्धातो-स्सम्बन्धोऽर्थ-स्तचोपस्थितत्वात् कर्तृपदार्थविशेषणीभूतव्यापारद्वारको व्यापारविशिष्टफलाश्रयत्वरूपो—वैशिष्ट्यञ्च स्वप्रयोज्यत्व, स्ववाचकधातुवाच्यत्वोभयसम्बन्धेन यद्यप्येकसम्बन्धेन वैशिष्ट्यदानेऽपि सम्बन्धत्वोपपत्तिस्तथापि तमप्प्रत्ययादुभयसम्बन्धेन वैशिष्ट्यरूपातिशयलाभात् सम्बन्धद्वयनिवेशः धात्वर्थसम्बन्धस्य च सन्नर्थेच्छायां स्वप्रकारकत्वसम्बन्धेनान्वयः कर्त्तृशब्दः प्रकृते प्रकृतधातूपात्तप्रधानीभूतव्यापाराश्रयरूपस्वतन्त्रपरो नतु कर्त्तृसंज्ञकपरोऽत एव शत्रून्गमयत्स्वर्गमित्यादावण्यन्तकर्त्तुः शत्र्वादे-र्णौ कर्म्मत्वेऽपि तदीप्सितस्य स्वर्गादेः कर्म्मत्वसिद्धिः कर्त्तृसंज्ञकपरत्वे च तस्य तत्वाभावान्नस्यात् न च शत्रुव्यापारस्य ण्यर्थव्यापारविशेषणत्वेनाप्राधान्यात् कथन्तदाश्रयस्य शत्रो-स्वातन्त्र्यमपीति

वाच्यं गम्धात्वर्थे तस्यैव प्राधान्येन तदुपपत्ते-रत एव पाचयतिदेवदत्तेनेत्यादौ तृतीयोपपत्ति-रन्यथा तत्रापि ण्यर्थव्यापारविशेषणीभूतव्यापाराश्रयस्य देवदत्तादेः कर्त्तृत्वानापत्त्या तृतीयानुपपत्तिः कर्त्तुरित्यत्र कर्त्तरि षष्ठी क्तस्य च वर्त्तमान इति सूत्रात् कर्त्ता च व्यापाराश्रयो व्यापारस्य च धातुलभ्यत्वादाश्रयमात्रं षष्ठ्यर्थस्तस्मिन् प्रकृत्यर्थस्याभेदसम्बन्धेनान्वयो विशेषणांशे प्रकृत्यर्थावगाहनात् घटो घट इत्यत्रेवात्राभेदान्वयो-नस्यादिति नाशङ्कनीयम्। नीलघटो घट इत्यत्रैवान्वयसम्भवात् आश्रयस्य वृत्तित्वसम्बन्धेनेच्छायामन्वयः क्तप्रत्ययार्थो विषयताश्रयस्तदेकदेशविषयतायाञ्च निरूपितत्वसम्बन्धेनेच्छाया अन्वय-स्तथा च प्रकृतधातूपात्तप्रधानीभूतव्यापाराश्रयाभिन्नाश्रयवृत्ति व्यापारविशिष्टफलाश्रयत्वप्रकारिका येच्छा तन्निरूपितविषयताश्रयः कर्म्मसंज्ञक इत्यर्थः वैशिष्ट्यं पूर्वमुक्तम् नच कर्त्तुरित्यत्र षष्ठ्युपपत्तये वर्त्तमान एव क्तप्रत्यय इत्यस्यावश्यं वक्तव्यतया वर्त्तमानस्य प्रकृत्यर्थेच्छायामेवान्वयो वाच्य-स्तथा च वर्त्तमानकालिकेच्छाविषयस्यैव कर्म्मत्वेन भूतभविष्यदिच्छाविषयस्य कर्म्मत्वानापत्ति-र्नच सर्वस्य क्रियाश्रयकालस्य प्रारब्धापरिसमाप्तक्रियाश्रयत्व-रूपवर्तमानत्वस्य सत्वेन वर्त्तमानकालिकत्वविशेषणेऽपि न भूतकालिकादीच्छाव्यावृत्तिरिति वाच्य-न्तथा सति भवतीत्यादिप्रयोगाणां व्यवस्थानापत्त्या स्वजन्यबोधविषयत्वेनतात्पर्य्यविषयत्व, स्वोच्चारणाधिकरणकालवृत्तित्वोभयसम्बन्धेन स्वविशिष्टक्रियाबोधनेच्छायां स्वोत्तरं प्रत्यय इत्यर्थस्यैव वर्त्तमाननिमित्तकप्रत्ययविधायकशास्त्राणां सत्वेन भूतकालिकेच्छादीनां व्यावृत्तिसम्भवात् नचैवं सति पाणिनिनेप्सधातूच्चारणं यस्मिन् काले कृतं तत्कालिकेच्छाविशेष्यस्यैव कर्म्मत्वापत्ताविदानीन्तनेच्छाविषयस्य कर्म्मत्वानापत्त्या तण्डुलं पचतीत्यस्याप्यनापत्तिः पाणिनिकर्त्तृकेप्सतेत्येतदुच्चारणाधिकरणकालवृत्तीच्छामादाय कटं कृतवानित्यस्येदानीन्तनप्रयोगस्य तामेवेच्छामादाय तस्याः प्राक् कालवृत्ति कटं करिष्यतीत्यस्य-चोपपत्तौ शेखरकृता वर्त्तमानत्वा-

विषयताफलत्वेनोपन्यस्तस्य कटं कृतवान् कटं करिष्यतीत्यस्य सिद्धि-रित्यस्यासङ्गत्यापत्तिः भूतभविष्यत्प्रत्ययघटितप्रयोगासिद्ध्युद्भावनसूचितायाः कटं करोतीत्येतत्सिद्धेरसङ्गत्यापत्ति-श्चेति वाच्यं पूर्वपरदिनाधिकरणकेच्छाविषयस्य कर्म्मत्वानापत्तितात्पर्य्यगैव शेखरोक्ते-स्तत्वात् इदानीन्तनकटंकरोतीत्यस्याप्युपलक्षकत्वाच्चेति वाच्यम् वर्त्तमानत्वस्याविवक्षायामपि वर्त्तमानकालनिरूपितशक्तिमतः क्तप्रत्ययस्य योगे षष्ठीत्यर्थकेन क्तस्य च वर्त्तमानइति सूत्रेण षष्ठी विधाने बाधकाभावात् वर्त्तमानत्वस्याविवक्षणेऽपि वर्त्तमाननिरूपितशक्ते-स्सत्वात् ननु भूतकालबोधनेच्छयाऽप्युच्चरितक्तप्रत्यययोगे राज्ञा पूजित इत्यादौ षष्ठ्यापत्ति-र्वर्त्तमानत्वनिरूपितशक्ते-स्तत्रापि सत्वा-च्छक्ते-श्शक्ततावच्छेदकनियतत्वात् नच वर्त्तमानेतरकालविषयकबोधजनकत्वप्रकारकतात्पर्य्याविशेष्यत्वाभाववत्-क्तप्रत्ययोगे षष्ठीत्यर्थेन वर्त्तमानत्वाविवक्षायां षष्ठ्या भूतत्वविवक्षाया-न्तदभावस्य च सिद्धिरिति वाच्यम् एकदैकक्रियायां भूतकालिकत्व-वर्त्तमानकालिकत्वयो-र्वे धेन बोधाभावेऽपीच्छारूपतात्पर्य्यस्याबाधाद्यत्र वर्त्तमानत्वं भूतत्वञ्चोभयं तात्पर्य्यविषयी-भूतं तत्र षष्ठ्यनापत्ते-स्सूत्रात्तरस्वारस्यभङ्गापत्त्येष्टापत्तेरयोगात् किञ्च सूत्रे लिङ्गवचनमतन्त्रमिति सिद्धान्तात् तस्यापत्यमित्यादावपत्यशब्दार्थगतनपुंसकत्वस्याविवक्षया तत्रामादेशाय नपुंसकादित्यस्याप्युक्तरीत्या नपुंसकत्वेतरलिङ्गाबोधकादित्यर्थस्यैव वक्तव्यत्वेन तत्र भव इत्यादावपि पुंस्त्वस्याविवक्षायां सोरमापत्तिरिति चेदत्रोच्यते । कर्त्तुरीप्सिततममिति सूत्रं कर्म्मपदशक्तिग्राहकं कर्म्मपदशक्यतावच्छेदककोटाविच्छाविशेषणतया वर्त्तमानत्व-ञ्च विवक्ष्यते तेन भूतभविष्यदिच्छामादायापि कर्म्मत्वसिद्धि-स्तत्सूत्रजन्यबोधे इच्छाविशेषणतया तु वर्त्तमानत्वं विवक्षितमेव तेन षष्ठ्यपि सिद्धा नहि तत्पदशक्तिग्राहकवाक्यजन्यबोधविषयस्य सर्व्वस्य तत्पदशक्यतावच्छेदककोटौ विशेषणत्वमेवेति नियमः

शक्यतानवच्छेदकस्यापि बुद्धिस्थत्वादेर्बुद्धिस्थस्तत्पदशक्य इति शक्ति-ग्राहकवाक्यजन्यबोधविषयत्वदर्शनात् नच तत्र बुद्धिस्थत्वं शक्यता-नवच्छेदकमप्युपलक्षणतयाऽबुद्धिस्थव्यावर्त्तकं यथा भवति तथा कर्म्म-पदशक्यतानवच्छेदकमपि वर्त्तमानत्वमुपलक्षणतया भूतभविष्यदिच्छा-व्यावर्त्तकं भविष्यत्येवेति वाच्यम् तथा नियमस्याप्यनङ्गीकारात् अयं घट-स्तत्पदशक्य इति वाक्यजन्यबोधविषयस्यापीदन्त्वस्य तत्पदशक्य-तोपलक्षकत्वस्याप्यभावात् एवमेव तस्यापत्यमित्यादि वाक्यमण्प्रत्य-यशक्तिग्राहकं तद्वाक्यजन्यबोधे ऽपत्यविशेषणतया नपुंसकत्वभानेऽ-प्यण्प्रत्ययशक्यतावच्छेदकतयाऽविवक्षितत्वं सूत्रे लिङ्गवचनमतन्त्र-मित्यनुशासनात् तेन तस्यापत्यमित्यत्रामादेश औपगव इत्यादाव-वान्ते नपुंसकत्वाभाव-श्चोपपद्यत इति । सम्बन्धघटकवैशिष्ट्यनियाम-कद्वितीयसम्बन्धनिवेशा-त्प्रयागात्काशीं गच्छति चैत्रे प्रयागं गच्छतीति न प्रयोगोऽन्यथा गम्धात्वर्थव्यापारस्य प्रयोज्यो-यथा काशीसंयोग-स्तथा प्रयागविभागोऽपि तदाश्रयत्वेनेच्छोद्देश्यत्वस्यापि प्रयागे सत्त्वा-त्तथा प्रयोगापत्ते-र्द्वितीयसम्बन्धनिवेशे तु न विभागस्य, गम्धातुवा-च्यत्वाभावात् संयोगानुकूलव्यापारस्यैव गम्धात्वर्थत्वात् प्रयोज्य-त्वनिवेशाच्चाग्नेर्माणवकं वारयतीत्यादावग्नेर्न कर्म्मत्वापत्ति-स्संयो-गानुकूलव्यापाराभावानुकूलव्यापारो हि वारयतेरर्थ-स्तत्र संयोगस्य व्यापारवाचकवारिधातुवाच्यत्वात्संयोगाश्रयत्वेनाग्नेरिच्छोद्देश्यत्वा-त्कर्म्मत्वापत्ति-स्स्यात् तस्य संयोगस्य तादृशव्यापारप्रयोज्यत्वा-भावाच्च तन्निवेशे दोषाभावः ननु माणवकस्यैव व्यापारजन्यफलाश्रय-त्वेन वारयितुरिच्छोद्देश्यत्व-न्तु वह्नेस्संयोगाश्रयत्वेन तदिच्छावि-षयत्वं विरोधादिति कथं वह्नेः कर्म्मत्वापत्ति-र्नेव यदा दुष्टोभृत्य-स्तदा वारयितु-र्दुष्टस्य भृत्यस्य संयोगाश्रयत्वेन वह्नेरिच्छाविषयत्वं स्यादिति वाच्यम् । एकदा वह्निर्माणवकव्यापारजन्यसंयोगाश्रयो-

भवतु माडवकश्च वह्निसंयोगानुकूलव्यापाराभाववान् भवत्वितीच्छाद्वयोरेकस्मिन् पुरुषे विरोधादसम्भवेन दुष्टस्यापि वारयितुस्तादृशेच्छाया असम्भवात् नच वह्नेर्वारयितुस्तादृशेच्छोद्देश्यत्वाभावे अपादानत्वमपि न स्याद्वारणार्थानामीप्सित इति सूत्रेणेप्सितस्यैवापादानसंज्ञाविधानात्तमव्यग्रहणाभावे कर्म्मसंज्ञाऽपादानसंज्ञयोरीप्सितत्वनिमित्तत्वाविशेषात् व्यापारवाचकधातुवाच्यफलाश्रयत्वेनेच्छोद्देश्यत्वस्यैवेप्सितत्वरूपत्वादिति वाच्यं कर्म्मसंज्ञायां कर्त्तृग्रहणात् कर्त्तुरीप्सितत्वमपेक्षते ऽपादानसंज्ञायाञ्च कर्त्तृग्रहणाभावेन कारकाधिकारात् कारकमात्रेप्सितत्वस्यापेक्षितत्वेन वारयित्रीप्सितत्वाभावेऽपि माडवकादेरीप्सितत्वस्य सत्वेनापादानसंज्ञायां बाधकाभावादिति चेदत्रोच्यते कर्त्तुरिति सूत्राप्रवृत्तावपि तथायुक्तञ्चानीप्सितमिति सूत्रेण कर्म्मत्वप्राप्तिस्तमव्ग्रहणाभावे व्यापारवाचकधातुवाच्यफलाश्रयत्वस्यैव तथायुक्तत्वरूपत्वात् नन्वेवमपि वारणार्थानामिति सूत्रमनवकाशत्वात्कर्म्मसंज्ञाबाधकं स्यादिति चेत्सत्यन्तथा सति बाध्यसामान्यचिन्तया कर्म्मसंज्ञायामपादानसंज्ञीयोद्देश्यतावच्छेदकावच्छिन्नातिरिक्तत्वेन संकोचापत्त्या ऽग्नेर्म्माडवकं वारयतीत्यादौ माडवकादेरपि कर्म्मत्वानापत्तिरिति तत्वम् ॥ ननु यदा कालिकसम्बन्धेन मद्वृत्तिव्यापारजन्यफलाश्रयः कालो भवत्वितीच्छया व्यापारं करोति चैत्रस्तदा कालं गच्छतीत्यादिप्रयोगापत्तिः कर्त्तृव्यापारप्रयोज्यफलाश्रयत्वप्रकारकेच्छोद्देश्यत्वेन कालस्य कर्म्मसंज्ञाया निर्बाधात् कालिकसम्बन्धेनाविक्लित्याश्रयः पाषाणं भवत्वितीच्छामादाय पाषाणं पचतीत्याद्यापत्तिश्च समवायसम्बन्धेन फलाश्रयत्वनिवेशे उक्तापत्तिवारणेऽपि घटं नाशयतीत्यादौ घटमिच्छति घटं जानातीत्यादौ च गतिविरहः आद्ये प्रतियोगितासम्बन्धेन नाशरूपफलाश्रयत्वं घटस्य अन्त्ययोरिच्छाज्ञानानुकूलव्यापारार्थकत्वे विषयतानिरूपकेच्छाज्ञानरूपार्थकत्वे वा विषयता स्वरूपसम्बन्धाभ्यामेवेच्छा

विषयतारूपफलाश्रयत्वेन समवायसम्बन्धेन फलाश्रयत्वाभावात्कर्म्म-
त्वानापत्तेः कालिकान्यसम्बन्धेन फलाश्रयत्वनिवेशेऽपि न निस्तार-
स्तथाहि कालानुयोगिकविशेषणता रूपः कालिकश्चेत्पाषाणं पचती-
त्यस्यानिस्तारः स्वाधिकरणकालवृत्तित्वरूपः कालिकश्चेत्कालं पचती-
त्यस्यानिस्तार उभयोर्विवेशे जनकत्वसम्बन्धेन फलाश्रयोव्यापारोभव-
त्वित्यादीच्छामादाय व्यापारं पचतीत्याद्यापत्तिः कालिकातिरिक्तवृत्ति-
तानियामकसम्बन्धेन फलाश्रयत्वनिवेशे विषयितासम्बन्धेन मद्वृत्तिव्या-
पारजन्यविक्लित्याश्रयो-ज्ञानं भवत्वितीच्छामादाय ज्ञानं पचतीत्यापत्ति-
र्विषयिताया वृत्तिनियामकत्वाद् ज्ञाने घट इति प्रत्ययात् अत्रोच्यते
फलतावच्छेदकसम्बन्धेन फलाश्रयत्वनिवेशः फलतावच्छेदकश्च फलनि-
ष्ठाधेयतावच्छेदकतया योधात्वर्थतावच्छेदक स एव सर्वेषाञ्च धातूनां
फलविशिष्टव्यापारे शक्तिः वैशिष्ट्यञ्च स्वजनकत्व स्वाधिकरणवृत्ति-
त्वोभयसम्बन्धेन तत्तद्धातुस्थले फलनिष्ठाधेयतावच्छेदकतया तत्तत्स-
म्बन्धो निवेशनीयो यथा पचधातो—र्विक्लित्तिविशिष्टोव्यापारोऽर्थः वै०
स्वजनकत्व स्वनिष्ठसमवायसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरण-
तावद्वृत्तित्वोभयसम्बन्धेन तथा च तत्र फलतावच्छेदक-समवाय एव
न तु कालिकादि-स्तेन सम्बन्धेन फलाश्रयत्वप्रकारकेच्छाविषय स्तण्डु-
लाद्येव न कालपाषाणादिरिति निरुक्तेच्छाविषयस्य कालादे-र्नकर्म्मत्वं
यदिच समवायसम्बन्धेन विक्लित्याश्रयः कालः पाषाणं वा भवत्वि-
तीच्छा तदा कालं पचतीत्यादि प्रयोगोभवत्येव एवं नाशयतीत्यादौ
नाशविशिष्टोव्यापारोधात्वर्थः वै० स्वजनकत्व स्वनिष्ठप्रतियोगित्व-
सम्बन्धावच्छिन्नाधेयतानिरूपिताधारतावद्वृत्तित्वोभयसम्बन्धेन घटं
जानातीत्यादौ घटमिच्छतीत्यादौ च ज्ञानेच्छाविशिष्टव्यापारोऽर्थः वै०
स्वजनकत्व स्वनिष्ठविषयतासम्बन्धावच्छिन्नाधेयतानिरूपिताधारता-
वद्वृत्तित्वोभयसम्बन्धेन तथा—चाद्ये फलतावच्छेदकः प्रतियोगितास-
म्बन्धो ऽन्त्ययोः फलतावच्छेदकोविषयतेति तत्र तत्र तेन तेन सम्बन्धे-

नैव फलाश्रयस्य कर्म्मत्वम् न तु तदतिरिक्तसम्बन्धेन फलाश्रयस्य कालादेः कर्म्मत्वम् एवं प्रकारेण यद्धातुसमभिव्याहारे यस्य यस्य कर्म्मत्वमिष्ट—स्तत्तन्निष्ठकर्म्मत्वोपयोगितत्तत्सम्बन्धान्तर्भावेण धातोरर्थो वाच्यः प्रतीत्यनुसारेणैव शब्दार्थस्य कल्पनात् नन्वेवमपि स्तोकं पचतीत्यादौ विक्लित्त्यभिन्ने स्तोकादौ समवायसम्बन्धेन विक्लित्त्याश्रयत्वाभावात्कथं कर्म्मत्वं व्यपदेशिवद्भावेन स्वस्मिन् स्वघटितत्वस्वघटकत्वयोरेवातिदेश इत्यर्थस्यैवान्यत्रसिद्धान्तितत्वेन समवायसम्बन्धेन स्वाश्रयत्वस्य स्वस्मिन्नतिदेशेनाप्यभावादिति चेन्न फलतावच्छेदकतादात्म्यान्यतरसम्बन्धेन फलसम्बन्धिन एव कर्म्मत्वमित्यर्थेनादोषात् केचित्तु फलं प्रति व्यापारस्य जनकत्वात्केन चित्सम्बन्धविशेषेणैव कार्य्यता वक्तव्या तथाच समवायसम्बन्धेन विक्लित्त्यावच्छिन्नं प्रति व्यापारस्य कारणत्वं प्रतियोगित्वसम्बन्धेन नाशं प्रति व्यापारस्य कारणत्वं कारणतावच्छेदकसम्बन्धश्च यथा सम्भवमूह्यः प्रकृते प्रयोजनाभावान्न विचार्य्यते तथाच फलनिष्ठकार्य्यतावच्छेदकसम्बन्ध एव फलतावच्छेदक—स्तेन सम्बन्धेन फलाश्रयः कर्म्म स्तोकं पचतीत्यादौ पूर्वोक्तैव गतिरित्याहु—स्तन्न अर्थभेदेनैव कार्य्यकारणभावभेदात् वृक्षं त्यजति वृक्षाद्विभजते अत्र द्वयोरपि धात्वोर्विभागानुकूलव्यापार एवार्थ—स्तथा च यदि समवायसम्बन्धेन विभागत्वावच्छिन्नं प्रति व्यापारः कारणमिति कार्य्यतावच्छेदक—स्समवाय—स्स एव फलतावच्छेदक—स्तेन सम्बन्धेन विभागाश्रयो वृक्षं त्यजतीत्यत्र यथा वृक्ष—स्तथा—वृक्षाद्विभजते अत्रापि समवायसम्बन्धरूपफलतावच्छेदकसम्बन्धेन विभागरूपफलाश्रयो वृक्ष—स्तस्याप्यपादानसंज्ञां बाधित्वा कर्म्मसंज्ञापत्तिः वृक्षं त्यजतीत्यादौ कार्य्यतावच्छेदक—स्समवायः विभजत इत्यत्रानुयोगित्वसमानाधिकरणसमवाय इति प्राक्तौ कर्म्मत्वमपरत्रापादानत्वमिति व्यवस्थोपपत्तिरिति चेन्नार्थभेदाभावेन कार्य्यकारणभावभेदाभावात् धात्वर्थतावच्छेदकस्य फलतावच्छेदकत्वे

तु त्यजधातोः प्रतियोगित्वसमानाधिकरणसमवायसम्बन्धावच्छिन्न-स्वनिष्ठाधेयतानिरूपिताधिकरणताश्रयवृत्तित्व स्वजनकत्वोभयसम्बन्धेन विभागविशिष्टव्यापार एवार्थस्तथाच फलतावच्छेदकसम्बन्धः प्रतियोगित्वसमानाधिकरणसमवाय-स्तेन सम्बन्धेन विभागरूपफलाश्रयो वृक्ष—स्तस्य कर्म्मत्वं विपूर्व्वकभजधातोश्चानुयोगित्वसमानाधिकरणसमवायसम्बन्धावच्छिन्नस्वनिष्ठाधेयतानिरूपिताधिकरणताश्रयवृत्तित्व स्वजनकत्वोभयसम्बन्धेन विभागविशिष्टोव्यापारोऽर्थस्तथाचानुयोगित्वसमानाधिकरणसमवायः फलतावच्छेदक-स्तच तेन सम्बन्धेन विभागरूपफलाश्रयो वृक्षाद्विभजते खग इत्यत्र खग एव न वृक्ष-स्तस्य तु प्रतियोगित्वसमानाधिकरणसमवायसम्बन्धेन विभागाश्रयत्वमिति फलतावच्छेदकसम्बन्धेन फलाश्रयत्वाभावात् कर्म्मत्वाप्राप्त्यावपादानत्वमेव खगस्य तेन सम्बन्धेन फलाश्रयत्वेऽपि न कर्म्मत्वं परया कर्तृसंज्ञया बाधात् नन्वेवमपि वृक्षाद्विभजत इत्यादौ वृक्षस्य कर्म्मत्वं दुर्वारं प्रतियोगित्वसमानाधिकरणसमवायस्यापि वृक्षं त्यजतीति प्रयोगानुरोधेन फलतावच्छेदकत्वा-त्तेन सम्बन्धेन विभजतिसमभिव्याहारेऽपि वृक्षस्य विभागाश्रयत्वात् नच त्यजतीत्यत्र तस्य फलतावच्छेदकत्वेपि भजधातुसमभिव्याहारेऽनुयोगित्वसमानाधिकरणसमवायस्यैव फलतावच्छेदकत्वमिति न दोष इतिवाच्यं यत्नतत्यस्य प्रवेशे ऽननुगमात् एवं माषेष्वश्वं बध्नातीत्यादौ माषाणां कर्म्मत्वापत्ति रश्वस्यापि पश्वोगच्छति भक्षयतीत्यादिप्रयोगे कर्तृत्वा-त्तदीप्सिततमत्वस्य माषेषु सत्त्वात् ननु प्रकृतधात्वर्थप्रधानीभूतव्यापाराश्रयस्यैव कर्तृत्वेनाश्वस्य तत्त्वाभावान्न दोष इति चेन्न प्रकृतत्वस्याऽननुगतान्तिप्रसक्तस्य दुर्व्वचत्वादिति चेदत्रोच्यते स्वविशिष्टेच्छीयविशेष्यताश्रयः स्वकर्म्मेति सूत्रार्थः स्वं धातुः इच्छायां धातुवैशिष्ट्यं स्वजन्यबोधविषयत्वेन तात्पर्य्यविषयीभूतप्रधानीभूतव्यापाराश्रयवृत्तित्व? स्वजन्यबोधविषयत्वेनतात्पर्य्यविषयीभूतप्रधानीभूतव्यापारप्रयोज्यत्व स्वबोध्य-

त्वेनतात्पर्य्यविषयत्वोभयसम्बन्धेन स्वविशिष्टफलनिरूपितत्व, स्वजन्यबोधविषयत्वेनतात्पर्य्यविषयीभूतफलनिष्ठाधेयतावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन स्वविशिष्टाश्रयत्वप्रकारकत्वोभयसम्बन्धेन, स्वनिरूपितकर्म्मत्वमेव च स्वसमभिव्याहृतकर्म्मप्रत्ययार्थ इति न कोऽपि दोषः समन्वयः स्वयमुह्यः ननु यत्र तण्डुलनिष्ठविक्लित्त्यनुकूलव्यापारवानहं भवेयमित्याद्याकारकतण्डुलाद्यविशेष्यकेच्छाधीनैव पाकक्रिया तत्र तण्डुलादाविच्छीयविशेष्यताया विरहेण तण्डुलं पचतीति प्रयोगानापत्तिः यदि च तादृशेच्छीयविषयताश्रयः कर्म्मेत्येवार्थस्तर्हि व्यापारफलादीनामपि विषयत्वाविशेषात् व्यापारं पचति फलं पचतीत्यादीनामप्यापत्तिः अत्रोच्यते मद्वृत्तिव्यापारप्रयोज्यफलाश्रयस्तण्डुलोभवत्वितीच्छाया एवाभिलाप–स्तण्डुलनिष्ठविक्लित्त्यनुकूलव्यापारवानहं भवेयमित्यादिवाक्येन तथाचैतद्वाक्याभिलप्यमानेच्छीयमुख्यविशेष्यतायास्तण्डुले एवसत्त्वेनापत्त्यभावः अत एव मुख्यविशेष्यताया इच्छार्थकधातुसमभिव्याहारे कर्म्मप्रत्ययेन सुखमिच्छतीत्यादौ प्रतीतिस्तथा चाहं सुखीस्यामितीच्छास्थले सुखमिच्छतीति प्रयोगानुपपत्तिरित्याशंक्य मम सुखं भवत्वितीच्छाया एव चाहं सुखीस्यामिति शब्दे नाभिलाप इति द्वितीयाव्युत्पत्तिवादे गदाधरेणोक्तम्, अथवा यथा विधेयता प्रकारताविशेष्यताभ्यां भिन्ना विषयता विशेष्यविशेषणसाधारणी नतु विशेषणमात्रनिष्ठा पर्व्वतोवह्निमानिति बुद्धौ पर्वते वह्निरिति बुद्धौ च वह्नेरेव विधेयत्वात् तथोद्देश्यतापि ताभ्यां भिन्नैव नतु विशेष्यमात्रनिष्ठाउक्तबुद्धिद्वये पर्वतस्यैवोद्देश्यत्वात् इत्यपि गदाधरेण द्वितीयायामुक्तं तथा च यथा मद्वृत्तिव्यापारप्रयोज्यफलाश्रयस्तण्डुलोभवत्वितीच्छीयोद्देश्यता तण्डुले एव तथा तण्डुलनिष्ठविक्लित्त्यनुकूलव्यापारवानहं भवेयमितीच्छीयोद्देश्यतापि तण्डुल एव तथा च मद्वृत्ति व्यापारप्रयोज्यफलाश्रयत्वप्रकारकेच्छाजन्यकृतिजनकेच्छीयोद्देश्यताश्रयः कर्म्मेति सूत्रार्थः निरुक्तेच्छयोरन्यासाच्च तण्डुलनिष्ठविक्लित्तिर्मद्वृत्ति-

व्यापारजन्या भवतु मदीयो व्यापारस्तण्डुलनिष्ठविक्लित्त्यनुकूलो भवत्वि त्यादीनां समानफलजनकत्वेन तासामुद्देश्यतायाश्च तण्डुले एव सत्त्वेन तासु कस्या अपीच्छायास्सत्त्वे न दोष इति विभावनीयम्। सूत्रे एकस्या एवोपादानन्तु सर्वासान्तासां समानफलजनकत्वेनैकत्व-मित्यभिप्रायेणेति दिक्॥ ननु तण्डुलं न पचतीत्यादौ कथं तण्डु-लादेः कर्म्मत्वं कर्तृवृत्तीच्छाया अभावेनेच्छीयोद्देश्यत्वाश्रयत्वस्य तण्डु-लादावभावेन कर्म्मसंज्ञाविधायकसूत्रस्याप्राप्तेरिति चेदत्र केचित् नञ् समभिव्याहारे फलाभावानुकूलव्यापारो धातोरर्थः फलाभावरूप फलाश्रयत्वात्तण्डुलस्य कर्म्मत्वमित्याहुस्तच्च फूत्कारादीनामेव पचधा-तुवाच्यतया तेषां विक्लित्तिं प्रत्येव जनकत्वात् पचतीत्यादेर्विक्लित्त्य-भावानुकूलव्यापारवाचकत्वाभावात् असमस्तनञः क्रियाऽभावबोध-कत्वेनैव साधुत्वस्य साधुत्वमष्टकस्यास्य क्रिययैवावधार्य्यतामित्यनेन बोधितत्वाच्च। तण्डुलो विक्लित्त्यभाववान् भवत्वितीच्छाया अप्यभावे तथा प्रयोगस्येष्टस्यानापत्ते-र्दुर्वारत्वाच्च अत्रोच्यते यत्र केवलं तण्डुलं पचतीत्युच्यते तत्र कर्म्मत्वोपपत्तिः कर्तुरध्याहारेणैव कर्त्तव्या ऽन्यथा सूत्रार्थसमन्वयस्याभावेन कर्म्मत्वानापत्ति-स्तथैव तण्डुलं न पचतीत्या दावपि कर्त्तारमध्याहृत्य तद्वृत्तीच्छामादाय कर्म्मत्वोपपत्तिं कृत्वा अन्यस्मिन् चैत्रादौ तण्डुलनिष्ठविक्लित्त्यनुकूलव्यापाराभावो नञा बोधनीय इति न काप्यनुपपत्तिः नच यद्वस्तुविषयकपाकाप्रसिद्धि-र्यथा गगनादेस्तत्र कर्तृवाचकपदाध्याहारेणाप्यसिद्धिः। कस्यापि पाकक्रियये प्सिततमत्वस्य गगनादेरभावेन गगनं न पचतीत्यादावनुपपत्तिस्तदव-स्थैवेति वाच्यम्। गगनादौ पाकासम्भवेपीच्छाया अनिवार्य्यतया पाक-क्रियया गगनादेरप्याप्तुमिष्यमाणत्वे बाधकाभावात् अत एव गगनं पचतीत्यादौ योग्यताविरहेण शाब्दबोधाभावेऽपि न व्याकरणासाधुत्वं योग्यताभ्रमे शाब्दबोधस्यापीष्टत्वाच्च नन्वेवमपि यत्र चैत्रो न पचति तापीकृति तत्र चैत्र-स्तण्डुलं पचतीति कथं प्रयोग-स्तत्र चैत्रस्य

कर्तृत्वाभावात् तेन तण्डुलस्याप्तुमिष्यमाणत्वाभावाच्च नच तत्रापि तादृशं कर्त्तारमध्याहृत्य कर्म्मत्वोपपत्तिरिति वाच्यम् कर्त्रन्तरबोधस्य तथाननुभवादिति चेन्न विवक्षातः कारकाणि भवन्तीति चिरन्तनोक्तेः चैत्रवृत्तिव्यापारप्रयोज्यफलाश्रयत्वेन तण्डुलस्य विवक्षितत्वात् कर्म्मत्वोपयोगीच्छाया अपि तदानीं चैत्रे कल्पितत्वेन तामादाय सूत्रप्रवृत्त्युपपादनीयत्वात् अत एव रथो ग्रामं गच्छतीत्यादौ ग्रामस्योद्देश्यताया आरोपेण कर्म्मत्वमिति लघुमञ्जूषायामुक्तम् वस्तुतस्तु ग्रामं न गच्छति चैत्र इत्यादावपि फलाश्रयत्वप्रकारकेच्छीयोद्देश्यतां ग्रामादावारोप्यैव कर्म्मत्वोपपत्तिः कर्त्तव्या कर्त्रन्तराध्याहारस्तु न युक्तः ग्रामंगच्छन्ति न चैत्र इत्यापत्तेः तण्डुलं पचति न त्वमित्यापत्तेश्च कर्त्रन्तराध्याहारे तेनैव सह तिङर्थकर्त्तुरन्वयेन चैत्रेण सहसमानवचनत्वानियमात् त्वं पदार्थेन सहान्वयेन त्वं पदस्य तिङ्सामानाधिकरण्यविरहेण मध्यमपुरुषस्याप्राप्तेश्च परमलघुमञ्जूषायामुद्देश्यत्वयोग्यस्य कर्म्मसंज्ञेत्यर्थकरणेन ग्रामं न गच्छतीत्यादौ कर्म्मत्वोपपत्तिः कृता सा न प्रामाणिकी लघुमञ्जूषायामभावात् योग्यतायाश्चानुगमासम्भवाच्च पदार्थो द्विविधो बोद्ध्यो वाच्यश्च नञ् समभिव्याहारे बोद्ध्यस्यैव बोधो नञ् पदन्तात्पर्य्यग्राहकमिति बोद्ध्यार्थमादायैव कर्म्मत्वमित्यपि केचित् ।

गतिबुद्धिप्रत्यवसानार्थशब्दकर्म्माकर्म्मकाणामणि-कर्त्ता स णौ ॥

शत्रूनगमयत्स्वर्गमित्यादौ ण्यन्तधातोस्संयोगानुकूलव्यापारानुकूलव्यापारोऽर्थस्तत्र प्रधानीभूतव्यापारप्रयोज्यं यत्संयोगानुकूलव्यापारात्मकं फलन्तदाश्रयत्वप्रकारकेच्छोद्देश्यत्वाच्छत्रोः कर्म्मत्वं कर्तुरीप्सिततमं कर्मेत्यनेन प्राप्तं णिच्प्रकृतिगम्धात्वर्थप्रधानीभूतव्यापाराश्रयत्वेन तस्य कर्तृत्वं प्राप्तं तच्च परत्वात्कर्तृसंज्ञा स्यात् कर्म्मसंज्ञाया द्वितीयव्यापारसापेक्षत्वेन तदपेक्षया तदनपेक्षकर्तृसंज्ञाया अन्तरङ्गत्वाच्च कर्तृप्रयोजकस्य हेतुत्वात्तदीयव्यापारे णिज्विधानात्तदर्थव्यापार-

येतकर्म्मसंज्ञां प्रति कर्त्तृसंज्ञाया उपजीव्यत्वाच्च तामबाधित्वा गत्यादिसूत्रेण ण्यन्तगत्याद्यर्थकधातुयोगे प्रयोज्यस्य कर्म्मसंज्ञा विधीयत इति विधायकत्वमेतत्सूत्रस्य अत एवोक्तं परत्वादुपजीव्यत्वादन्तरङ्गतयाऽपि च प्रयोज्यस्यास्तु कर्त्तृत्वं गत्यादेर्विधितैवोचितेति ॥ अत एवाकडारादेकासंज्ञेति सूत्रे प्राक्कडारात्परं कार्य्यमिति पाठे यत्र पूर्व्वया परस्या बाधः प्राप्नोति तत्र परा अनेन भाव्यते कार्य्यशब्देन संज्ञैवोच्यते । इति बाधकबाधनार्थमिदं सूत्रं न तु नियमार्थम् । एका संज्ञेति पाठे तु नियमार्थमेवेति । तत्र परं कार्य्यमिति पाठे गतिबुद्ध्यादीनां ण्यन्तानां कर्त्तृकर्म्मसंज्ञमपि प्राप्नोति आरम्भसामर्थ्यात्कर्म्मसंज्ञा परकार्य्यत्वात्कर्त्तृसंज्ञेति दोष उक्तो भाष्ये । तत्रारम्भसामर्थ्यादित्यस्य गतिबुद्धिसूत्रारम्भसामर्थ्यादित्यर्थः अनेनापि गतिबुद्धिसूत्रस्य विध्यर्थत्वं सूचयति । यद्यपि शाब्दबोधीयविशेष्यताश्रयत्वरूपं शाब्दं प्राधान्यं णिजर्थव्यापारस्यैवास्ति तदनुरोधिकर्म्मसंज्ञाया अपि प्राधान्यात्प्रधान कार्य्यस्य सर्व्वतो बलवत्त्वादन्तरङ्गोपजीव्यामपि कर्त्तृसंज्ञां प्रति बाधकत्वेन कर्म्मसंज्ञैवस्यादिति गतिबुद्धिसूत्रं व्यर्थं सन्नियमार्थमेवेति प्राप्तस्तथापि शाब्दप्राधान्यापेक्षयोद्देश्यत्वलक्षणस्यार्थप्राधान्यस्यैवाकडारसूत्रस्थभाष्यप्रामाण्याल्लोकव्यवहाराच्च प्राबल्यमित्यभ्युपेयते ततश्च प्रयोज्यव्यापारस्यैवोद्देश्यत्वेन प्राधान्यात्तदनुरोधिकर्त्तृत्वस्यैव प्राधान्यमपीति विध्यर्थमेव गतिबुद्धिसूत्रमिति प्राचीनमतम् नवीनैस्तु निरुक्तशाब्दं प्राधान्यमन्यानधीनत्वलक्षणमार्थं प्राधान्यमेतदुभयं णिजर्थव्यापारस्यैवास्तीति तदनुरोधिन्याः कर्म्मसंज्ञाया एव प्राधान्येन सिद्धौ नियमार्थमेव गत्यादिसूत्रम् । आकडारादिसूत्रस्यारम्भसामर्थ्यादित्यस्यैतन्नियमारम्भसामर्थ्यादित्यर्थ इति न तस्माद्बुधित्व-मत एव हेतुमति चेति सूत्रे नियमार्थत्वमेवोक्तम् भाष्यकृतेत्यभ्युपेयते ॥ अत एवोक्तं गुणक्रियायां स्वातन्त्र्यात्प्रेषणे कर्म्मतां गतः नियमात्कर्म्मसंज्ञायाः स्वधर्म्मेणाभिधीयते इति कर्त्तुः स्वधर्म्मेण तृतीययेत्यर्थः णिजर्थव्यापा-

रजन्यफलाश्रयस्य कर्म्मत्वं स्याच्चेद् गत्याद्यर्थकधातूपात्तव्यापाराश्रयस्यैवेति नियमस्तेन कर्त्तुरितिसूत्रे णिजर्थव्यापारजन्यफलाश्रयातिरिक्तस्यैवेप्सिततमस्य ग्रहणमिति पाचयति देवदत्तेन यज्ञदत्तमित्यादौ देवदत्तस्य नकर्मत्वम् ।

येषांदेशकालादिभिन्नं कर्म न सम्भवति ते अत्राकर्म्मका इति ॥

अयं भावः गतिबुद्धिप्रत्यवसानार्थशब्दकर्म्मणामित्येव नियमस्य सजातीयापेक्षत्वात् णिच्प्रकृतिसकर्म्मकधातूपात्तव्यापाराश्रयस्य कर्म्मत्वञ्चेद्गत्याद्यर्थकादीनामेव धातूनां व्यापाराश्रयस्येति नियमार्थमस्तु आसयत्सलिले पृथ्वीमित्यादौ नियमानाक्रान्ततया कर्त्तुरित्येव कर्म्मत्वसिद्धेरकर्म्मकग्रहणं व्यर्थं सत् देशकालादिभिन्नं कर्म्म येषां न सम्भवति तद्धातुबोधकम्, अकर्म्मकपदघटक-कर्म्मपदस्य देशकालादिभिन्नकर्म्मार्थ इति तत्त्वम् । तेन न विद्यते देशकालादिभिन्नं कर्म्म येषां धातूनां ते धातवोऽकर्म्मकपदबोध्या-स्तेन सत्यपि देशादीनांकर्म्मत्वे मासमासयति देवदत्तमित्यादौ देवदत्तस्य कर्म्मत्वसिद्धि-रुक्तनियमेन तु न सिद्ध्येत् सकर्म्मकत्वेन नियमाक्रान्तत्वात् पाचयति देवदत्तेनेत्यादौ कर्म्मणोऽविवक्षास्थले तु न देवदत्तस्य, नियमेनाकर्म्मकपदेन वा कर्मत्वं विवक्षास्थलेऽस्यैव धातोः देशादिभिन्नकर्म्मसम्भवात् ज्ञापितेऽपि कथं चारितार्थ्यमिति नाशङ्कनीयम् मासमासयति देवदत्तमित्यादावकर्म्मकग्रहणाभावे कर्म्मत्वानापत्तेः यदि च नियमस्य सजातीयापेक्षत्वादेव गत्याद्यर्थकादीनां देशकालादिभिन्नकर्म्मवत्त्वाद्देशकालादिभिन्नकर्म्मवताञ्चैतेषामेवेति नियम-स्तदा नियमेनैव मासमासयतीत्यादौ कर्म्मत्वस्य पाचयतीत्यादावविवक्षास्थले तदभावस्य च सिद्धेरेवाकर्म्मकग्रहणं व्यर्थमेवेति नियमार्थत्ववादिमतम् । यस्यमते कर्तृसञ्ज्ञाबाधनार्थमिदं सूत्रम् । तन्मतेऽपि देशकालादिकर्म्मवत्त्वस्य व्याप्य-

त्कर्मावेण वृत्तौ सर्वेषां धातूनां सत्वात् येषां कर्म्म न विद्यते तेषां धातूनामप्रसिद्ध्या तदर्थकमकर्म्मकपदं व्यर्थमेव अत एवोक्तं भाष्ये न केचिद्देशकालादिभिरकर्म्मका इति अनेन भाष्येण असम्भवत्कर्म्मको धातुरेवाकर्म्मकपदेन गृह्यते अन्यथा व्याप्यर्थाभावे देशकालादीनां कर्म्मत्वाभावात् अन्येषां मसम्भवाच्च अकर्म्मकधातोरसम्भवान्न च केचिदित्युक्ते असंगत्यापत्तेः ममतु कुत्रापि तस्य कर्म्मणस्सम्भवादाकर्म्मकत्वं धातोरिति भाष्यं सङ्गतम्। तथाच व्यर्थसदकर्म्मकपदग्रहणं देशकालादिभिरसम्भवत्कर्म्मक एवाकर्म्मकपदेन गृह्यत इति ज्ञापयति तेन मासमासयति देवदत्तं पाचयति देवदत्तेनेति च सिद्धम् सामान्यापेक्षं ज्ञापकं तेन सर्वत्राकर्म्मकपदमुक्तार्थकमत एव मासमास्यते इत्यादौ सत्यपि मासस्य कर्म्मत्वे भावे लट्सिद्धिः पाचयति देवदत्तेनेत्यादौ तण्डुलादिकर्म्मणामविवक्षा, अविवक्षा च द्वेधा कर्म्मणस्सम्बन्धित्वेन विवक्षा अथवा धातोर्व्यापारमात्रबोधकत्वेन तात्पर्य्ये कर्म्मान्वययोग्यफलस्य त्यागः एवं प्राचीनमतम् नवीनैस्तु अविवक्षितकर्म्माप्यकर्म्मकपदेन गृह्यते इत्युच्यते अतएव कृतपूर्वी कटमित्यत्र कर्म्मणोऽविवक्षयाऽकर्म्मकत्वेन भावे क्तप्रत्यये कृते कर्म्मविवक्षया कटं कर्म्म, अविवक्षितकर्म्मणोऽकर्म्मकत्वाभावे भावे क्तप्रत्ययानापत्तिः नच तत्र भाष्यप्रामाण्याद्भावे क्तप्रत्ययोऽन्यथान्यत्राविवक्षितकर्म्मकाद्भावे क्तप्रत्ययो न दृश्यते इति वाच्यम्। अकर्म्मकत्वाभावेऽपि स्वसामर्थ्यादेव भावेक्तप्रत्ययकरणे कर्म्मणोऽविवक्षाया भाष्यकृत्कृतायावैयर्थ्यापत्तेः लुनातेर्विवृत्तप्रेषणार्थणिचि लावयति केदारमिति कर्म्म, द्वितीयान्तस्य कैयटप्रयोगस्य णेरणाविति सूत्रस्यस्य गतिविरहाच्च, न च लावयतीत्यत्रार्थान्तरत्वादकर्म्मत्वमत्वविवक्षितकर्म्मकत्वादिति वाच्यं प्रेरणांशस्य त्यागेऽपि फलांशस्य तस्यैव सत्वात् स एवायमिति तत्वप्रत्यभिज्ञानाच्च अर्थान्तरत्वाभावात्। स्पन्दनार्थकवहेस्सर्वथा भेदप्रतीतावेवार्थान्तरत्वप्रयुक्ताकर्म्मकोदाहरणात्।

गर्येति सूत्रे कर्म्मणः शेषत्वविवक्षयाऽकर्म्मकत्वे मातुः स्मर्य्यत इत्यत्र भावे तस्य भाष्ये उदाहृतत्वाच्च नचाविवक्षितकर्म्मकस्याप्यकर्म्मकपदेनग्रहणे अकर्म्मकपदस्य कर्म्मानन्वय्यर्थक इत्येवार्थोऽस्त्वतो नत्वसम्भवत्कर्म्मक इत्यर्थ स्तथाहि सति विवक्षास्थले तस्य कर्म्मसम्भवादविवक्षास्थलेऽपि अकर्म्मकत्वानापत्तिरेवञ्च नच केचित् कालभावादिभिरकर्म्मका इति भाष्यासङ्गतिः कालादीनां कर्म्मत्वोपयोगिव्याप्त्यर्थराहित्ये आसधातोरेव कर्म्मानन्वय्यर्थकत्वेनाकर्म्मकस्य सत्वात्, प्राचीनमते तु व्याप्त्यर्थान्तर्भावेण आसधातोर्वृत्तौ मासादिकर्म्मसम्भवात् असम्भवत्कर्म्मकत्वस्यास्धातोरप्यभावाच्च च केचिदिति भाष्यं सङ्गच्छत इत्येव यत्त्वित्यादिना शेखरेऽपि शङ्कितमिति, चेत्सत्यम्, अचोच्यते अतएव भाष्यात् असम्भवत्कर्म्मक एवाकर्म्मकपदेन गृह्यते तद्धैकर्म्मकग्रहणमुक्तरीत्या व्यर्थं सद्देशकालादिभिन्नासम्भवत्कर्म्मकमकर्म्मकमिति प्राचीनमतमेव युक्तम् । शेखरकारैश्चोक्तरीत्याऽकर्म्मक ग्रहणं व्यर्थं सत् अवस्थान्तरे कर्म्मरहितोऽकर्म्मकः, अत एव क्वचिद्धे अकर्म्मका इति भाष्ये उक्तम्, अवस्थान्तरे इत्यस्य कालादेः कर्म्मसंज्ञाप्रयोजकव्याप्तिरहिते कर्म्मणोऽविवक्षायाञ्चेत्युभयं कृतपूर्वीकटमित्यत्र भावे क्तप्रत्ययकरणपरभाष्यात् विनिगमनाविरहाच्चार्थ इति अविवक्षितकर्म्मकोप्यकर्म्मक इत्युक्तम्, तच युक्तं प्रतिभाति, एवमर्थेहि मासादिकर्म्मान्वयकाले आस्धातोरकर्म्मकत्वं न स्यात् नच व्याप्तिरहितेऽर्थे यथमेव आस्धातुः कर्म्मरहित इति भवत्यकर्म्मको मासादियोगेऽपीति वाच्यम् । तथासति तण्डुलादिकर्म्मान्वयकालेऽपि पच् धातुरकर्म्मकः स्यादस्येवाविवक्षास्थले कर्म्मरहितत्वात् नचार्थभेदेन शब्दभेदादस्य पचस्ततोभेद इति वाच्यम्। आसधातावपि तुल्यत्वात् नच मासादिभिन्नकर्म्मरहितोऽकर्म्मकः पच्धातुश्चाविवक्षास्थलीयोविवक्षास्थलीयादर्थभेदेन भिन्न इति न दोष इति वाच्यम्, क्वचिद्धेऽकर्म्मका इति भाष्यात्तदर्थालाभात्, तस्य हि अवस्थान्तरे कर्म्मरहित

इत्यर्थकत्वेनैव स्वयं व्याख्यातत्वात् किञ्च लावयति केदारमित्यत्रैतदर्थ-
भेदाभावेनार्थभेदाच्छब्दभेद इत्यस्यायुक्तत्वम् । अत एवोक्तव्याख्याने-
ऽपरितुष्यता नागेशेन यद्वेत्यादिना यत्कर्म्म भवति नच भवति तेनाक-
र्म्मकाणामिति पक्षान्तरभाष्यादकर्म्मकग्रहणसामर्थ्याद्व्यभिचारिकर्म्मर-
हितोऽकर्म्मक इत्युक्तम् मासादिकञ्च न व्यभिचारि तस्य सर्वधातु-
कर्म्मत्वादिति तद्भावः अस्मिन्नपि कल्पे शङ्काकाले योऽर्थोऽकर्म्मकप-
दस्य बुद्धोऽसम्भवत्कर्म्मक इति तस्य त्यागे मानाभावेन मासादिभि-
न्नासम्भवत्कर्म्मकोऽकर्म्मक इत्येव लभ्यते परन्तु कृतपूर्वीकटमित्यत्र भावे
क्तप्रत्ययबोधकभाष्यात् लावयति केदारमिति कैयटात् अधीगर्थे-
सूत्रस्य मातुः स्मर्यते इत्यत्र भावेलडित्यर्थबोधक भाष्यादकर्म्मकाधि-
कारे शुवृध्यादिभ्य आत्मनेपदविधानाच्च देशकालादिभिन्न कर्म्मा-
नन्वय्यर्थकत्वमकर्म्मकत्वमिति शेखरोक्तमेव युक्तं प्रतिभाति कर्म्मणो-
ऽविवक्षया पचादिभ्यो भावे लादयस्तु अनभिधानादेव वारणी-
इति दिक् ॥ वस्तुतस्तु नचकेचिदिति भाष्यात्प्राचीनोक्तमेवयुक्तमुप-
लेष्वर्थान्तरत्वादकर्म्मकत्वमुपपाद्यमिति दिक् ॥

स्वतन्त्रः कर्त्ता ।

स्वातन्त्र्यञ्च न व्यापाराश्रयत्वं सर्वेषां कारकाणां स्वव्यापा-
रद्वारैव प्रधानक्रियानिष्पादकत्वेन व्यापाराश्रयत्वात् कर्त्तृत्वापत्तेः
नापि धात्वर्थव्यापाराश्रयत्वन्तत् कर्त्तृभिन्नकारकव्यापारस्य धात्वर्थ-
त्वाभावेनापत्त्यभावात् तस्य व्यापारस्य धात्वर्थत्वविवक्षायान्तु तदा-
श्रये कर्त्तृत्वस्य साध्वसिश्छिनत्तीत्यादाविष्टत्वादिति युक्तम् अग्नेर्माण-
वकं वारयतीत्यादौ माणवकस्य कर्त्तृत्वापत्तेः नापि प्रधानीभूतधात्व-
र्थव्यापाराश्रयत्वन्तत् माणवकव्यापारस्य प्राधान्याभावेनापत्त्यभावेपि
पक्वस्तण्डुलो देवदत्तेनेत्यादौ फलस्यैव प्राधान्येन व्यापारस्याप्राधान्या-
द्देवदत्तस्य कर्त्तृत्वानापत्तेः, अजाग्रामं नीयत इत्यादावजायाः कर्त्तृ-

त्वापत्तेश्च तद्व्यापारस्य प्राधान्यात् नच कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थव्यापाराश्रयत्वन्तत्, तद्व्यापारस्य तदानीमप्राधान्येऽपि कर्त्तृप्रत्यये पचतीत्यादौ प्राधान्यसत्वात् अजायामनीयत इत्यादौ अजाव्यापारस्य प्राधान्येऽपि नयतीत्यादौ कर्तृप्रत्ययसमभिव्याहारे प्राधान्याभावादिति शेखरोक्तं युक्तमिति वाच्यम् । कर्तृत्वञ्च स्वातन्त्र्यमिति स्वातन्त्र्यलक्षणे स्वातन्त्र्यप्रवेशेनात्माश्रयात् नच कर्त्तृत्वं संकेतसम्बन्धेन कर्त्तृपदवत्त्वमेवेति नात्माश्रय इति वाच्यम् । कर्त्तृपदवत्वज्ञानञ्च स्वातन्त्र्यज्ञानात्स्वातन्त्र्यज्ञानञ्च कर्त्तृपदवत्त्वज्ञानादित्यन्योन्याश्रयात् कर्त्तृप्रत्ययसमभिव्याहार इत्यस्य विशेषणत्वे तु कर्म्मप्रत्ययसमभिव्याहारे कर्त्तृत्वानापत्तिरपि दोषः यत्र तिप्प्रत्ययसमभिव्याहार इति वाच्यम् । एधते देवदत्त इत्यादौ एध्धातोस्तिप्समभिव्याहाराभावेन देवदत्तस्य कर्तृत्वानापत्तेः यत्र[?]समभिव्याहार इत्युक्तावपि बोधस्य व्युत्पत्त्यनुसारित्वात् विपर्य्ययह[?]व्युत्पन्नानां पचतीत्यादावपि फलविशेष्यकबोधस्य सम्भवेन कर्म्मणोऽपि कर्तृत्वापत्तेर्ध्रौव्यात्, अत्रोच्यते प्रधानीभूतधात्वर्थाश्रयत्वमेव स्वातन्त्र्यम् प्राधान्यञ्च जनकत्वेन प्रतीयमानत्वं नतु शाब्दबोधीयविशेष्यताश्रयत्वं पच्यत इत्यादौ शाब्दबोधे व्यापारस्य विशेष्यत्वाभावेऽपि जनकत्वेन प्रतीयमानत्वस्य सत्वेनादोषात् नन्वेवमपि अजां यामं नयतीत्यादौ संयोगानुकूलव्यापारानुकूलव्यापारस्य धात्वर्थत्वात् प्रथमव्यापारस्यापि जनकत्वेन प्रतीयमानत्वात्तदाश्रयस्याजादेः कर्त्तृत्वापत्तिरिति चेन्न जन्यत्वेनाप्रतीयमानत्वस्यैव प्राधान्यत्वाभ्युपगमेनाजाव्यापारस्य जनकत्वेनप्रतीतावपि जन्यत्वेनापि प्रतीयमानत्वेनादोषात्, नचैवमपि पाचयति देवदत्तेन यज्ञदत्त इत्यादौ प्रयोज्यव्यापारस्य णिजर्थव्यापारजन्यत्वेन प्रतीत्या तदाश्रयस्य प्रयोज्यस्य कर्तृत्वानापत्तिः, पचति देवदत्त इत्यादावपि देवदत्तजन्यत्वेनव्यापारस्य सर्व्वत्रैव प्रतीत्या कर्तृत्वानापत्तिश्चेति वाच्यम् । स्वविशिष्टव्यापारव-

स्वमेव स्वकर्तृत्वं, वैशिष्ट्यञ्च स्वजन्यबोधविषयत्वेनतात्पर्य्यविषयत
स्वजन्यबोधविषयत्वेनतात्पर्य्यविषयीभूतार्थनिरूपितजन्यत्वेनाप्रतीयमा
नत्वोभयसम्बन्धेन पाचयतीत्यादिण्यन्तस्थलेऽस्तिधातुद्वयं पच् पा
इत्यादि तत्र प्रयोज्यस्य पच्धातुनिरूपितं कर्तृत्वमिति तस्य पच्धातु
विशिष्ट व्यापारवत्त्वं, प्रयोजकस्य पाचिनिरूपितमिति तस्य पाचिवि
शिष्टव्यापारवत्त्वमाख्यस्य विक्लित्यनुकूलव्यापारोऽयं इति व्यापारस्
पच्धातुवैशिष्ट्यं द्वितीयस्य विक्लित्यनुकूलव्यापारानुकूलव्यापारोऽयं इति
द्वितीयव्यापारस्य पाचिवैशिष्ट्यम् अग्नेर्माणवकं वारयतीत्यादौ संयो
गानुकूलव्यापाराभावानुकूलव्यापारोऽर्थो वारयतेस्तत्र प्रथमव्यापारस्
जन्यत्वेनाप्रतीयमानत्वात्तदाश्रयस्य माणवकादेः कर्तृत्वापत्तिस्तु
स्वबोध्यत्वेनतात्पर्य्यविषयनिरूपितजन्यत्वेन प्रतीयमानाभावाप्रतियो
गित्वरूपतृतीयसम्बन्धस्यापि निवेशनीयत्वादित्यलम् ॥

इत्थंभूत लक्षणे ॥

इत्थम्भूतः कञ्चित्प्रकारं प्राप्तः प्रकारेऽर्थे थमुप्रत्ययः प्राप्त्यर्थाद्भू
धातोः कर्त्तरि क्तः लक्ष्यतेऽनेनेति लक्षणं ज्ञापकं किञ्चिद्धर्म्मविशिष्टस्
ज्ञापकार्थ्यं तद्वाचकात्तृतीयेति सूत्रार्थः जटाभिस्तापस इत्यादौ प्रकार
स्तापसत्वं धर्म्मस्तं प्राप्तस्य तद्धर्म्मविशिष्टस्य तापसस्य ज्ञापकं जटा
तया तापसत्वप्रत्ययात् तद्वाचकात् जटापदात्तृतीया जटाविषयकज्ञा
नजन्यज्ञानविषयीभूततापसत्वज्ञानिति प्रयोगार्थः ज्ञानजन्यज्ञानं तृती
यार्थः विषयित्वसम्बन्धेन जटापदार्थस्य प्रत्ययार्थैकदेशे ज्ञानेऽन्वय
द्वितीयज्ञानस्य च विषयतासम्बन्धेन तापसपदार्थैकदेशे तापसत्वेऽन्वय
इत्थं'भूतस्य यत्र लक्षणज्ञापकपदभिन्नपदादेवोपस्थितिस्तत्रैवेदं सूत्रं प्रव
र्त्तते तेन कमण्डलुपाणिं छात्रमद्राक्षीदित्यादौ कमण्डलुपदान्न तृतीय
यत्र छात्रत्वविशिष्टस्य ज्ञापकः कमण्डलुः कमण्डलुज्ञानाद्धि छात्रोऽ
यमिति ज्ञायते तद्वाचकत्वं कमण्डलुपदस्येव कमण्डलुपाणिशब्दस्यापि